शं वक्त्रसुरव देवेशि·शैववशाक्तेन कारयेत ॥ लोकसम्मदनार्थं तु·शंखपात्रस्थापनं चरेत ॥ शैवपंक्तिक्रमे शैव·पात्राणां स्थापनं च रेत
सामान्यार्घ्यविशेषश्च घटश्च पाद्यपात्रकं ॥ आचमनीयं तथार्घ्यं च·पुनराचमनीयकं ॥ मधुपर्कास्तते देवि·स्नानीयं प्रोक्षणी तथा

॥ राम ॥
॥ २२ ॥

शक्तिपुत्रोपदृशस्तु स्तदावसशपूजनं ॥ नोचेत्तुजलवस्थाप्य पूज्य वैदिककर्म्मणा ॥ पूर्गादिकाष्ठपुत्रेष्वेष्ठ क्तिपात्रादिकं
भवेत् ॥ विलपेत्रणादेवस्त्रि विश्वामित्रेण वाचोरत ॥ वेह्नवेतु महेशानि पुराः सामान्यपात्रकं ॥ शंखपात्रं वामभागे स्वस्य देवस्य पा
वीति ॥ पुज्जाइवादस्सनागे तन्मध्ये परमेश्वरि ॥ वेह्नवेदेवदृश्यतु शंखवृत्तादिस्तु पार्वति ॥ पाद्यार्घ्याचमनीयस्य मधुपर्कक्रमा
द्भवेत् ॥ तद्दक षट्पात्रं च जलसंस्थापनाय च ॥ सिद्धकस्मिंतादृग्भाग वामदक्षेर्घटो भवेत् ॥ शक्तिपुत्रो वेह्नवस्य प्रोक्तमेतन्मया
तव ॥ स्वपुत्रस्य महेशानि न सामान्यघटो भवेत् ॥ विशेषर्घ्दस्थित च त्या ऊक्तिवीरादि कारयेत् ॥ शैवेपि स्वस्य दक्षान्तु सामान्या-
र्घस्थापनीति च ॥ तदुक्तं स्थापयेद्देवि सौरेश्वरउ महेश्वरि ॥ सौरि गोडे च सामान्यं वामार्घ्योत्तर गोन्व वैरि ॥ विशेषार्घप्रोक्षणं तत्र च स्था
पयेत्परमेश्वरि ॥ जैनवौद्धेतु तारा च भैरव कालिकाविधि ॥ दर्शनायतनादेवि विशेषार्घ्यघटादिकं ॥ प्रोक्षणं तत्समामासाद्य वेरक्षा
दिक्रमेण च ॥ गाणेश चोभयत्रैदेवि शंखवाचमनी भवेत् ॥ सामान्यार्घ्यो भवेद्वारि सामान्यं च विशेषकं ॥ श्रीपात्रमिति देवेशि चर्घ्य
स्थापं सुवेपि च ॥ गणेश चेत्तु कर्त्तव्यं नान्यथा सांकांवचः ॥ सर्वत्र शक्तियोगेस्य कुर्यान्नवत्परमेश्वरि ॥ वामावर्त्तक्रमेणैव गोडकौले

तुपात्रकं ॥ काश्मीरे दक्षवदने कोले मण्डलक्रमात ॥ केवलं शंखमात्रेण कारले चोदितार्थता ॥ पूजोपकरणं दक्षे पृष्ठे नैवेद्यस
य च ॥ करक्षालनपात्रं तु स्वपृष्ठे परिकीर्त्तितं ॥ घृतदीपो भवेद्दक्षे तैलदीपो हि वामतः ॥ त्रिकोणाकारतो वापि वह्निचक्रं क्रमे
णा च ॥ मेधादीक्षाविधौ देवि स्थापनं परिकीर्त्तितं ॥ सर्वपात्राणि संस्थाप्य स्ववामे तु स्वदेहान्तो ॥ घटस्य तु सुरं देवि परितः परिकी
र्त्तितं ॥ शंखस्य देवि शंखस्य सुवितु देवताग्रतः ॥ पूजयामी तर्पयामी नमो न्नैकलक्ष्मने ॥ पूजयामि तर्पयामि न्त्वः काश्मीरगो
चरः ॥ हृदयस्यास्य योगे तु साम्राट्केरलसंज्ञितः ॥ पूजयामि नमो देवि तर्पयामि नमस्तथा ॥ स्वाहादि केरले साम्राज्य महत्सु
र्गादि कीर्त्तितः ॥ नमः पूजा तर्पणे तु केरले परमेश्वरि ॥ पूर्णानन्दश्चिदानन्दः संप्रकीर्त्तो ---- श्रेष्ठो भेदा महेशानि हृदयान्त्र
प्रयोगतः ॥ सम्प्रयोगाद्विशिवाः स्वभेदाः परिकीर्त्तिताः ॥ आदौ मधेतया चान्ते वसिदानन्तु गौडके ॥ मादौ तु वसिदानन्तु काश्मीरे
परिकीर्त्तितं ॥ स्वतन्त्रे वसिः केरले तु केवलं तर्पणं यदि ॥ विलासास्यात तदा देवि पूजनं तर्पणं स्थ वा ॥ विश्व पूजाविधौ देवि केरले पूजने स
ति ॥ श्री पूर्वपादुका वापि कोटापादुका च वा ॥ तेद्दवता तर्पणं वा ऊर्ध्वदीर्घं च वा प्रिये ॥ सविन्दु वा महेशानि संपूर्णं वा समाचरेत ॥ ची

तमार्गेनुत्तीरणं मंत्रु स्रोषेतु पार्वति ॥ वज्रपुष्पप्रतीछेति स्वहस्तेन पूजनं ॥ वामावर्त्तक्रमेणैव दक्षवामक्रमेन च ॥ केवलं दक्षवर्त्तेन केव
लं वामहस्ततः ॥ भेदाश्चविंशति शिवे कीर्त्तिताः परमेश्वरि ॥ केवलानन्दयोगेन ॥ आनन्दनाथयोगेन केवलानन्दयोगतः ॥ आनन्दनाथयोगेन
नाथनन्दक्रमेणाच ॥ सिद्धव्योमचरिद्यादि प्रज्ञा चैतन्यबोधतः ॥ विलासक्रमयोगेन तथा सरस्वती क्रमात् ॥ एवमाणक्रमेणैव भेदवाङ्रूपमी
रितं ॥ इति संक्षेपतः प्रोक्तं विशेषः कथ्यते प्रिये ॥ ॥ इति श्रीमद्दक्षिणाम्नाये महोग्रतारासंवादे शक्तिसंगमतन्त्रराजे षण्णिर्णयकथनन्नाम
चतुर्थपटलः ॥ ४ ॥ श्रीदेव्युवाच ॥ देवशम्भो तु मिथुमि रहस्यातिरहस्यकं ॥ ॥ श्रीशिव उवाच ॥ रहस्यातिरहस्यं च कथ्यते शृणु पा
र्वति ॥ सद्भूलवासनाक्रान्त्वा पूर्वं परशिवः स्थितः ॥ ध्यानस्यासंध्यातिर्जाता साऽहं स्ववासनागता ॥ यदारभ्य परं रूपं विज्ञानं सुमनोहरं ॥
रूपं धृतं महेशानि तदारभ्य मम पथ्यता ॥ यदि कदिनमन्ताच्चैकं पर्वते परसुन्दरी ॥ तदा एवमांसः सर्वेऽपि महाकालस्वरूपिणः ॥ सर्वाश्च
योमहेशानि काली तारा प्रमः स्मृताः ॥ एवं बुद्धिर्यदा चेतना नाहि संसारकल्पना ॥ संसारोत्पत्तिकार्यार्थं प्रपंचाद्यं विनिर्मितं ॥ अतः शैव
रूपापन्ने वैष्णवं शारदवैष्णवं ॥ एवं क्रमेणादेवेशि मतमेतद्विनिर्मितं ॥ मतानि ७ संख्यानि तदारभ्य महेश्वरि ॥ संज्ञा तानि महेशानि प्र

पञ्चार्थं हि निश्चितं ॥ अत्रेधिजलधिश्रेष्ठे वरसमुद्रास्य गरो यथा ॥ यस्यास्ते तु पर्यायास्तथैतानि मतानि च ॥ वैदिकं चार्हतनिन्दा च · शैव
वैष्णवनिन्दनं ॥ वैष्णवे गणानिन्दा च · वीनं जैनस्य निन्दकं ॥ सौरगोत्रस्य निन्दा च चान्द्रे बौद्धस्य निन्दनं ॥ स्वायंभुवस्य निन्दा च · बौद्धे
मार्गे महेश्वरि ॥ सौभयाश्चीननिन्दा च · चीनं जैनस्य निन्दनं ॥ पाराणीते ननिन्दा च जैने पौराणनिन्दनं ॥ पौराणे मन्त्रशास्त्रस्य निन्दनं पर
मेश्वरि ॥ धर्मशास्त्रे महेशानि तथा कौलिकानन्दनं ॥ एवं भिन्नमतान्येवं संजातानि महेश्वरि ॥ वेदानामागवमाकुल्यं प्रपञ्चार्थं महेश्वरि
॥ एवं निन्दासमापन्ने · भेदे जाते महेश्वरि ॥ नैकत्र तु मनालग्नं · कापि चित्परमेश्वरि ॥ सर्वत्रान्योन्यनिन्दा च तदैक्यं च प्रकीर्त्तितं ॥ तदैक्य
स्य तु सिद्ध्यर्थं प्रपञ्चार्थं प्रकीर्त्तितं ॥ भिन्नं भिन्नं प्रसंस्थाति · निन्दति च परस्परं ॥ न विद्यासिद्धिमाप्नोति · स भ्रमति पिशाचवत् ॥
अन्योन्यं यदि निन्दा न · तदैक्यं च प्रजायते ॥ तदैक्यस्य तु सिद्ध्यर्थं · कालिकाम्नारिसीं भजेत् ॥ पुनर्वेदत्वनाशाय भक्तानुग्रहणाय च ॥
गुरुरूपा चात्मरूपा सर्वविश्रान्तिं शिवा ॥ रूपमेतत्त्रपंचार्थं · कीर्त्तितं तु मया तव ॥ पुराणं न्यायमीमांसा सांख्य पातंजले तथा ॥ वेदान्ते
व्याकृति देवि · धर्मशास्त्रागमिश्रिता ॥ छन्दोज्योतिर्वैद्यकादि · विद्यास्तथा चतुर्दश ॥ प्रपञ्चार्थं मया प्रोक्तमेकत्वं परिणामजे ॥ प्रक्र

नकथ्यतेदेविश्रृणुष्वावहिताभव॥ चतुर्वेदेश्वरीप्रोक्ताश्यामामहाभवतारिणी॥ अथर्ववेदधिष्ठात्रीश्यामामहाकालिकापरा॥ विनाकाली
विनातारांनाथर्वणाविधिःक्वचित्॥ केरलेकाशिकाप्रोक्ताकाश्मीरेत्रिपुरामता॥ गौडेतारेतिसंप्रोक्तासैवकालान्तरेभवेत्॥ हादे
त्रितयमेतत्त्रिसंक्षेपेणप्रकीर्त्तिता॥ काश्मीरतारिणीबाला·गौडेकालीप्रकीर्त्तिता॥ शिवेदेवीपरंजाता·दक्षिणामूर्त्तिभेदतः
अथानन्दभैरवाख्यमतभेदेनपार्वति॥ देवीसकाशाद्याप्राप्ता·स्वगुर्वेतंमहेश्वरि॥ तन्नामाज्ञाक्रमेणैव·साधितव्यपरंपरा
॥ दक्षिणामूर्त्तितोदेवि·स्वगुर्वेतत्क्रमेण च॥ तन्नामाज्ञाक्रमेणैव·सावेतुस्यपरंपरा॥ अविच्छिन्नायदासावे·चतुःशंकरयोग
तः॥ तदन्यसंप्रदायोहि भविष्यतिमहेश्वरि॥ केरलश्चैवकाश्मीरो·गौडश्चैवन्तृतीयकः॥ चतुर्णामपिदेवेशि त्रितयंनिष्ठितिप्रि
ये॥ गर्भक्रामिवद्गर्भक्रोणा·द्विसामेपानकर्म च॥ शुक्रोमिवस्तुयत्वेति·कालेपानकर्म च॥ हाष्याभिषङ्गयत्वेति·काश्मीरेपा
नमीरितं॥ सदामत्ताभवेन्नाथोविद्यासिद्ध्यादिपानतः॥ अनुक्रमेणात्रितयं·पूजनंदीयदानरः॥ नन्दनाथोवसंप्रोक्ता·स्तन्दूपाय
स्तुमानवः॥ महानन्दाभिधःप्रोक्तोगौडपानक्रमाच्छृणु॥ वामहस्तात्यानपूजा·क्रमाह्वामीप्रकीर्त्तिता॥ एवहस्तात्यानयोगा·

॥श्रा·त॥
॥२५॥

वामहस्तप्रतर्प्पणात्॥ दक्षहस्तानुजनाड्ये कोलेत्यभिधीयते॥ केवलं दक्षहस्तेन पूजनाद्दक्षिणाभिधः॥ सत्स्वकेशलप्रोक्तंथ्
इमार्ग प्रकीर्त्तितः॥ दक्षिणामूर्त्तिभेदे तु दिशो वा दोवयं भवेत॥ तद्भेदेनत्रिभेदत्वं प्रत्येकेन नवभेदता॥ आनन्दभैरवमते पंचा
शीतिरुद्रक्रमे॥ दिव्यसिद्धमानवादि पंचाशीति प्रकीर्त्तिताः॥ प्रत्येकं त्रितयत्वेन सप्तसप्तक्रमेवतु॥ पंचाषष्टीति संप्रोक्त
नामाज्ञानक्रमेण च॥ नवनाथक्रमेणैव नवभेदा भवन्ति च॥ चतुराशीतिसिद्धानां क्रमदीक्षाप्रभेदतः॥ चतुराशीतिभे
दाश्च तन्नामाज्ञाक्रमेण च॥ अष्टान्वनथविज्ञाय नामान्त्याज्ञापयेद्गुरुः॥ ऋणांच्चक्रप्रवक्ष्यामि येड्डेदेनापिपावति॥ साध्या
णान्ति साधकाणां व्यञ्जनत्वभेदतः॥ तावद्कूलुसंख्याह्या मातृकागुणनामाक्रमात॥ साधनामविद्गुणितं साधकेन समन्वितं॥
सप्तभिस्तु हरेद्भागं तद्दनाद्विपरीतकं॥ पूर्वाङ्कवेपरीत्येन ऋणीधनविशोधनं॥ यस्याधिकाङ्काद्देवेशि सद्दवीह ऋणीमतः॥ न्यू
नाङ्के यस्य देवेशि सधना परिकीर्त्तिता॥ साधकस्य धनीत्वञ्च विज्ञायानु ऋणीत्वकं॥ गुणेन विर्द्धनं चापि त्रिभिर्वा सप्तभिस्थ
वा॥ त्रिसप्तमत्ययत्वेन नियम परिकीर्त्तितः॥ यस्य द्वाभ्यां वर्द्धनं तु राजतन्त्रतुभेदजं॥ भूर्व्वे हस्त्वा न भागोस्ति संख्यपादि दमी

॥राम॥
॥२५॥

तं॥ वर्द्धनस्तु त्रिभिर्यन्त्र· सप्तभिर्भेदनन्ततः पञ्चाशभिर्भेदनन्तु· तत्र द्वाभ्यान्तु वर्द्धनं॥ मंत्रसाधनकयोर्वर्णान· गणनाविधिपूर्वकं॥
भिन्नान्स्तान्त्वा पृथवा देवि स्वरव्यञ्जनभेदतः॥ साध्यनामाद्विगुणितं· साधकेन समन्वितं॥ अग्निभिस्तु हरेद्भागं· तदन्यद्धि परीतकं॥ मं
त्रसाधकवर्णानां· पञ्चाशन्मातृकाक्रमात्॥ कियन्तमोङ्गवेद्वर्णास्तावदङ्कांस्तु संग्रहे॥ स्वरव्यञ्जनभेदेन· तथावा वर्णामात्रकं॥ ता
वदङ्कास्तु कर्त्तव्या· वर्णानामुभयोरपि॥ मंत्राणां त्रिगुणीकृत्वा· साधकेन समन्वितं॥ सप्तभिस्तु हरेद्भागं· तदन्यद्धि परीमकं॥ अन्यत्रैतु प्र
कारणाद्गुणानं भाजनं भवेत्॥ इष्टत्वेन गुणानं· भाजनं चात्र कीर्त्तितं॥ यथांकक्रमयोगेन· कीर्त्तितन्तु मयानव॥ नामाक्षरं समारभ्य· याव
न्मन्त्रादिमाक्षरं॥ त्रिधाकृत्वा स्वरैर्भिन्ना· तदन्यद्धि परीतकं॥ मन्त्राक्षरं समारभ्य· यावन्नामाक्षरं शिवे॥ सप्तकृत्वा त्रिधा भिन्ना· तदन्यद्धि
परीतकं॥ मातृकावै परीत्येन· मन्त्रनामाक्षरान्तकं॥ त्रिधाकृत्वा त्रिभिर्हृत्वा· मंत्रराशिरियं भवेत्॥ अन्यानि ऋणचक्राणि· कीर्त्तितानि मयानव
॥ भक्तिरूपं चक्राणां देवि यथावदवधारणे॥ कोष्टतेषु गुणप्रश्च· तदयत्रकृतम्॥ पूर्वसञ्चानुपंजेन· भक्तिर्यत्रस्थ भवेत्॥ समं चास्तु ऋणीज्ञेया भक्तिरू
पं चक्राणां प्रिये॥ नो चेद्भक्तिकथं देवि भक्तिरूपं चक्राणां प्रिये॥ इति क्रमेणा संप्रोक्तं ऋणीधनविशोधनं॥ ऋणं धनं च विज्ञाय· नाममद्यान्म

हेश्वरि॥ अन्यथा नामदानेन तु नामानुरूपकं फलं॥ न भवेत्परमेशानि अशुभं भविता साधकः॥ स मूर्खस्तत्वं न जानाति देवदोषपरः कौ॥ सर्वमेव
तु विज्ञाय नामाज्ञां दापयेद्गुरुः॥ दिव्यसिद्धमानवेषु फलं च उत्तरोत्तमं॥ ॥श्रीदेव्युवाच॥ नामदानं कथं कार्यं दर्शनेष्वपि षट्स्वपि
॥ षडाम्नायेषु देवेशि तथाह्याम्नवसुगमके॥ पंचान्वय तथा भेदान्त्वे पंच परमेश्वरि॥ मेधासाम्राज्यदिव्यान्न साम्राज्येषु महेश्वरि॥ नामदा
नं कथं कार्यं तन्मे कथय शंकर॥ ॥ईश्वर उवाच॥ रहस्यातिरहस्यं च त्वया पृच्छितं शिवे॥ अहं जानामि सा काली तारा जानाति नेतराः॥
न्ये यत्किंचिन्न जानाति तत्रापि दिव्यरूपिणी॥ सर्वथा गोपितं देवि न वाच्यं यस्य कस्यचित्॥ षट्कर्मंतु संप्रोक्तं चतुरंगविधायकं॥ प्र
थमं वर्णवेधाख्यं स्वरवेधो द्वितीयके॥ तृतीये शून्यवेधाख्यं चतुर्थं कूटवेधता॥ पंचमं गणवेधाख्यं षष्ठं चक्रेण किंचन॥ षट्चक्राणि म
हेशानि चक्राण्यन्यान्यपि प्रिये॥ अन्यानि पंच चक्राणि रुद्रविधानि च॥ तत्र षट्चक्रमध्ये तु साध्यसिद्धं तु सिद्धकं॥ देवतेश्च पारख्यं
च दैवतादर्शनाभिधं॥ देवतादर्शमात्रेण नामदद्यान्महेश्वरि॥ रोगग्रस्तं यन्नाम साधकस्य तथैव च॥ अप्रसिद्धं नाम गुरुर्को यासु
प्तेयेन च जापयेत्॥ नामाक्षरसमारभ्य यावन्मंत्रादिमाक्षरं॥ त्रिगुणीकृत्य देवेशि त्र्यंशव्यञ्जनभेदतः॥ मातृकागणनान्वेन यावदक्ष

भवेद्धिद्धुवे॥ एकौघज्ञात्वासाधकोरोभिषिंतंसप्रभाभवेत्॥ नामराष्ट्रिरियंप्रोक्ता·मन्त्रराशिरतान्यथा॥ आणीनामप्रदेशश्च·सुन्दरंसुमनोह
रं॥ दिव्यौघनामभागेनगुरुराणादीयतेयदि॥ सिद्धौघनामदेवेशि·भागेनसिद्धकारकं॥ मानवौघाभिधंभावआणीभागेनलभ्यते॥ गुरुणा
लौकिकतःशिष्यःशिष्यगणालोचितागुरुः॥ आणीनामप्रदानेनमन्त्रदोषनिहान्विता॥ पूर्णाभिषेकदीक्षायां·नामंचैवप्रदापयेत्॥ मेधादीक्षा
दिसाम्राज्यदिव्यसाम्राज्यगोचरं॥ नामरेयंमहेशानिसुन्दरंकीर्तितंचवा॥ आदौप्रसिद्धनामस्य·दत्वाभेकल्पितंचवा॥ मन्त्राक्षरंचवा·
नामविद्याख्यंवामहेश्वरि॥ अथतद्दिनऋक्षोत्तासुदृष्यार्णाक्रमेणाच॥ काश्मीराख्यसंप्रदाये·तद्दिव्यामंचकल्पितं॥ गौडेकदाचन्नकर्त्ता
म·केरलेसर्वगोचरं॥ परस्परंविशेषश्चाथनामदृष्यान्महेश्वरि॥ नाथोक्तश्चार्थसिद्ध्यर्थं·पूर्वपञ्चकयोगतः॥ यदेवतुआणीभूषान्तदेवव
रनायकं॥ एतत्त्रयंमहेशानि·चोत्तरोत्तरसिद्धिदं॥ दिव्यौघेचेत्समायाति·दिव्यरूपसञ्जायते॥ सिद्धौघेचेत्समायाति·सिद्धरूपसुसि
द्धतः॥ मानवौघविनिर्देशः आज्ञाख्याख्यात्विदंभवेत्॥ ॥ श्रीदेव्युवाच॥ शाक्तान्यानुमहेशानि·कथन्नामप्रदीयते॥ वैष्णवेगाणपत्ये
चशैवेसौरपंथुवेतथा॥ चन्द्रेपाशुपतेचीनपंनेकालमुखेपिच॥ वैदिकेपिमहेशानि·तदावरागश्चवा॥ तत्रपापनामदेयंडागसुन्न

रतस्तथा ॥ मूलान्नश्च तदेतश्च दर्शान्नाम महेश्वरि ॥ वामायां स्पर्शकालश्च स्पर्शान्तारादिवेधितो ॥ स्पर्शशक्तिर्नवविधो देवि चक्रषट्क्रोडश्चा
क्रमात् ॥ कलात्मा मान्महेशानि रन्ध्रं च स्यात्तु तत्क्रमात् ॥ दुर्वासामतमागम्यादि तथा स्वप्नावती विधौ ॥ मधुमत्याश्च दिव्याश्चाभिन्नरूप
ःप्रकीर्त्तिता ॥ षोदशणाच पेराणाच परा प्रासादकेपि च ॥ षड्विधायां शाम्भवे च गुरवो भिन्नरूपिणः ॥ मासास्थं चाथ न्यासस्थं मूलार
क्षीरस्थमेव च ॥ नामदाने विधिरयं मयाप्रोक्तो महेश्वरि ॥ संप्रदायक्रमेणैव शांभवे पूर्वमीरितं ॥ पञ्चश्रनोक्तं देवेशि यतिक्रमनके
पिच ॥ चतस्रमत्र देवेशि चतुःस्वराडक्रमेण च ॥ पुनरष्टनिर्न्धमन्त्रवः द्विमामेदादिशोषितेः ॥ श्रीचूडावेर्म्मिला चक्रं राज्यादि पञ्चगो
चरं ॥ नवचक्राणि देवेशि कथ्यन्ते शृणु यत्नतः ॥ केरलाख्यं च दशमं प्रतेकं त्रिविधं चरेत् ॥ एतद्दिव्यचनं देवि संक्षेपात्कथितं शृणु
॥ त्रैविध्ये चैव श्रीचक्रे क्रमं शृणु महेश्वरि ॥ अष्टोत्तरशतं सम्याप्नी चक्रराज्ञाप स्मृतं ॥ चतुःपञ्चाशदेवात्र मध्यचक्रे क्रमो भवेत्
॥ शक्तिभिर्नन्दशाख्याभिः कनिष्ठं परिकीर्त्तितं ॥ चूडकाख्यं महेशानि त्रिविधं परिकीर्त्तितं ॥ पंचाशत्पीठनाम्ना वा षट्त्रिंशज्ज्ञा
तिमध्यतः ॥ दशविद्यारूपजातिगन्धभेदक्रमेण च ॥ कुलाकुलक्रमेणैव काश्मीरगौडभेदभेदतः ॥ अष्टकंन्याससमायोगा त्वमि

शुंपीरिकीर्त्तितं ॥ एतत्कर्मं महेशानि यथालक्षं धारयेच्च ॥ शक्तिमाहूय देवेशि कंचुकीं गृह्य पार्वति ॥ एकैकां कंचुकीं देवि विधि
वद्धेतत्प्रदापयेत् ॥ वस्त्रग्रन्थितनिर्वन्ध सामा रमणि योजयेत् ॥ उन्मीलागम्यमिदं देवि चूडाचक्रं शृणु प्रिये ॥ शक्तिमाहूय देवेशि वादि
कां गृह्य यत्नतः ॥ कुलेरां स्थाप्य संपूज्य शिवमाहूय सादरं ॥ यथा यथावसंज्ञा ज्ञा सा तेषां चक्रमध्यग ॥ चूडिकाख्यं चक्रमादेवि कथि
तं श्रीक्रमं शृणु ॥ परस्परं स्नेहयोगाद्धि चक्रे विनिवेशनं ॥ केशाख्यचक्रमे देवि भिन्नाभिन्नं निवेशनं ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रो
तुमिच्छसि ॥ इति श्रीमदक्षोभ्यतारासंवादे शक्तिसंगमतन्त्रे पञ्चमपटलः ॥ ५ ॥ ॥ श्रीदेव्युवाच ॥ एतेषां च फलं देव कथयस्व ममा
धुना ॥ एतज्जानीमहेशानि शिवरूपं न संशयः ॥ वशस्तंभाकर्षणं च त्रैलोक्यवश्यता तथा ॥ अंजनं तिलकं गुप्तिः पादुका गुटिका तथा ॥ वे
तालं यक्षिणीसिद्धिस्त्रिधावादस्तथोत्तमं ॥ खेचर्यादि महासिद्धिः परकायप्रवेशनं ॥ शापानुग्रहणं वाक्यं कामरूपत्वमेव च ॥ रसायनं च त्रै
लोक्यं महेन्द्रादि च जालकं ॥ अनिष्टमारणं देवि स्वप्नाद्दर्शनं तथैव च ॥ मूकान्धस्त्रीकरणं संहाररक्षणं तथा ॥ पताकाद्वन्द्वयुद्धस्यज
योवश्यात्वनाशनं पौरुषं च मनस्थैर्यं रंजकः स्वर्गभैरवः ॥ धनदा च तथा शातना पद्मा मधुमती तथा ॥ रहस्यानि रहस्यं च रहस्यानि रह

स्यकं ॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ गोपनीयं गोपनीयं गोपनीयं पुनः पुनः ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ देवे
श्वरो तुमिच्छामि रहस्यं परं वरं ॥ ॥ श्रीशिव उवाच ॥ सर्वविशेषतः प्रोक्तमथ कादिक्रमाच्छृणु ॥ दिव्यसिद्धमानवेशः महाकालक्रमे
णा च ॥ स्मृतिकालकरालाख्य वीरनाथक्रमेण च ॥ पंच्चमीतिकालनव च करालेदृशपार्वति ॥ कालित्रयमहाकालनवभेदाः गुरुक्रमात्
॥ वीरनाथे शतं देवि गुरुभेदप्रकीर्त्तितः ॥ नवनाथयुगमभेदाः सिद्धे सामंकहे भवेत् ॥ एतत्क्रमेण देवेशि दीक्षणं कादिसम्मतं ॥ स्वस्या
मेव महेशानि शंभोः प्रधानयोगतः ॥ शाम्भवत्वं भवेन्देवि शिवोहं निर्गुणोति च ॥ शाक्ते प्राधान्यशक्त्याः स्याद्देवीरूपोहमेव सा ॥ कालि॰
काहं महातारारूपाहं सर्वदेव च ॥ तद्रूपोहं वक्ष्यान्तोरस्यादिति संक्षेपतो मतं ॥ स्थित्वादिद्योघपानञ्च कीर्त्तितं परमेश्वरि ॥ सिद्धौघास्था॰
परित्वान्तु पानं कुर्यान्महेश्वरि ॥ मानवौघः स्वसुस्थाय क्रमात्स्थितपमीरितं ॥ संगी भूत्वा तु चैतन्यः सह यामी कुलेश्वरि ॥ विसर्ज्ज्ञेनाम्नरं देवि
भद्रनाथस्य कीर्त्तितं ॥ वीरत्वप्रत्वं देवि चातिकालमतक्रमात् ॥ शक्तिपानं स्यात्यभिन्नं दक्षिणामूर्त्तिसम्मतं ॥ शक्तिपात्रं च गरुञ्जोया॰
वीरनाथमतं शिवे ॥ कुलचक्रं भवेत्कान्त्या मकुलं कालिकामतौ ॥ कुलाकुलं च ताराणां संप्रदायपत्रपान्त्रं ॥ दिव्यमार्गी वीरमार्गी यस्तु मा

र्गीक्रमेणाच्च ॥ पूर्णाभिषेकयोगेन वाज्ञानाम प्रदापयेत् ॥ पूर्णाभिषेकं देवेशि ह्यादिकादिक्रमेणाच्च ॥ कथ्यते देवदेवेशि शृणु सावहिता भव ॥ शु
भमासे शुभर्क्षे च शुभलग्ने शुभोदय ॥ कालरात्रिदिने प्राप्ते वीररात्रिदिनं तथा ॥ मोहरात्रिदिने चैव महारात्रिदिने तथा ॥ क्रोधरात्रिदिने देवि घोररात्रि
दिने तथा तारारात्रिदिने वापि स्ववक्षारात्रियोगजे दारुणांसगमे चापि मकरे कुंभसंगमे ॥ विविक्तस्थानमासाद्य स्वस्थानसुखादिपूर्वकं ॥ पर्वते वि
पिने घोरे ॥ शून्यगेहे श्मशानके ॥ एकलिङ्गे शिवावासे श्मशानाष्टकेपि च ॥ चक्रपाणिगृहे नद्यां पूर्णापीठाष्टके शिवे ॥ पञ्चाशत्पीठमध्ये वा
उपपीठाष्टकेपि च ॥ गङ्गागर्भतडागे च वेश्यावासे च संगमे ॥ कुलवृक्षवने वापि कदलीवनमध्यतः ॥ अथ पुष्पवने देवी नारिकेलवने त
था ॥ कदलीमण्डपे दिव्य वाटिकायां विचित्रिते ॥ पालाशा वनमध्ये च एकान्तस्थले विशेषतः ॥ स्वैरिणीगृहमध्ये च कुट्टनीनग्नमण्डले ॥ विशि
ष्टस्थानमासाद्य मण्डपं तत्र कारयेत् ॥ कलाहस्तं सूर्यहस्तं नवहस्तं महेश्वरि ॥ पंचहस्तं महेशानि नवकुण्डीक्रमेणाच्च ॥ अथवाष्टकक
ण्डाख्ये क्रमेण परमेश्वरि ॥ मण्डपं कारयेद्देवि मेरुसाधनमार्गतः ॥ श्रीमेरुमण्डपन्देवि यथादीक्षानुसारतः ॥ वितानध्वजभूषाढ्यं प्रकार ॥
पुरुषैर्युतं ॥ गोपुरैः संयुतं देवि नानातोरणमण्डितं ॥ तदग्रे परमेशानि पूजामण्डपमाचरेत् ॥ अष्टाष्टकत्रिक्रमेणा पंचपंचक्रमार्गतः ॥

एतासामन्विते श्रेहि· यथा भवति पार्वति ॥ तथा महोड्डुमासास्य· स्फुड्डोनि रचयेत्ततः ॥ सहस्रकारजनं देवि· सर्वतोभद्रमाचरेत् ॥ तत्र चक्र
न्नामपात्रे· स्वर्णगौरी प्यश्च भूमिजे ॥ वत्रैवार्चयेद्देवि· तथा चक्रस्यतः शृणु ॥ सर्वतोभद्रपीठञ्च देवपीठप्रकीर्त्तितं ॥ एकाङ्गं योगिनी
पात्रे· पञ्चाङ्ग क्षेत्रपालकं ॥ नवाङ्गे गणपे प्रोक्तं· वटके लिङ्गभद्रकं ॥ विरच्य परमेशानि· मेरुमहोड्डुपमाचरेत् ॥ मेरुसंसाधनं कर्म ॥
श्रीविद्योपासकस्य च ॥ सकलन्निःकलन्देवि· द्विविधं मेरुसाधनं ॥ दीक्षाङ्कृत्येन सकलं निःकलं काममनाकृतः ॥ श्रीविद्या कालिका ता
रा· त्रिविद्योपासके स्थिते ॥ मेरुसंसाधनन्देवि· दिक्षायां परिकीर्त्तितं ॥ एतद्विद्यामहेशानि· नहि दीक्षा भवेत्क्वचित् ॥ श्रीविद्यापा
सकानाञ्च· पारंपर्य्याक्रमं शृणु ॥ आदौ बालाविनिर्दिष्टा· ततः पञ्चदशी मता ॥ ततः श्री षोडशी विद्या· पराविद्या तदुत्तरं ॥ ततश्चर
णदीक्षा स्या· न्निर्वाणदीक्षणं ततः ॥ ततः षट्शाम्भवाख्या च स्मधर्दीक्षा तदुत्तरं ॥ अनुक्रमेणासंयुक्ता· मेधादीक्षाभिधा भवेत् ॥ अथ नैकत
मं वापि· ततः साम्राज्यपारमेष्ठ्यं· वगरामनुगोचरा ॥ श्रीविद्याङ्गानु बगला· मातङ्गी छिन्नमस्तका ॥ एतद्दीक्षोत्तरान्देवि· नान्यादीक्षास्ति
कुत्रचित् ॥ बालायादेहशुद्धिश्च· ततो विद्याधिकारता ॥ विद्याधिकारतायाते श्रीषोडशोपासनं चरेत् ॥ षोडशाधिकारिदेवेशि· पञ्चषोडशान्यसेत्त

नौ॥ खिन्नासीपञ्च घोरनाया पाशि विघ्नाजयेत्सदा। पराषट ततो न्यस्य ततश्च रक्ताचिन्नन्नं॥ ततो निर्वाणविन्यस्य ततः आम्रं वमाचरेत। तत्वोत्था
त्रितपन्यस्य रश्मिचिन्ननमाचरेत॥ श्रीरश्मिश्च पराराश्मिं हितयं विन्यसेत्ततः॥ मेधा दीक्षासमग्रा तु ततो भवति पार्वति॥ मेधेयन्त्रं महे-
श्वानि साम्राज्यमेधिकान्यसेत॥ ततो दिव्यांभिधान्यस्य सदाशिवसमो नरः॥ मेरुभेदादिविज्ञानं श्रीमहासिद्धशैवके॥ कालिकाम्नायतन्त्रे
तु ऊर्ध्वाम्नायप्रकीर्त्तितं॥ स्वत्रापि देवदेवेशि कथ्यते चान्तमेविधौ॥ कुराडनिरञ्जनानन्दे वि तत्रैव महेश्वरि॥ क्रमागताताश्चितं च प्रक्र
तं शृणु पार्वति॥ पूर्वोक्तमण्डपं कृत्वा नानाचित्रविचित्रितं॥ चन्द्रकानादविभूषाढ्यं दर्पणोदरसन्निभं॥ भूमिं कृत्वा महेशानि वक्ष्यमाणं
समाचरेत॥ विधाय चक्रं तन्मध्ये चक्रकुंभान्निधापयेत॥ कथोदकैः समापूर्य भिपिंच्यामि वदेमनून॥ क्रमागतसमाचारनिरते भक्तियालि
नी॥ निरच्चविपुरं चक्रं प्रतियोनिषु षोडश। त्रिकोणान्निविधायाथ मध्ये कुंभं तु विन्यसेत॥ सौवर्णराजतं ताम्रं कांचं मार्त्तिकमेव च। पूरि
तं पानितोयेन कथितेनाक्षोरौषधैः॥ निक्षिप्य नवरत्नानि धान्यानि विविधानि च॥ हिरण्यसततंशाणि वासोत्याम् अभिवेष्टयेत॥ रक्तमाल्यश्च नर
नं चूतं पनसाश्वत्थपल्लवैः॥ स्नातां कृतु लतावद्धे मातुलङ्गफलान्विते॥ पिधानकलशान्नन्या न नैवेद्ये केकशो न्यसेत॥ सार्द्धं सह मुद्रिंश्च

॥ श्या.तं. ॥
॥ ३० ॥

ञ्च षष्टिसंख्याक्रमोदितान् ॥ मध्ये चक्रेषु तोयादि कृत्वावाहयामि पूज्य च ॥ कलामनित्यामन्त्रांश्च जपित्वा पूर्ववासरे ॥ कलात्मनित्यामन्त्राश्च का
दावपि महेश्वरि ॥ कादौ श्रीचक्रस्थाने च कालीचक्रं महेश्वरि ॥ त्रिकोणाद्येषु भेदेषु समन्तात्परिकीर्तिता ॥ तारायां कालिकास्थाने तारा चक्र
न्महेश्वरी ॥ कलात्मनित्यास्थाने तु वाग्देव्यंगाणादेवता ॥ सर्वत्र समताप्रोक्ता सर्वमन्त्रकादिवद्भवेत् ॥ जन्मर्क्षे प्रातरुत्थाय स्वनित्यां तत्र पू
जयेत् ॥ कास्यां तारायां विधौ देवि नित्यास्थाने मनुं जपेत् ॥ सहस्रं प्रजपेत्पश्चाद्धोमं कृत्वा समं ततः ॥ तत्पूर्वषोडशाक्रान्तिः प्रायश्चित्तं समाच
रे ॥ षष्ठीजपो कालनित्या नामपारायणात्तथा ॥ मन्त्रपारायणाद्देवि चक्रपारायणात्तथा ॥ यन्त्रपारायणाद्देवि स्तवपंचावस्युहस्त्रवा ॥ दि
नतो वारतः पश्चान्मासात्पूर्वं त्रिंशतादिने ॥ संध्याचतुष्टयं होदो वादौ युगमे त्रयी भवेत् ॥ प्रायश्चित्तं समाचर्य मासमध्ये मस्तकावने कृत्वा संस्था
प्य यत्नेन विद्योक्तं चक्रं तारकचक्रके ॥ शृङ्गकाहलशंखादि वाद्यसंगीतनर्तनैः ॥ धूपदीपैर्योगिनीवृन्दैर्भैरवकैर्देवतात्मभिः ॥ सहितैः संपूजितैः
सार्द्धमभिषिच्येद्गुरुः स्वयं षोडशाभिषेकमन्त्रैश्च कहहादिक्रमोदितैः ॥ मूलभेदैश्च वा देवि सहस्रमभिषेचयेत् ॥ कालचक्रं कलौघयोरथ
नत्र चक्रं गुरुर्बीज ॥ महापात्रेषु संस्थाप्य विद्यात्मं त्वाभिषेचयेत् ॥ विद्याजैर्होमैर्हिस्तानि सहस्रकपयायुतः ॥ अभिषिच्य प्रयत्नेन चक्षु

॥ राम ॥
॥ ३० ॥

षतादिसम्मतं । संप्रदायक्रमेणैव शिष्याणां त्वन्तिकमण्डले । संस्थाप्याभिषिंच्यादौ तेन तद्भूजपपूर्वकं देवी सर्वशिष्याणां तनुं कलशस्थासक्षैः
सह ॥ परकायाक्रमेणैव जीवकीटक्रमेण च । भृङ्गीत्वं याति देवेशि तज्जीवं पुत्तलीगतो ॥ स्थाप्य शिष्याणां बोधयेच्च भ्रूलानन्दपरायणाः
जीवः कीटः पराभूत्वा भृङ्गीत्वमभिगच्छति ॥ ततः षट्चक्रभेदं च ज्ञात्वा तद्रसं तु लभेत् । तत्प्रयोगं महेशानि स्थापिके यत्र पीठके ॥
तेनेमं ग्राहिविकत्त्र । तस्योच्चारणमाचरेत् ॥ भृङ्गीवलीतेन जाती चक्रेमन्त्राणां योगतः । मन्त्रवर्णान् चक्रवर्णान् कियत्संख्यानि कानि वै
ष्टतिविनाध्यगणोपि त्नावदंच प्रपूर्णता । जीवः कीटस्ततो भृङ्गी ॥ ततस्त्वेव चराचरा । तेन भृङ्गावलीनाम योगिनामपि दुर्लभा ॥ क्रमदीक्षा
युतानां च भृङ्गीत्वं सुलभं क्रमात् ॥ मन्त्ररूपा भवेत्तेन साङ्गाङ्गधाम्यवीर्जिता । स्वयं शक्तिस्तदयञ्च शक्तिस्वक्रमयोगतः । शैवे शान्तेश्वा
न्ते शैव तद्रूपेक्रमयोगतः । चक्राणि चैव विज्ञाय षट्क्रमार्गेण पार्वति ॥ चक्राणि चैव निर्भिद्य स्वरूपं तत्स्वरूपकं । न कीटत्वं न भृ
ङ्गीत्वं स्वरूपेणैव देवता । देवतारूपभेदेन क्षणात्तद्रूपतां भवेत् ॥ स्वादौ तु पुत्तलीं कृत्वा तत्र जीवं प्रविन्यसेत् ॥ ज्ञात्वा तु प्रत्ययं देवि
ततश्च संजपेत्तद्वै । कलोपायसमाकीर्णो न समाधिर्नयोगता । यदि योगो भवेद्देवि न हि तत्र फलं भवेत् ॥ तस्मात्कारणतो देवि मन्त्र

योगसमभ्यसेत ॥ स्वकर्मत्वेपि कथयेत्तदाप्रभृति सेपितं ॥ आज्ञुतिसेद्विधिच्छिन्नं पर्यायन्नस्य विश्रुतो ॥ सहस्रं प्रजपेद्विद्यां अभिषेकसम
न्वित ॥ दिनषोडशकं चापि नवरात्रं च वापि वा ॥ पंचरात्रं त्रिरात्रं च यथावत्साधयेद्ध्रुवं ॥ चक्षुष्मत्यादि मेधान्तं पूर्वं संसाधयेद्ध्रुवं ॥ स
र्वमन्त्राः प्रयोक्तव्या षडाम्नायादिभेदजा ॥ अष्टादशाम्नायमंत्राः कादिहादिक्रमेण च ॥ षड्दर्शनाभिधा मंत्रा दशविद्याप्रभेदजाः ॥
ते सर्वे चात्र दृष्टव्या ॥ अतन्याकेवनपि येजन्नव्या केपि देवेशि दीक्षायोगेन कारणं ॥ एवं संप्राप्य योगेहि शिवरूपो भवन्नरः ॥ च
क्षुष्मती वाग्मती च स्पर्शानवो महेश्वरि ॥ वर्णादिदीक्षा क्रियादीक्षा तथैव च कलावती ॥ पञ्चकायतनी चैव तथा वेदमयी शिवे ॥ वे
धः पञ्चविधो देवि पूर्वमेव प्रकाशिता ॥ पूर्णदीक्षा महेशानि ऊर्द्ध्वाम्नायमयी तथा ॥ निर्वाणदीक्षा देवेशि तथाम्नायभेदजा ॥ वेदवाण
पशुपतिक्रमे योगेनैव कुहे ॥ मेधासाम्राज्यमेधा च दिव्यसाम्राज्यरूपिणी ॥ एतच्छक्ते केवलं तु संक्षेपेण प्रकाशिता ॥ चक्षुष्मत्यादिरु
द्रान्त काश्मीरी परिकीर्त्तिता ॥ चक्षुष्मत्यादि पूर्णान्ता गौडदीक्षा प्रकीर्त्तिता ॥ वाशिष्ठ तत्वाष्ठ सिद्धिश्च क्रमेणापि प्रकीर्त्तिता ॥ महाकालाकलातारं ॥
ध्रुवाणातत्वादि पायपुक् ॥ दशाङ्गाष्टांग्रपञ्चांग पूर्वमेव मयीरितं ॥ तृतीयाचलखण्डे देवेशि सर्वमेतत्प्रकीर्त्तितं ॥ मनोरथमयी सिद्धिसा

ग्राङ्गे धाधिधौ भवेत ॥ अथ गोषणा वन्यस्तु·कस्मात्सन्नद्विन्यसेत ॥ तेषु शक्तीः समावाह्य·सम्पूज्यैवाभिषेचयं ॥ एकं वा कलशं जन्म
दिनक्षे त्वाभिषेचयेत ॥ नात्रैरत्नैर्विभूरित्याभिः कालानित्यात्तु विशया ॥ आधारे हृदये शीर्षे·वक्त्रे सूर्यनिशाकरौ ॥ ध्यायेत्त्रिरस्त्रं प्र
जपे·त्सर्वगतास्त्र न त्वरं ॥ न्यसेत्तु मातृकास्थाने·तथात्तदेह सिद्धये ॥ अहर्णां वैपरीत्येषु·जन्मर्क्षे ग्रहणादयो ॥ कुकृपापैरी एकेको·
कुर्यादेवाभिषेचनं ॥ तेन दोषाः प्रशान्त्येन·न्न कदाचिन्न तत्फलात ॥ अशुभाणि च कर्म्माणि कृत्वाप्सीर पुजल्पितां ॥ चलं कथं भवे
दस्य सोकस्य परमेश्वरि ॥ ब्रूहि मे तत्फलं येनं·छेदनान्यं त्वघोषनः ॥ सोमसूर्याग्निरूपेणा·जलेन पर्शयोगतः ॥ न रूपन्ने घोषदोषा
स्तु·तस्मात्सेकसमो नहि ॥ सोमसूर्याग्निरूपत्वं·जलस्य परिकीर्त्तितं ॥ तस्मादशेषदुःखानां·शान्तिस्यादभिषेचनं ॥ सप्तसु क्षेत्रेषु का
लेषु·पुराणश्रवणेषु चादरात ॥ कुर्यात्तदक्षिणां पूजां गुरो प्रत्यन्दमेव च ॥ उक्तेषु पातजातेषु·पूजयेत्स्वर्णपुष्पकैः ॥ अभिषिक्तस्तु
विधिना प्रदद्यान्दक्षिणां गुरोः·गुरुस्तन्न दद्यतः प्राप्न·विघ्नन्दत्तु जन्तुथा ॥ गुरोर्गुरुं तत्पुत्रं त्यागतोऽलब्धविश्वकान ॥ प्रणामपूजाप्र
वचन·सेवादिभिरुपासनै ॥ तोषयेदन्यथा शक्तिः स्वीयात्तत्क्षमिनी भवेत ॥ चन्द्र चन्दन काश्मीर·लघुकस्तूरिकायुतैः ॥ पंकैर्विद

ध्यात्मसर्वेत्रगुणेपादद्वयंशिवे ॥ प्रतिवर्षमहेशानिकुर्याद्देवाभिषेचनं ॥ पूर्णाभिषेकजुक्ताहिऊर्द्धाम्नायादिचाकरं ॥ गुह्यंज्ञाणमहेशानि·
तद्दीक्षायैपतेत्सदा ॥ इतिसंक्षेपतःप्रोक्तामेधादीक्षामहेश्वरि ॥ कादिक्रमेमहेशानि·कथ्यतेश्रृणुसाम्प्रतं ॥ सर्वव्यापकरूपश्च·शान्ता
ज्ञानंमहेश्वरि ॥ परंपरात्परांदेवि·तत्त्वदेविविद्धिधामतं ॥ काम्यंहास्यंमहेशानि·कामकालीमतंभवेत् ॥ हास्यंश्रीत्रिपुरास्यंच·कहारंव्यतारि
णीमतं ॥ यकश्चित्मन्त्रजापीतु·तत्रकालीवरप्रदा ॥ भाषाभेदाश्चावेगाणि·मन्त्रमात्रेमहेश्वरि ॥ वरदोनाधिकारोहि·कालिकायाःप्रकी
र्त्तिता ॥ एतत्कथाविस्तरस्तु·कादिहादिविनिर्णये ॥ पूर्वविस्तरतोदेवि·मयातेपरिकीर्त्तिता ॥ उभयत्रभवेन्मेधा·भेदःपारायणोक्तवित्
॥ कादौस्पष्टमनिन्देवि·तथाचिन्तामणिप्रिये ॥ सिद्धकालीमहाविद्याराज्ञीकामकलानता ॥ हंसकाली·गुह्यकाली·वदेयंपारसक्रमात्
॥ शाम्भवंपरमेशानिक्रमान्मेधाप्रकीर्त्तिता ॥ उभयेक्रमतोदेवि·साम्राज्ञेधाप्रकीर्त्तिता ॥ नाडीपारायणंनाम·मन्त्रपारायणंतथा ॥ चक्र
पारायणान्देवि ॥ पूर्णार्द्धाम्नायपटंवच ॥ चरणास्तुपंचरणा·तथाषट्शाम्भवंशिवे ॥ मेधासाम्राज्यमेधाच्च·क्रमेणपरमेश्वरी ॥ तन्त्रश्चजन्म
विद्यादि·वर्षादेशाज्ञेजागके ॥ कालनित्याकालचक्रस्तुभयत्रसमंभवेत् ॥ तद्रूपोक्तशिवःप्रोक्तःसाक्षात्परशिवोभवेत् ॥ शिवदेवीवरे

आराध्य· तथा चानन्दभैरवः ॥ केरलश्चैव काश्मीरी· गौडश्चैतन्त्रयो गोत्रिवे ॥ इत्येवं तु निगदितं· संप्रदायचतुष्कटं ॥ आज्ञानाम योगषट्कं क्रमेन
दापयेद्गुरुः ॥ एवभूतः सर्वगन्ता· पूर्वोक्तनिर्णयो ह्यहं ॥ कार्पासिके पंचवर्णं· चंडभेदत्रयं भवेत् ॥ त्रापस्तु वेत्रपन्देवि· कौले चाष्टप्रकीर्त्तितं ॥ गौरपश्च
महेशानि· चैत्नवेदश्चपार्वति ॥ नारापाष्ठो महेशानि वीचेशातह्यं भवेत् ॥ कौले पंच महेशानि· वह्निवेदश्चपार्वति ॥ कौलानां श्च तमात्रकं ॥ दश्चपास्तु
पतेत्प्रोक्ता सुरुणी त्रिंशात्महेश्वरि ॥ केरलश्चैव काश्मीर· गौडभेदेन· पार्वति ॥ केरले भावनाप्रोक्ता काश्मीरे चानुकल्पनं ॥ गौडे प्रत्यक्षदानञ्च· चक्राणि दश
न्देवि· षट्पञ्चाशि मतेशिव ॥ सुप्तोग्र केरले देवि· शुद्धकेरलकन्तथा ॥ तद्वद्यभानो देवि· सर्वान्ते परीकीर्त्तिता ॥ आराध्य कलहा द्वैव ॥ पुष्य चक्रीं तथैव च
॥ जीव चक्री महेशानि संप्रदायान्तरं शृणु ॥ दुत्वावतार पूर्वत्वं चैतन्य तदनन्तरं ॥ ब्रह्मादि पद पूर्वत्वं· पश्चाशादीश्वरान्तकं ॥ पश्चाशादीश्वरायंत्वं चै
तन्यान्तं महेश्वरि ॥ पंचाशत्के शवान्तं च· गणापायन्तथैव च ॥ त्रिपुराग्रं महेशानि कामाख्यं परमेश्वरि रत्याज्येवा महेशानि· छिन्नायायास्तु विशेष
तः ॥ दाकिन्याश्चन्तथा देवि· भैरवाघश्च वा भवेत् ॥ नरसिंहाघश्चैतन्यं· किम्वादेशपरंपरा ॥ कलहहस्ता ततापी· गोमुखी वल्लभस्तथा ॥ विज्ञा
नी· तथैव सिद्धिदीसिता ॥ विद्याराज्ञ्च विराज्ञी मीमांसा प्राज्ञराडलमेव च ॥ इत्येते देश परंपराता· महासिद्धाप्रयोगजा ॥ संप्रदायैर्विहीनानां क्

लक्षाद्व्रयोजनात् ॥ सर्वगोहितं स्तुक्ता·भैरवाख्यप्रकीर्त्तितः । विदुवाह्यो यथाप्रोक्तःस्तथैवायं प्रकीर्त्तितः ॥ एतद्देशपरंपाता·स्त्वन्यानश्रृणु
हि पार्वति ॥ तारावती भोगवती· तथैव विमलावती ॥ पद्मावती मधुमती । तथा प्रज्ञावती तथा ॥ ऊर्ध्वनाम्नावती देवी· एते चाष्टतभेदजा ॥ स्मृनुग्रह
स्त्वन्ये तन्त्र· स्तथैव निग्रहानि च ॥ निग्रहानुग्रहाख्यश्च राजं चैतन्त्रमेव च ॥ कला चैतन्त्रनामा च· श्री चैतन्त्रस्तथा शिवे ॥ दिव्यं चैतन्त्रकोदेवि· तथा
प्रज्ञानवाचकः ॥ शास्त्रवाख्यस्तु चैतन्त्र· विज्ञानाख्यस्तथैव च ॥ पारा चैतन्त्रनामाख्यस्त्वात्म चैतन्त्रमेव च ॥ वैराज्याख्यश्च तन्त्रश्च श्री क्षेतन्त्र
स्तथैव च ॥ प्रज्ञा चैतन्त्रनामाख्यः प्रसादाख्यस्तथैव च ॥ निर्वाणाख्यस्तु चैतन्त्र मेधा चैतन्त्रमेव च ॥ अथ शास्त्र चैतन्त्रः श्री चैतन्त्रस्तथैव च
॥ विद्या चैतन्त्रनामाख्यः सिद्ध चैतन्त्रमेव च ॥ एते काश्मीरमार्गस्था त्रिपुरा कादिभेदतः ॥ कुवारो दिव्यवारो·मायादेवस्तथा शिवे ॥ कामाख्या चैवका
श्रीशो·वलवारस्तथैव परः ॥ राजवारः सिद्धवारो विश्वरूपस्तथापरः ॥ उन्मत्तभैरवाख्यस्तु वाक्शक्तिः कार्यसिद्धियुक् ॥ भूतभैरवनामाख्यो·मूर्त्ति
स्थितश्च विग्रहः ॥ विराड्भैरवनामाख्यो मूर्त्तिचालनवाक्यपरः ॥ स्वाराड्भैरवनामाख्यो वांछावाकसिद्धिगोचरः ॥ सम्राड्भैरवनामाख्यः सर्वरूपत्वसिद्ध
येत ॥ श्रीमहदकनामाख्यं आपातु ग्रहस्त्रोत्करौ ॥ सर्वज्ञ सर्वरूपत्वमानन्दभैरवे भवेत ॥ अमिताङ्गो वाकृच्छ्रे तथैवाङ्गनपुर्कशिवे ॥ फुफुभेदे

कल्पनाख्यो सिद्धिर्गुप्तिस्तथैव च ॥ परकायप्रवेशाश्च गतचारीश्चखाडभैरव ॥ अन्यथासंस्थिकाराणां क्रोधाख्यसंप्रदायके ॥ एव ज्ञानमहेश्वरि
कपालीभैरवे भवेत ॥ नदीसमुद्रशोषादि भीषणाख्यप्रदायके ॥ एते भेदा वीरचक्रे केरले शृणु पार्वति ॥ दिव्यबोधमन्दनाथं कलानाथं
चवाचक ॥ केवलनन्दनामाख्य केवलान्नाथवाचक ॥ एतन्मिश्रितयन्देवि क्रमेणायोज्यतां शिव ॥ मानवाख्यस्वपान्तो हि सिद्धचैतन्यवक्ति
युक ॥ दिव्यचैतन्यगुणाणुकादिव्यज्ञानमेव च ॥ गुणाणुकपरमेश्वानि नाथनन्दक्रमेण च ॥ नन्दनाथो महेश्वानि मिलित्वा वाणासंख्यक ॥ चैतन्या
न्तो विलासाख्यो वाणासख्या प्रवाचक ॥ सिद्धचैतन्यनामानु पंचधा पूर्ववत्प्रिये ॥ सत्याद्याश्च विलासान्तो वाणासंख्याप्रवाचक ॥ सिद्धाद्यश्च
विलासान्ते वाणासंख्याप्रवाचक ॥ चैतन्यान्ता विलासान्ता वाणासंख्याप्रवाचक ॥ सिद्धप्रज्ञो महेश्वानि वाणासंख्याप्रवाचक ॥ सिद्धप्रज्ञो महेश्वानि
वाणासंख्याप्रवाचक ॥ सप्नप्रज्ञो महेश्वानि वाणासंज्ञाप्रवाचक ॥ सत्याद्यर्षि विलासान्तो वाणासंख्याप्रवाच ॥ ऋषिश्चैतन्यनामाख्यो वाणासं
ख्या प्रवाचक ॥ अणिमाद्यष्ट पूर्वत्वमेतदन्तम्महेश्वरि ॥ चत्वारिंशान्प्रभेदाश्च मातृकाक्रमतोपि च ॥ चत्वारिंशत्प्रभेदाश्च क्रमेण परमेश्वरि ॐ
यत्रयं हैतमध्यं तदन्ते तु सारस्वती ॥ ह्रीं भवत्रयं मध्यपूर्वं सारस्वत्यन्तगं शिवे ॥ वाणा मेधा मध्यपूर्वं तदन्ते च सारस्वती ॥ एवं क्रमेणादेवेशि दश्यभेदाः प्र

कीर्त्तिता ॥ चिन्मेधा चैव चित्सञ्ज्ञा श्रीनाथश्च तदन्ततः ॥ संप्रदायत्रयन्देवि वाराणसंख्याप्रवाचकं ॥ सारस्वतपदं पूर्वं ॥ तदन्ते सुन्दरी शिवे ॥ निग्रहाख्यं
पदं पूर्वं तदन्ते तु सारस्वती ॥ सुन्दर्यन्तं च सिद्धाख्यं सापानुग्रहकादिकं ॥ सुन्दर्यन्तं महेशानि कालाख्यश्च सरस्वती ॥ साम्राज्याख्यम्महेशानि त-
दन्ते तु सरस्वती ॥ सोभाग्याख्यम्महेशानि तदन्ते तु सरस्वती देवी परम्परा पातु संक्षेपेण प्रकाशितं ॥ दिव्याख्यं श्रीविलासाख्यं वाराणसंख्याप्र-
वाचकं ॥ दिव्याख्यश्च महाप्राज्ञो वाराणसंख्याप्रवाचकं ॥ साम्राट् स्वराट् ॥ स्वस्वाराज्य ॥ मधिराज्यश्चाराज्यकं ॥ महाराज्यं पारमेष्ठ्यं माधिपत्यन्त-
थैव च ॥ सार्वभौमश्च क्रवर्त्ती साकानन्दस्तथैव च ॥ ब्रह्मानन्दश्चिदानन्दः पूर्णानन्दस्तथैव च ॥ महासमरसानन्दो महानन्दस्तथैव च ॥ वारा-
क्रमेणादेवि शिवभेदानान्नवतिर्भवेत ॥ वटुकस्य मते प्रोक्तं नामानि सूर्य्यचितानि च ॥ निरुक्तिश्च महेशानि दीक्षाभेदान्तरं शिवे ॥ कथ्यते पर-
मेशानि किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीमदक्षोभ्यमहोग्रसंवादे नामविवरणं नाम षष्ठः पटलः ॥ ६ ॥ देव्युवाच ॥ हादिकादिक्रमेणै-
व संप्रदायत्रयं शिवे ॥ कथयस्व महादेव यद्यहं तव वल्लभा ॥ ॥ शिव उवाच ॥ सूचिता परिभाषा च विस्तरः कथ्यते शृणु ॥ मेधादीक्षापु-
टा देवि केरलः परिकीर्त्तिता ॥ षट्शांभवप्रश्नयुतस्तत्त्र्याष्टाष्टकान्विता ॥ शृंकेरली महेशानि श्रीपाः केरली तथा ॥ श्रीसामकेरली देवि तथा

चार्थर्वकेरली । अथर्वे वहवो भेदा दिव्यासिद्धादिमानवे ॥ आनन्दभैरवशिवाः दक्षिणामूर्तिरेव च ॥ देवीचनवनाथश्च सिद्धभेदक्रमेण च श्री
यत्रपेमहाशान्तिशिवशक्तिक्रमेन च ॥ सतसपेलीपनाख्याया पराषोडशीक्रमेणाच ॥ मत्या चरणौर्द्धवि ॥ वामवास्यादशक्रमात् ॥ तदोत्थक्रमयोः
गेन मनुलोमक्रमेण च ॥ अगान्तिदुर्गा च वाडिशास्त्रप्रावर्तीक्रमेण च ॥ महाविद्यादिक्रमेण तदोद्यक्रमभेदतः ॥ अथर्वकेरले भेदाः आज्ञावे
ति प्रकीर्त्तिता ॥ शैववैष्णवसौराणां गाणवौद्धे तु भिद्यते ॥ दक्षहस्तेन पूजायां वामेन तर्पणं भवेत् ॥ तर्पणं च तथा पानं दक्षेणापि कीर्त्तितं वामेन
पूजने दिव्यक्रमेण परिकीर्त्तितं जलं दुग्धं नष्टदुग्धं संविज्ञसुर्वदातथा ॥ अन्तकाम्यरसे देवी दुग्धसाररसं तथैव च ॥ कुमारीपूजनं देवि विपरीभाषा
तु केरले ॥ परमेश्वरसपर्यादितं रूपत्वसदा भवेत् ॥ अन्यत्कर्माणि देवेशि प्रबलित्सनस्यवेन च ॥ तद्धस्तनिरतजन्मसु काम्यपेश्वराद्भवेत् ॥ पर
कायप्रवेशं च चराचरपुरीगतिः वशस्थैर्यमथाकर्षः सर्वस्थावरजंगमे ॥ खलागडगोलकेण च पाकाविज्ञगतीतले ॥ करामलकवद्देवि
साधकस्य भवेद्ध्रुवं ॥ कादिहादिमते देवि फलमेतत्कोहिपि च ॥ काश्मीरं संप्रवक्ष्यामि शृणु पार्वति सादरं ॥ ऊर्द्धाम्नायादिभिर्युक्तः ॥ काश्मी
रीशक्तिपातयुक् ॥ अष्टाष्टकसमायुक्तः काश्मीरतन्त्रसिद्धियुक् ॥ सूक्ष्मकाश्मीरीयजुश्चैव सामकाश्मीरमेव च ॥ अथार्थर्वणकाश्मीरी दिव्यसि

॥आ.त्र॥
॥३५॥

द्धादिसानवैः ॥ दक्षिणामूर्त्तिभेदेन-तथा भैरवभेदतः ॥ देवीसदाशिवश्चैव-नवनाथक्रमेण च ॥ चतुराशीतिसिद्धैश्च-दिव्यौघोघशिवादि-
तः ॥ शैवशाक्तेतसपलोपो-षोडश्रीतत्पराक्रमात् ॥ चतुराम्नाययोगेन-मन्त्रागाणिक्रमेण च ॥ लोपादुर्गा च चंडश्री-तथा स्वप्नावतीश्च
मातः ॥ दुर्गाविद्या च योगेन-काश्मीरभेदभाजनं ॥ शैववैष्णवगाणपे-बौद्धसौरं तु भिन्नतः ॥ वामहस्तेन पूजा च-दक्षेणातर्पणामतं ॥ दक्षि
णापानदेवेशि-शृणु कल्याः प्रकीर्त्तिता ॥ अथ गौडं प्रवक्ष्यामि-यथावदवधारय ॥ पूर्णाभिषेकसंयुक्तः-स्वेष्टगुरुकारमन्वितः ॥ ऋग्गौड
श्च यजुर्गौडः सामगौडस्तृतीयकः ॥ अथर्वगौडो देवेशि-तद्भेदं शृणु पार्वति ॥ दिव्यसिद्धमानवौघ-दक्षिणामूर्त्तिभेदतः ॥ आनन्दभैरवश्चै
व सदाशिवपरंपरा ॥ देवी च नवनाथाश्च सिद्धा वपि महेश्वरि ॥ चितपाथिवशक्तिभ्यां-तल्लोपाक्रमयोगतः ॥ षोडशीमनुलोपा च-तथाग
न्तिक्रमेण च ॥ दुर्गा चंडेश्वरीदेवि-तथा स्वप्नावतीक्रमात् ॥ दुर्गाविद्याश्च भेदेन-तदाकारणभेदतः ॥ अथर्वगौडभेदश्च-शाक्तमार्गप्रकीर्त्ति
तः ॥ शैववैष्णवसौराणा-बौद्धगाणपकौशिवे ॥ भिन्नक्रमो महेशानि-पूजनं वामहस्तेन ॥ तर्पणं दक्षहस्तेन-प्रत्यक्षं पानदानके ॥ महावि
द्यासिद्धविद्या-विद्याभेदेन पार्वति ॥ विद्यारूपं तदा चान्यद्विद्याक्रमयोगतः ॥ चक्रभेदाम्नायभेदा-तदाचरणभेदतः ॥ विद्योपास्यागौडमार्गो

॥राम॥
॥३५॥

द्वितोर्पि क्रमेण यं ॥ शक्तिदेहे महेशानि ब्रह्मांडां सरसाप्रिये ॥ त्रितयेपि भवे मार्गं ॥ नामपारायणं तथा ॥ मंत्रपारायणं देवि नाडीपारायणं शि-
वे ॥ चक्रपारायणं देवि प्रोक्तं हादिमतं शिवे ॥ अथ कादौ महेशानि संप्रदायक्रमं शृणु ॥ मेधादीक्षादिसंयुक्तः श्रीकादिकेरली भवेत् ॥ कादिकेर-
लीराजुश्चैव तथैव सामकेरली पंचपंचकसंयुक्ता ॥ शक्तिपातसमन्विता ॥ षट्शांभवप्रभेदयुतः त्रिकाल्यज्ञानगोचरः ॥ अथर्वकेरले देवीऽष्ट-
गुणयत्नेन संयुतं ॥ दिव्यसिद्धमानवौघमहाकालक्रमेण च ॥ अथानन्दभैरवेन सदाशिवक्रमेण च ॥ देवीक्रमेण देवेशि ॥ नवनाथप्रभेदतः
चतुराशीतिसिद्धैस्तु त्रितयेपि शिवशक्तितः ॥ तल्लोपनात्तत्पराख्या तत्पादुक्रमतोपि च ॥ चतुश्चरणयोगे च शांभवास्पदश्च क्रमात् ॥ तदेवाद्य-
क्रमयोगेन शंभुपादक्रमेण च ॥ दक्षविद्यागुरुत्वेन भद्रावरणयोगतः ॥ श्रीवादिपंचभेदेषु पर्यायक्रमभेदतः ॥ अथागमश्च तथा कालो दक्षा-
म्नायक्रमेण च ॥ दक्षनायतनत्वेन भद्रवाजल्पमीरितं ॥ दक्षेण पूजा वामेन तर्पणं परिकीर्तितं ॥ दक्षेण तर्पणं देवि पानं तेनैव पार्वति ॥ वामेन देव-
तां तर्पयेद्दक्षेण गुरुतर्पणं ॥ केवलं वामहस्तेन द्वयोस्तर्पणमाचरेत् ॥ केवलं दक्षहस्तेन तर्पणं केरलो चरेत् ॥ गुरुसंतर्पणं दक्षेण वामहस्तेन देव-
ता ॥ अस्मिं कौलमते देवि ॥ तर्पणं परिकीर्तितं ॥ जलं दुग्धं नष्टदुग्धं संचितिमिश्रं तथैव च ॥ संविदासवतो चैव वस्तांतक पूरणं तथा ॥ दुग्धसारे दुग्धसंवि-

॥शा॰तं॥
॥२६॥

॥दा सवश्च कुमारिका॥ पूजनं परमेशानि कादिके रलगोचरं॥ ऊर्द्धाम्नायादिसंयुक्ता॰ काश्मीरी शक्तिपातयुक्॥ अकाश्मीरी पशुश्चैवसा
माकाश्मीरस्तथैव च॥ अथाथर्वणाकाश्मीरभेद्यन्तं शृणु पार्वति॥ दिव्यसिद्धमानवौघा॰ महाकालक्रमेण च॥ अतिकालकरालाख्यका
लवीरक्रमेण च॥ कालीच नवनाथश्च चतुराशीतिसिद्धिनः॥ चित्ते यं शिवशक्तिभ्यां॰ तद्विद्या पा कालिकाक्रमात्॥ अथ कामकलाका
लीहंसकालीक्रमेण च॥ शैवादिपंचभेदेन॰ सप्तपर्यायभेदतः॥ भेदं वा कुलमाचार्या॰ ह्यामेननतर्पो गांसर तं॥ दशांगा पूजा संप्रोक्ता॰
शुनुकात्याः प्रकीर्त्तिता॥ अथ गौडं प्रवक्ष्यामि॰ यथायोगक्रमेण च॥ पूर्णाभिषेकसंयुक्तो॰ गौडश्चपंचवर्णचयुक्॥ अगौडो हि पशु
गौडस्तामगौडस्तथैव च॥ अथ गौडे देवेशि॰ यथा वक्ष्यते शृणु॥ दिव्यसिद्धमानवौघ॰ महाकालकरालको॥ वीरनाथस्तथा देवी॰
नवनाथक्रमेण च॥ चतुराशीतिसिद्धाश्चैव चित्ते यं शिवशक्तितः॥ तद्धोपनाभुवेद्धा पा कालीकामकलापरा॥ नेष्ठ यावत्ताराभेदा की
र्त्तिताः परमेश्वरि॥ शैवादिपंचप्रत्यक्षं महाविद्याक्रमेण च॥ सिद्धविद्याक्रमेणैव॥ तथाविद्याक्रमेण च॥ युगानुरूपतो देवि सिद्धवि
द्यादिभेदतः॥ तद्रूपशक्तिक्रमतो॰ तदाचारक्रमेण च॥ युगानुरूपतो देवि सिद्धविद्यादिभेदतः॥ चक्रभावाम्नायभेदैः [illegible]चाराः

॥राम॥
॥२६॥

भेदतः॥ शक्तिपो गजवक्त्रारोः सर्वतत्त्वरसास्फुटं॥ आमपारायणं देवि मंत्रपारायणं तथा॥ नाडीपारायणं देवि कादिहादिके पिच
॥ कादिहादौ ग्रांभवांतः सोन्नामेधाभिधा भवेत॥ दिव्यसाम्राज्यमेधा च केह्मनापीरि कीर्तिता॥ दिनतो वारतो पक्षन्मासा षड्ढिंश
तादिने॥ प्रायश्चित्तं समाचर्य्य कास्तनित्याक्रमेण च॥ पंचनित्याक्रमेणैव स्वगुरुर्वा स्वयं च वा॥ पूर्वोक्तक्रमसामास्य कलारभ्रक
मेन च॥ आमवारायणान्वेन दीक्षामंडपगां भवेत॥ होमं कृत्वा पूर्ववच्च सर्वकार्ये महेश्वरि॥ आज्ञो नामप्रदद्यादेव॥ योगपट्टं समं
भ्यसेत॥ अंगावरणं संयाश्रयं चा शात्यसमंत्रका॥ श्रोतव्याश्चैव मंत्राश्च इष्टव्या परमेश्वरि॥ अन्यत्सर्वपूर्ववत्स्या॥ संक्षेपादिद
मीरितं॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि॥ ॥ इति श्रीमद्दक्षोभ्य महोग्रासंवादे कादिदीक्षाविवरणं नाम सप्तमः प
टलः॥ ७॥ ॥ देव्युवाच॥ देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकं॥ शिव उवाच॥ निरुक्तिं द्रव्यभेदश्च कथ्यते शृणु सांप्रतं॥
वारादिकौलभेदाश्च पूर्वमेव प्रकाशिता॥ विद्ध्य पाशुपतादीनां कथ्यते परमेश्वरि॥ पंचाविंशतंप्राज्ञा पांचरात्रा प्रकीर्तिता॥
दिनपंचकपर्यंतां शैवानां नविलोकनं॥ मुद्रासंधारिणां डाः कृत्वा संपूजयेतिये॥ प्रसादकारणे वस्तुन्ने श्रीकृष्णायेति ये वदन्

॥त्वभुक्तं चैव नैवेद्यं देवतार्थप्रयोजकाः॥ वंचंते वेदमाये च शिवनिंदापरायणाः॥ वेदवानानि तानि नंदंतिः पंचाराश्चाप्सु ते मताः॥
॥पाषंडा रक्तवस्त्राश्राश्राः पाषंडास्ते च कीर्तिताः॥ श्मशानभस्मधारीच भक्ष्मधारणासंचयः॥ स्नानसंध्यादिकं देवि लौकिकार्थं
तु पश्यति॥ विष्णुद्वेषपरो भूत्वा सर्वक्षकुरुते नरः॥ सपाषंडेति कथितः॥ शृणु कापालिकं शिवे॥ कपालपात्रसंभोजी मद्यमां-
से सुतत्परः॥ स्त्रीयोनिदर्शको नित्यं मुंडमालाधरः सदा॥ श्मशानाग्निप्रभोजी यः स च कापालिकः स्मृतः॥ स च द्वादशधा प्रो-
क्तो महाकापालिकः परः॥ स्नानदानादिरहिताः शौचाशौचविवर्जिताः॥ न जपो न तपस्या च न तस्य नियमः क्वचित्॥ ईदृग्विधोभ-
वेच्चातो सकलानिः कलोद्विधा॥ जैनं शृणु महेशानि कुमराडंधरः सदा॥ सदा जीवरक्षपरो भोगी कार्यो हर्तो सरूवहि॥ पदेवतत्तु-
स्व देवि॥ भरतुरेव स्वात्मरूपकं सर्जेन कथितो देवि रूपवोद्धा हृषो मताः॥ कंङ्कारि॥ चक्रादेवि तथा लितपटास्प्रिये॥ तथा रक्तपटा
देवि तथा नीलांबरादयः॥ ह्रहरु हरिरितिख्याताः स्तथान्ये परमेश्वरी॥ अथ हि सकास्तथान्ये च भेदान्संक्षेपतो मताः॥ मुंडादिकारिणो देवि
कथ्यंते शृणु सांप्रतं॥ आत्मरोगं तथा कार्यं आत्मरागं न विनश्यति॥ मुंडं तु आत्मरागो धृत्वा गौरवं नारकं व्रजेत्॥ वेदैस्तु रहितो योहि मनु

ाधारको भवेत्॥ मुद्रयासहितो यो हि न्यासकर्थं ब्राह्मणो भवेत्॥ मुद्राचतुर्विधा देवि चातुर्विध्यं शृणु प्रिये॥ ब्राह्मणो भावयेद्देहं विष्णुभावप्र
मुद्रये॥ क्षत्रियो रक्षयेद्देहं वैश्यो मुद्राः प्रविंचयेत्॥ शूद्राधमादिकानां च तत्तन्मुद्राः प्रकीर्त्तिता॥ अत्यंतं भक्तियुक्तोपि भावयेन्न तु रे॥
खयेत्॥ ब्राह्मणो रेखयन्नापि विवयन्न कदाचन॥ देवीभूत्वा यजेद्देवं नादेवं देवमर्चयेत्॥ तस्माद्विष्णुस्वरूपत्वं स्वस्मिन्भाव्य महेश्व
रि॥ ततो जपं प्रकुर्वीत तस्य सिद्धो भवेन्मनुः॥ एवमेव महेशानि श्रीवादीनां क्रमो भवेत्॥ शंखचक्रांकितो दृष्ट्वा सवेदात्मा न वाचरेत्
॥ त्रिशूलं डमरुं देवि ब्राह्मणो भावयेत्सदा॥ धारयांश्रीवर्त्ति गणपः शिवमुद्रादिधारणां॥ द्विजस्तु वर्ज्जयेद्देवि संक्षेपादिह कीर्त्तितं॥ शाक्ते
रूपासको यस्तु स च शाक्तः प्रकीर्त्तितः॥ वैखानसादिदीक्षायै युक्तो वैष्णव एव च॥ षडध्वशांभवाद्यैस्तु युक्तः शैवः प्रकीर्त्तितः॥ केवलं श्री
वसंपन्नः स्वन्यदेवापनिंदकः॥ वीरशैवेति गदितो ब्राह्मणो वैष्णवं शृणु केवलं विष्णुनिरतः सर्वदेवप्रनिंदकः॥ वीरवैष्णव एस्तूक्तः पा
पभागी नराधमो॥ चंडआपरतो यस्तु स च चंडो महेश्वरि॥ सूर्यासक्तमना यस्तु स सौरः परिकीर्त्तितः॥ ब्रह्मोपासको यस्तु स च स्वायंभु
वो मतः॥ दुर्गावश्याहि संयुक्तः स च दौर्गः प्रकीर्त्तितः॥ वेदमूलाः क्रियाः सर्वाः वेदमूला परा स्मृतिः॥ वेदेनरहितं यत्तु तन्न कुर्याद्द्विजः क्वचि

त वेदमार्गरतो नित्यं ब्राह्मणो भवति ध्रुवं ॥ वेदे न रहितो यस्तु स चण्डालः प्रकीर्त्तितः । स्वस्वधर्म्मं पुरस्कृत्य सर्वकार्ये महेश्वरि ॥ स्वधर्म्मनिर
तो नित्यं सुखमाप्नोति निश्चितं ॥ स्वधर्मरहितो विप्रः सुतहारी द्विजाधमः ॥ तं दृष्ट्वा तु महेशानि प्राजापत्यं समाचरेत ॥ तदभावे महेशानि
प्राजापत्यं समाचरेत ॥ तदभावे महेशानि सचैलजलमाविशेत ॥ तस्मात्सुज्ञादिके देवी ब्राह्मणान्तर्ज्जपेत्सदा ॥ स्वधर्मानुग्रहर्थन्तु·सुज्ञा
प्रोक्ता मया तव । सत्यं सत्यं महेशानि किमन्यच्छ्रोतुमिच्छसि ॥ ॥ श्रीदेव्युवाच ॥ देवेश श्रोतुमिच्छामि विष्णुभेदान्शिवस्य च ॥ वैखानसा
भवेदादौ श्रीराधावल्लभा तथा ॥ गोकुलेशो महेशानि तथा वृन्दावनी भवेत ॥ पाञ्चरात्रः पञ्चमास्या·त्षष्ठः श्रीवीरवैष्णवः ॥ रामानन्दी हरि
व्यासि निंबार्कश्च महेश्वरि ॥ ततो भागवतो देवि दश भेदाः प्रकीर्त्तिताः ॥ शिवी लुंडी जटी चैव दण्डी चिंडी कमेरा च ॥ एकदण्डी महेशानि
वीरशैवस्तथैव च । सप्त पाशुपताः प्रोक्ता दशधा वैष्णवा मताः ॥ एतेषां वासना देवि शृणुष्व यत्नेन शाम्भवि ॥ वेदेषु सर्वसंख्याप्य·यस्तिष्ठति स
वैष्णवः ॥ वैखानसादिदेशान्है भूषितः स्मार्त्तवैष्णवः ॥ श्रीराधावल्लभं देवि शृणु यत्नेन शाङ्करि ॥ वैष्णवाचारनिरतो विष्णु·नैवैकपारगः ॥ अन
न्यचेतसां तान्मा विष्णुचिन्हपरायणाः ॥ श्रीराधावल्लभी देवि·गोकुलेशं शृणु प्रिये ॥ नानाभूषणसंपन्नो·नानाभोगन्ध्वभूषितः ॥ गवां

कुलंश्रीराणापिता । कल्किकृष्णस्वरूपधृक ॥ शरीरमर्थप्राणाश्च तन्निवेदनकारक ॥ अंतःशाक्तिपरो देवि बहिः वैष्णवरूपधृक ॥ गंधर्वाचा
रनिरतो ललावेष्टनतत्पर ॥ संप्रदायो गोकुलेशाः सर्वसिद्धिकरो भुवि ॥ वृंदावनाख्यं देवेशि शृणु यत्नेन सांप्रतं ॥ दिगताशाः प्रसन्ना
त्मा विष्णुभक्तिपरायणाः ॥ कामिनीसंगचपला वनक्रीडाविनोदधृक ॥ सौगन्ध्यभूषिततनुः सद्ध्यानैकपरायणा ॥ विष्णुमारूपस्त
त्वज्ञः प्रोक्ता वृंदावनी शिवे ॥ पांचरात्रो महेशानि तथैव वीरवैष्णवः ॥ पूर्वमेव महेशानि कीर्तितः परमेश्वरि । ताश्चाक्रीरीति विख्याता ॥
सः शिवः परिकीर्तितः ॥ तदानन्दोशान्तचित्ता प्रसन्नात्मा विचारधृक ॥ सर्वत्र समरूपश्च रामानन्दः प्रकीर्तितः ॥ हरिव्यासं महेशानि य
थावदवधारय पापसंहरणासक्तो विष्णुभक्तो जितेन्द्रियः ॥ यमादिनियमैर्युक्तो न्यक्ताचारपरायणा ॥ स्त्वो पजागकत्ला आहिंपरकार्य
परायणा ॥ हरिव्यासो महेशानि शिवशक्तिस्वरूपधृक ॥ निंबार्काख्यं संप्रदायं शृणु यत्नेन सांप्रतं ॥ नित्यार्चनक्रमाशक्तः स्वतंत्रैक
परायणा ॥ बाह्यपूजादिनिरतो नन्यभक्तः प्रसन्नधीः ॥ आर्यपक्षान्वितः स्वच्छस्वच्छंदाचारतत्पर ॥ स्वतंत्रात्मा न विद्वेषी निंबार्को भग
वान्हरिः ॥ अथ भोगवतं देवि कथ्यते शृणु सांप्रतं ॥ विष्णुभक्तैर्वनिपुनोर्विजितात्मा प्रसन्नधीः । स्मार्त्तगवान्वितो देवि तदन्याचारतत

रः॥ आर्यपक्षाच्छिनोदेवितथारुणा॥ वेधश्च॥ श्रौवेदेषीतस्यसंगात्सुनस्त्वानपरायणाः॥ केवलंविष्णुचित्तज्ञःप्रोक्तोभागवतःशिवे॥ ते
षांखनादिकानांतुनिर्णयःकथ्यतेक्रमात्॥ एकादशीसदोपोष्या॥ भक्तियुक्तेनचेतसा॥ एकादश्यामहोरात्रं॥ नभोक्तव्यंकदाचन॥ मु
हूर्त्तविद्धादशमी॥ ततोऽधिकसमागते॥ तस्यांतिथौनभोक्तव्यंदशम्यांभोजनंचरेत्॥ सूर्योदयमभिव्याप्य यातिथिर्यातिपार्वति॥ सातिथि
ःसकलाज्ञेया॥ तन्नित्युन्नासमाचरेत्॥ आग्राह्यावीतितिविख्याता॥ द्वितीयामोहिनीभवेत्॥ द्वाभ्यांतुमुपोष्यैवंसर्वपापैःप्रमुच्यते॥ द्वि
धातिथिर्यदादेवितदेदंपरिकीर्तितं॥ यत्रथेकादशीपूर्णाद्वितीयाक्तिर्नविद्यते॥ द्वितीयेह्नियदादेविद्वादशीयदिदृश्यते॥ द्वितयंसमु
पोष्यैवंसर्वपापैःप्रमुच्यते॥ स्मार्त्तानांमतमाख्यातंवैष्णवानांमतंशृणु॥ एकादश्यांतुयः॥ कश्चित्प्रमादाद्भोजनंचरेत्॥ चत्वारितस्य
नश्यंतिआयुर्विद्यायशोबलं॥ कोट्यर्वुदंरांनिवसेद्घोरवेनरकेप्रिये॥ गोकुलेश्राममंदेविकथ्यतेशृणुसांप्रतं॥ स्मार्त्तवैष्णवयोर्म
ध्येविवादोहिमहानयं॥ परस्परंप्रशंसंतिनिंदंतिचपरस्परं॥ नमूढानेवजानंतिपाखंडआत्ममोहिताः॥ विष्णुरूपधरःशंभुःशंभुरूपध
रोहरिः॥ अत्रार्थेप्रतपादेविरुद्रा एकादशीस्मृता॥ विष्णुर्मिलित्वादेवेशि॥ द्वादशीपरिकीर्तिता॥ एकादशीतुरुद्रस्य द्वादशीभी

पतेः स्मृताः ॥ कलामात्रापि तं दृष्ट्वा मुहूर्त्तं संयुतापि वेत् ॥ गोकुलेशमतं प्रोक्तं गोपालसुंदरीपरः ॥ पुराणमेकादशीप्राप्य द्वादश्यां स-
मुपोषणं ॥ स्मार्त्तद्वेषपरो भूत्वा प्रमादाद्यः समाचरेत् ॥ एकादशीहानिदा स्या ॥ त्वायुर्धननाशिनी ॥ स्मार्त्तद्वेषपरो भूत्वा त्वेकादश्यां ॥
तु भोजनं ॥ पाखंडमतमाश्रित्य देवेशि यः करोति नराधमः ॥ कोट्यर्बुदयुगं देवि नरके निवसेध्रुवं ॥ विष्णुद्वेषपरो भूत्वा रोहिण्यां भोजनं ॥
चरेत् ॥ सदरिद्री महापापा नरयपातो भविष्यति ॥ अरुणोदयवेधस्तु श्रीनिंबार्कमते मतः ॥ सूर्योदयात्तु वेधो हि श्रीविष्णुन स्वसंमतः ॥ कला-
वेधो महेशानि वैष्णवानां प्रकीर्त्तितः ॥ मुहूर्त्तवेधो देवेशि स्मार्त्तानां परिकीर्त्तितः ॥ अथ च पांचरात्राणां माध्यपक्षः प्रकीर्त्तितः ॥ कलि-
तं वेधमाश्रित्य द्वादशीं कल्पयंति च ॥ भलज्ञांति च ते मूढाः प्रोक्तास्ते यमकिंकराः ॥ पुरंध्रेसहितादेवि तथा षट्शांभवं शिवे ॥ गोपालपां-
चरात्रं च षडध्वयमतं तथा ॥ श्रीगोपीपरिशिष्टं च मोहश्च [illegible]श्वरस्तथा ॥ षट्शांभवरहस्यं च क्रमादिते प्रकीर्त्तिताः स तद्ग्रंथे क्रमाद्वि ॥
विवेचनमुदीरितं ॥ अथ पाशुपतानां च वासनां शृणु पार्वति ॥ शिखी पाशुपतो देवि शिवामुद्राधरः शुभः ॥ समाधितत्परो देवि समाधौ स्थित व ॥
पीठध्वक ॥ रुद्राक्षश्च तथा भस्मलिंगं शैवाभिवंशिते ॥ वासनात्माशोनचित्तब्रह्मचारी प्रकीर्त्तिता ॥ मंत्रं श्रीविन्दुमालिन्याः समाश्रीतपद्धतिष्ठि

तं ॥ मुंडाविंशद्विधो देवि नानागमस्ने प्रकाशितं ॥ तत्र पाशुपताचारसंयुक्तो मुंडितो भवेत् ॥ जटी पाशुपतो देवि सापि द्दशविधः स्मृतं ॥ त्रि
जटैकजटाधारी तथा बहुजटाधरः ॥ नग्नतन्न पर्श्वोज्ञानात्मादेशाक्षेथ परापरा ॥ कर्मचिंतयसंपन्नो जटीपाशुपतः स्मृतः ॥ द्विदंडी तु
महेशानि ॥ वाक्यनेदंडसंयुतः ॥ वाग्यवाक्यनसोदंड त्रिदंडी परिकीर्तितः ॥ धीरशैवत्रिशिखोत्र पूर्वमेव प्रकाशितं ॥ सर्वोत्तमो भव
च्छैवः शांभवो द्वौ प्रकथ्यते ॥ चतुर्दशीव्रतासक्तः प्रदोषव्रततत्परः ॥ शनिप्रदोषे देवेशि मासव्रतपरापरा ॥ दारिद्र्यदहने नामव्र
तमेतत्प्रकीर्तितं ॥ कृष्णपक्षे विशेषेण शुक्लपक्षेपि पार्वति ॥ अष्टमी सप्तमी संधौ प्रदोषव्रतमीरितं ॥ एतद्व्रतसमायुक्तः शिवपू
जापरापरा ॥ शनिप्रदोषे संप्राप्ते अर्कनेत्री भस्मप्रिये ॥ शनिवारे सोमवारे पुत्रकं चाभिमंत्रयेत् ॥ आदित्यवासरे देवि त्राशिक्ष्म
ममिताचरेत् ॥ पत्रार्द्धे श्रीयते देवि सञ्चाध्याये प्रकीर्तितं ॥ द्वितीयाह्वाकोदे विनरतोय शोकसंख्यता ॥ दक्षाकाक्षाभतो देवि सर्वा
भ्यविनियोजनं ॥ कुमारीप्रार्थयत्नेन सप्रपकसंयुतं ॥ स्थापयेज्जाशिमध्ये तु चंद्रपीठे द्रव्यसन्निभे ॥ गामयेद्ध्यर्पयेत्तु ॥ भूमोत्व
त्निकमण्डले ॥ कुमारीपूजयित्वा तु नचकन्याद्रभेदतः ॥ तत्र कन्या जयत्नेन भूतभव्यं भविष्यति ॥ शुभाशुभादि वक्तुं मन्तथापकर्म

त्रिविधं प्रोक्तं यथावदवधारयेत् ॥ वश्याकर्षस्तंभनं च विद्वेषोच्चाटनन्तथा । मारणं चेति देवेशि विरूपाक्षस्य सम्मतं ॥ वेदरूपा स्तंभन
सम्मोहान्मारणोच्चाटनन्तथा द्वेषणाश्चेति देवेशि षड्कर्म्माणि त्रिधाञ्जते ॥ शान्तिस्तंभौ वशीकारो· मारणोच्चाटनन्तथा द्वेषणाश्चेति
देवेशि· षड्कर्म्माणि यथाक्रमात् ॥ मरणाविद्याविधौ देवि यत्कर्म परिकीर्त्तितं ॥ तत्कर्म्माणि समारभ्य· षड्कर्म्माणि जपुः प्रिये ॥ वगलेशी
यथावद्रूपा· वगलस्तंभने यथा ॥ द्वेषे पंचदशी प्रोक्ता· वशीकारस्त्रिधा भवेत् ॥ आदौ श्रीनि महेशानि· मोहनन्तु द्वितीयकं ॥ वशीकार
स्तृतीयस्यान्त्रितयस्त्रितयं प्रिये ॥ एके जाते महेशानि त्रितयं जायते शिवे ॥ शान्तिप्रदोषसमापिता· स्थाने शैवैर्विभूषिते ॥ पश्चिमाभि
मुखं लिंगं· नन्दिहीनं पुरातनं ॥ चतुरः पञ्चकोशान्ते नलिङ्गं दृश्यते शिवे ॥ तदेकलिंगमारभ्यातं· तत्रसिद्धिरनुत्तमा ॥ रुद्रपुराद त्रि
पुण्ड्रम्बा· पदवन्धनमेव च ॥ श्वगास्तिपत्राकारम्वा· श्रीराणां सुप्रकेरोणव ॥ द्वादशाष्टु चतुर्योगा· ऊर्द्धपुण्ड्रं प्रकीर्त्तितं ॥ शिवविष्णुशि
वशक्तं त्रिपुराद्युं परमेश्वरि ॥ शान्तिप्रदोषे धृत्वा तु· शिवं पूज्य प्रयत्नतः ॥ मोक्षगेहा स्मरणान्देवि· अकाराडादि समीरितं ॥ गोपनीयं रहस्यं
च किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीमदक्षोभ्यमहोग्रासम्वादे शक्तिसंगमतन्त्रराजे प्रदोषविधिर्नामाष्टमः पटलः ॥ ८ ॥ ॥ श्रीदेव्यु

वाच ॥ देवेशश्रोतुमिच्छामि रहस्यातिरहस्यकं पूजाद्रव्यं महादेव संप्रदायत्रयं वद ॥ षड्दर्शन षडाम्नाये महाविद्याविधौ शिवे ॥
पंचायतनके देवि शिवशक्तियुतेपि च ॥ अथ गोपालनृहरी रा गणेशार्कास्तथा ॥ हयग्रीवो राम चन्द्र काल काली महेश्वरि ॥ नामग
णपतिश्चैव तारा वटुकस्तच ॥ आम्नायतत्क्रमयोगेन द्विधा भेदः प्रकीर्तिता ॥ एतेषां सुन्दरी यो भान्न वश्यत्तु महेश्वरि ॥ मूलयन्त्रस
मुद्धृत्य तत्र विन्द्ये महेश्वरि ॥ देवयन्त्रं सागकं तु भागे यतमानसः विद्यायन्त्रो यन्त्रो यथा पूज्यो देवयन्त्रो यथा पुनः ॥ पूजनीयाम
हेशानि गोपालसुन्दरी परा ॥ पूर्वोक्तानां समस्तानां पूजायन्त्रं प्रकीर्तितं ॥ एवमेव तु सर्वेषां कथितं तु तृतीयके ॥ आदौ यदु
द्धृतं देवि तद्यन्त्रं पूजयेत्सुरं ॥ शक्तिर्वा शिवमन्त्रो वा यस्य चोच्चारतां भवेत् ॥ तस्य यन्त्रं पूजयेत्तु संक्षेपादुदितं मया ॥ विरूपाक्ष
मते तारे यन्त्रयन्त्रं तु संलिखेत् ॥ सुन्दरी भैरवी देवि तथैव कालसुन्दरी ॥ सुंदरी कालरूपस्थैः सुन्दरीणां पदत्यपि ॥ इति संक्षेपतः
प्रोक्तः जन्मभेदं शृणु प्रिये ॥ केरलश्चैव काश्मीर गौडश्चैव तृतीयके ॥ शिवशक्तितद्रूपत्वं सप्तपर्यायभेदतः ॥ चतुराशीतिसंख्येन
नाथानितरमार्जितः ॥ ओघत्रयक्रमेणैव वदवासिक्रमेण च ॥ दिव्याविद्यागुरुत्वेन भेदबाहुल्यमीरितं ॥ उर्ध्वं च्चाककन्दीविसृज्य सान्तु

तृतीयकं ॥ दुग्धसारः कुमारीञ्च पंचतत्वानि तैजसु ॥ आत्मतत्वाशिवाख्यानि सर्व्वं पूर्णाक्रमेन च ॥ काश्मीरे त्वनुकल्पेश्च ताम्रगव्यं प्रदा
पयेत् ॥ पिराणकस्तु द्वितीयञ्च गरजनं तु तृतीयकं ॥ चतुर्थपारसं दुग्धं पंचमं मिथुनं भवेत् ॥ पश्चादनुकल्पादेवेशि काश्मीराख्यक्र
मेमता ॥ मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ॥ मकाराः पञ्चवै ख्याता गौडमार्गे महेश्वरि ॥ सामान्यत्वेन कथितं विशेषं शृणु सा
दरं ॥ दुग्धानुकल्पमध्येश्च शृणु यात्रमात् ॥ दुग्धेन केरले पूजा काश्मीरे भावना मता ॥ गौडे प्रत्यक्षदानं स्यात् तृतीयं कीर्त्तितं मया ॥ ज
लं दृष्ट्वा तु गान्धे विशीतलजलमीरितं ॥ ततः शतगुणं प्रोक्तं दधि चाम्ब महेश्वरि ॥ ततः शतगुणं दुग्धं ततः शतगुणं घृतं ॥ घृताच्छत
गुणं तैलं तैलाच्छतगुणं मधु ॥ ततः शतगुणं संविन्नतः शतगुणं मधु ॥ अत्र गन्तृगतो गौडे केरलेस हृदिक्रमात ॥ शुद्धकेरलमार्गे तु ज
लेन पूजनं चरेत् ॥ चैतन्यकेरले देवि शीतलेन जलेन च ॥ अष्टकेरलमहेशानि सोगन्धिजलताद्भुतं गुप्तकेरलमार्गे तु दुग्धेन पूजनं चरे
त् उग्रकेरलमार्गे तु नष्टदुग्धेन पूजनं ॥ पञ्चकं गदितं देवि शृणु तो भैरवादिवा ॥ पञ्चके विनयं देवि विद्वितपश्चित यत्रिए ॥ शुद्धकाश्मीरमार्गे
तु द्रव्यस्य भावना मता ॥ अष्टकाश्मीरे नरङ्गजलं सुधाख्ये ह्यनुकल्पनं ॥ क्रूरकाश्मीरमार्गे तु नष्टद्रव्यानुकल्पनं ॥ गुप्तकाश्मीरमार्गे तु गुडा

॥ शा.तं ॥
॥ ४७ ॥

र्कारसः स्मृतः ॥ अथर्वाख्ये तु काश्मीरे ॥ ताम्रपात्रे मधुस्मृतः ॥ काश्मीरकथितो देवि गौडमार्गे शृणु प्रिये ॥ शुक्लगौडमहे शान्ति विजया
दुग्धमीरितं ॥ कृष्णगौडे तु महाशान्ति विजया मधु संस्तुतः ॥ रक्तगौडे महाशान्ति तस्या कोटिविनिवेशिता ॥ धूम्रगौडे महाशान्ति तत्कल्प परि-
कीर्त्तितः ॥ उग्रगौडे महाशान्ति मदिरा दानमीरितं ॥ देवतार्थं तु संप्रोक्तं नान्यकर्म्मणि गोपयेत् ॥ सर्वासु मिश्रितादेवि शिवि विलाश्चारव्य प्रकी-
र्त्तितः ॥ विलासाख्य संप्रदायस्त्व पर्मा त्ति सदाशिवः ॥ ह्राह्य वाक्यप्रभेदेन कीर्विधर्त्तव्यश्च पार्वति ॥ चातुर्वर्णानुयोगेन योजनीयं श्र-
यत्नतः ॥ ब्राह्मणेन तथा कार्यः ब्राह्मणेन विनश्यति ॥ ब्राह्मणो मदिरां हत्वा ब्राह्मण्यादेव हीयते ॥ बालगान्तु कल्पश्च दत्वा चाण्डाल
लामियात् ॥ मांसभक्षी द्विजो यस्तु वेदवाक्यात्पथास्मृतः ॥ तथैव वेदवाक्याद्धि ॥ स द्विज परिकीर्त्तितः ॥ ॥ श्रीदेव्युवाच ॥ अनुकल्पादि-
कं प्रोक्तं संदेहोस्ति मम प्रभो ॥ पंचामृतादौ देवेशि कथन्तु गव्यादिकल्पना ॥ नास्ते गव्यं मधु सर्वं देव्यापिबेन्न दुष्यति ॥ अतएव महा-
शान्तिहोमे ताम्रपात्रे गृहाते ॥ पूजाद्रव्यं तु सामान्यो गौडकाश्मीरयोः शृणु ॥ घृतं दुग्धं च देवेशि नवनीतं च तत्क्रमे ॥ दधिमाण्डं च वस्तु दु- ॥ राम ॥ ॥ ८२ ॥
ग्धं मधु चैव मधूदका ॥ तैलं गुडाडकेदौव मधुसंविन्न थैव च ॥ दुग्धं सलवनं चैव दधि दुग्धं तथैव च ॥ सर्पि दुग्धं तत्रपाको केवलाति

जगाच्चवा ॥ नारीपत्रं ततफलं च ॥ श्लेष्मादीप्यमथापिवा ॥ नारिकेलोद्भकं कांस्ये ताम्रपात्रं महेश्वरि ॥ आहिफेनाधुजपुष्पं वनजं नाव
जजलं ॥ धुस्तूरबीजं वत्सनाभं तथैव शीतलं जलं ॥ मृत्युभीत्या वत्सनाभं धुस्तूरबीजं विवर्जयेत् ॥ अपादुकाविधौ देवि·मदिरां गौड सम्भते
॥ अरिष्टासवसौवीरादि·भेदेन परमेश्वरि ॥ अस्थिकुन्दादिफेनस्थजातीकोशलवङ्गकं ॥ नदीशीतलनीलैश्च योगिनी यानसुत्तमं ॥ लवणा
ई कपित्थफलं·गोधूममसाममपक्वकं ॥ लशुनं च अनन्दीवि·कासि अम्बिल्वकन्तथा ॥ कपित्थदुग्धकुरं च·तथैव दुग्धपायसं पलाण्डुं गोरक्त
नीकादि दशाकं वारेराभवं ॥ अस्याग्रविद्याविषये इत्यारोपतानि माषकं वीरसाधनकार्ये तु देवी इत्यानिच्चपयेत् ॥ वेदश्रुता क्रिया
सर्वा ब्रह्मणोवेदसंभवं च ॥ प्राणानवस्वगच्छन्तु ब्राह्मणानाम्यपत्सुरान् ॥ नाश्रे मद्यसुराजुलं धृते न वर्जितं यदि ॥ नारिकेलोदकं कांस्ये काश्चि
काकुलासभवा ॥ हार्दं वाह्यप्रभेदेन·पूर्वसिद्धसमे स्मृतं ॥ रतीयेमानामन्त्रं पूर्ववाक्यं कथनास्थिते ॥ शताजपं तथा पूजाड मेदाने महेश्वरि
॥ केरलेभावनाहतावाह्यद्वावैवजपेत्सदा ॥ काश्मीरि वा तं पारसं जपपूजादिकं चरेत् ॥ गौडे यथोक्तविधिना जपं कुर्यान्महेश्वरि त्रि
तयं कथितं देवि रहस्यातिरहस्यकं ॥ अतिसंक्षेपतः प्रोक्तं·किमन्यच्छ्रोतुमिच्छसि ॥ ॥ श्रीदेव्युवाच ॥ देवेश श्रोतुमिच्छामि पूर्वमाश्चिंतितं

न्मयेत॥ तन्मे देवमहादेव· एतदृंतवर्व शुभा॥ ॥श्रीशिवउवाच॥ रहस्यातिरहस्यंच कथ्यते शृणु सांप्रतं॥ मेरुस्तु त्रिविधः प्रोक्तः
स्ममान्यत्वेनपार्वति॥ न्यासमेरुर्यन्त्रमेरुः ग्नि मेरुस्तथैव च॥ प्रत्येकं त्रितयं चैव· वरारणाम्निधिपार्वति॥ न्यासमेरुर्यन्त्रमेरुः
प्रत्येकं त्रिविधो मतः॥ गात्रभ्यन्तरभेदेन· विधिवत्वप्रकीर्त्तितं॥ न्यासमेरुस्त्रिधा देवि· शृणु तत्प्रत्नतः शिवे॥ मेरुप्रस्तारावि
न्यासस्तथा कैलाससंज्ञकः॥ भूपृष्ठस्तारेरत्नी यस्या प्रान्तेरत्वाच्चतुर्विधः॥ यन्त्रमेरुस्तथादौकषड्विधः परिकीर्त्तितं॥ न्यास
तुवाह्यन्यसनं मन्त्रस्तु भावनामता॥ यन्त्रेतु लेखनं चाश्चे· मानसे भावनामता॥ नयमेरुर्योगमेरुर्नादमेरुस्तृतीयकः॥ योगवी
णागुल्ममेरुस्तु तृतीयः परिकीर्त्तित॥ कल्पद्रुमः प्रथमः स्यात्· यश्चैते मारवः स्मृता॥ यक्षिमेरुः पंचधाया —— भ्यंतरतेंद्रशाः॥ मंत्रमेरु
वर्णमेरुः॥ द्वावेतौतारिणीमता॥ वर्णमेरौ तुकाष्ठानि· स्थानभेदेन सप्तति॥ चतुःषष्ठिका॥ यस्मैो वर्णाः सर्वप्रतिष्ठिता॥ म्नन्यसं सूचि
तांद्वैवित्तवाणि मारवः शृणु॥ यक्षिमेरोर्लक्षणानि· शृणु यत्नेन सांप्रतं॥ चत्वारिंशान्नथाद्यो च क्रागुलनिकारयास्थिये॥ भीतिस्थाभेदतु
क्षनां मेरुः॥ प्रोक्तस्त्वयं शिवे॥ षोडशपूर्णमकाव्यु· शतकुप्तानि चन्द्रयुक्॥ चतुःवरसाप्तकानामष्टोत्तरशतंशिवे॥ षष्ट्याभवेत्पदु

ज्ञानं कुंडानि हिमसंयुता॥ मेधादीक्षादियुक्तानां मेरुस्तत्र मयन्त्रोमतः॥ श्रीविद्यायागियुक्तानां मेरुः सकथितो मया॥ श्रीविद्यारहि
तो यस्तु नमेरुः साधनं श्चरेत्॥ श्रीविद्यारहितो यस्तु नाचार्यत्वं स गच्छति॥ पूर्णाभिषेकसंयुक्तः स्वाचार्यः कीर्त्तितो मया॥ कुब्जाम्नायादिसं
युक्ताः द्वितीयपरिकीर्त्तितः॥ पूर्णाभिषेकरहितः स्वाचार्यत्वं करोति यः॥ तस्य नाशङ्करिष्यन्ति योगिनी योगभूषित॥ पूर्णाभिषेकरहितो·
मेरुः स साधनन्नहि॥ क्रमादामोहितो दंभो·न्नमयपातो भविष्यति॥ दुर्भिक्षं राष्ट्रभंगं च·पृथ्वीकम्पादिकं शिवे॥ नश्यन्ति वान्तरं भूता·बाधांत
क्रामगा भवेत्॥ त्रिवर्षेण च मासेतु धूम्रकेतुर्भविष्यति॥ षष्टिनाडीमन्निर्वाण॥ पलानि पंचविंशति॥ अहिकेतुस्ततो भूया·परिकेतु
स्ततुन्नरः॥ घातकेतुस्ततो देवि ततश्चैव ध्वजाभिधः॥ वर्षमात्रेण देवेशि·नक्षत्रं सर्वविनश्यति॥ वेदवाह्या यथा देवि द्विजे वा यस्तथा
मरः॥ कुटुम्बसहस्रं वे सोपि·प्रायश्चित्तेन शुद्ध्यति॥ तस्य संसर्गमात्रेन राज्यन्नश्यति निश्चितं॥ शिशिनो यस्तु कुरुते·तस्य शोभांश्च शृणु प्रिये
॥ अणिमाद्यष्टकं देवि वाक्सिद्धिकमहत्एके॥ षष्टिसिद्धीश्वरो भूत्वा·शिवतुल्यो नरो भवेत्॥ सदेवो धन्यतां याति·प्रसन्ना सर्वदेव
ता॥ पश्चाग्निहादयाणेतु·विशेषं शृणु शाम्भवी॥ आदौ गर्वीक्षितां कार्यं ततो वादीक्षितां भवेत्॥ स्पर्शदीक्षा ततो ज्ञानं·ततो वर्णाम

षीभवेत् ॥ ततः क्रियावतीज्ञेया ततः कलावतीभवेत् ॥ आनंदेतु ततोज्ञेया ततः षड्दर्शनीभवेत् ॥ पञ्चायतनदीक्षास्यात्ततः पीपश्चप
श्चिकाः ॥ ततः पुर्णाभिषेकः स्यात् षडाम्नायः क्रमेणच ॥ एवन्मेधान्नरयुक्तोनशिवरूपवनसंशयः ॥ पञ्चायतनयन्त्रद्वादशा — — वि
धिकारिता ॥ गाणपत्येपासकार्येच पंचायतनदीक्षिता ॥ तैः कार्यंसाधनादेवि पंचाग्निसूर्यसंज्ञको ॥ एकाग्निरपिनन्द्याग्नि धूम्र
पानंमहेश्वरि ॥ जलाकर्षादिवासोहि तैःकार्यःपरमेश्वरि ॥ गाणपत्यमपिसंकार्यंतुर्याश्रमायामहेश्वरि ॥ नान्यत्रकार्यंदेवेशिन्मेरु
संसाधनंशिवे ॥ रहस्यातिरहस्यंच कथ्यते चान्यदेवहि ॥ न्यासयन्त्रकामकलारूपसन्यासनंशिवे ॥ तथाग्निमरुद्वेज्यञ्चाकुरारोपनं
शिवे ॥ पश्चात्कामकरोध्यानं मंकुरारोपनन्तथा ॥ तथाग्निसनादिसंशुद्धि मद्दक्षान्नुम्रपूजनं ॥ मद्यन्त्वकात्वा महेशानि चाधिकारीभव
द्भवं ॥ यान्तु विना यः कुरुते नरपनाशोभविष्यति ॥ ॥श्रीदेव्युवाच ॥ अथवेसर्वजन्तूनां फलंकिम्वेदशाङ्कर ॥ न्यासमेरोः
फलंन्दीविंदेहसिद्ध्यादिकंशिवे ॥ यन्त्रमेरोःफलंदेवि त्रैलोक्यविजयादिकं ॥ अग्निमेरोःफलंदेवि कथ्यते शृणुसाम्प्रतं ॥ त्रैलोक्य
वशाकारित्वं लोकेसंमोहनंशिवे ॥ दृश्यत्वंनिरपेहत्वंच सौरव्यत्वंपरमेश्वरि ॥ इन्द्रियाणांसंयमनं मर्दिनंसंसेवनाभवेत् ॥ अग्निसंस

धनादेवि दारिद्र्यदहनं भवेत् ॥ वैराग्यत्वं वाक्यदुत्वं चिरश्रीविल्वमाप्नुयात् ॥ यद्यत्कामयते कामं तत्तदाप्नोति निश्चितं ॥ नाना चमत्कारकरः ॥ सर्वलोकेषु पूजितः ॥ अग्नौ कृतश्च दत्तं च तात्कालिक फलप्रदः ॥ सदाग्निः सेवनीयः पुरश्चर्यायुतैः नरैः ॥ पुरश्चर्याविहीनस्य नेदं साधनमीरितं ॥ यतस्ते सात्विकामेरुर्यच्चेत्तु राजसी भवेत् ॥ तामसस्तु महामेरुः वह्निसंसेवनाभवेत् ॥ सात्विके न विलम्बेन फलं भवति पार्वति ॥ राजसश्च फलं माये कश्चित्कालेन जायते ॥ तात्कालिक फलं देवि तामसे सर्वथा भवेत् ॥ अधिकाराधिक दीक्षा तथा संस्कारादिकं शिवे ॥ फलादिकं तथा प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीमद्व्योममहेशतारासंवादे शक्तिसंगम तन्त्रे सिद्धमतारहस्ये नवमपटलः ॥ ९ ॥

॥ श्रीदेव्युवाच ॥ देवेश श्रोतुमिच्छामि पूर्वोक्तं च रहस्यकं ॥ ॥ श्रीशिव उवाच ॥ शृणु देवि प्रवक्ष्यामि मे रहस्यं तारनिर्णयं ॥ कथ्यते परमं ज्ञाति मूलमालभ्य पार्वति ॥ एकाग्निस्तु समालभ्य श्रीमिधान्नमहेश्वरि ॥ प्रस्तारः कथ्यते देवि पारंपर्यक्रमेण च ॥ एकाग्निसाधनश्चैदा सूर्यसंज्ञोभिधः स तु ॥ पञ्चाग्निश्च ततो देवि चतुष्कुण्डानि कारयेत् ॥ पञ्चमः सूर्यसंज्ञस्यान्नन्दाग्निं शृणु पार्वति ॥ अष्टौ कुण्डान्यष्टदिक्षु नवमः सूर्यसंज्ञकः ॥ द्वादशाग्निस्ततो देवि कुण्डान्येकादशाक्रमात् ॥ द्वादशाग्निसूर्य

॥ श्या·तं ॥
॥ ४५ ॥

संज्ञं तत्क्रमं शृणु पार्वति ॥ दक्षिणे वेदकुण्डानि प्रत्यक्षुग्राक्षीकि एग्मकं ॥ उत्तरस्यां मेकुकुण्डं प्राक्युतागयत्ययरत्तथा ॥ नेरकुण्ड
निदेवेशि भेदद्वये क्रमेणा च ॥ चत्वारिंशत थाष्टौ चतेषां न्यसनमुच्यते ॥ षट्कोणामादौ कृत्वा तु चाष्टकोणं ततश्चरेत ॥ द्वशानश्च
द्वशानश्च भुवनार्कमेराण्तु ॥ वसवाएग्मं षट्कोणां द्वयाग्रभुसुएग्मकं ॥ रद्रमेहन्ति गदितो मध्यमं शृणु पार्वति ॥ आदौ विन्दु
महेशानि चत्वारश्चिन्तयन्नतः ॥ तृतीये चत्वारो देवि चतुष्कुण्डानि कारयेत ॥ चतुर्थे चत्वारो देवि वसुकुण्डानि कारयेत ॥ वाणाख्ये च
त्वारो देवि कन्याकुण्डानि कारयेत ॥ चतुर्थे चत्वारो देवि वसुकुण्डानि कारयेत ॥ अथ षष्ठे चत्वारो तु कुण्डानां विंशतिन्यसेत ॥ सप्त
मे चत्वारो देवि चतुर्विंशतिकारयेत ॥ अष्टमे चत्वारो देवि द्वात्रिंशतिकारयेत ॥ ज्ञातकुण्डानि देवेशि गृहहत्वे कोत्तमामत ॥ ए
कोत्तरमतं देवि महाकालमतं शृणु ॥ आदौ विन्दु प्रविन्यस्य द्वितीये कुण्डएग्मकं ॥ तृतीये वेदसंख्यानि चतुर्थे वसुसंज्ञकं ॥
पंचमे वसुसंख्यानि षष्ठे तु द्वादशैव तु ॥ प्राक्यत्यकत्कुण्डीनि दक्षवामेतु वेदकं ॥ दक्षवामे थवा देवि वसुकुण्डानि कारयेत ॥ प्रा
ग्णामतं तथा प्रत्यक्कार येत्तारमेश्वरी ॥ गिरिसंख्या चत्वारो तु कुण्डविंशतिकल्पयेत ॥ अष्टमे चत्वारो देवि कुण्ड द्वाविंशतिं चरेत ॥ प्रा

॥ राम ॥
॥ ४५ ॥

च्यां तु गिरिसंख्यानि तन्मासु रवेतु सप्तवे ॥ दक्षे तु वेदसंख्यानि तत्तासु रवेत्तु दक्षवत ॥ दक्षवामे तु देवि अग्निगिरिसंख्यानि कारयेत
तदाग्र च्या प्रतीच्यां च वेदसंख्यानि कारयेत ॥ एवं मिमित्वा देवेशि कुण्डानि दिग्गुगद्वियुक ॥ नवमे चत्वरे देवि षड्विंशति प्रकल्पये
त ॥ प्राच्यां तु वसुसंख्यानि प्रतीच्यां वसुसंख्यकं ॥ दक्षिणे वामसंख्यानि तुत्रे दक्षवद्भवेत ॥ दक्षोत्तरे थवा देवि वसुसंख्यानि कारयेत ॥
दक्षे तु वसुसंख्यानि वसुसंख्यानि वामके ॥ प्राच्यां तु बाणसंख्यानि ॥ तन्मासु रवेत्तु पूर्ववत ॥ एवं मिमित्वा जानीहि अन्तकुण्डानि पा
वेति ॥ एकोन्नराख्यः स्तूयो हि किमन्यच्छ्रोतुमिच्छसि कैलासाख्यक्रमेणास्मिन्ह सकथितो मया ॥ एवमन्यक्रमेणापि कुण्डानि परिक
ल्पयेत ॥ अर्द्धकुण्ड अग्निकुण्ड शिवअग्न्यात्मकन्तथा ॥ नवकुण्डीविधानेन कुण्डानि परिकल्पयेत ॥ निर्वाणादीक्षिते देवि नवहोमान्त
ग्नौ भवेत ॥ प्रथमे चत्वरे देवि श्रीविन्दुपातयोस्त्रिये ॥ द्वितीये चत्वरे देवि कुण्डत्रितयमाचरेत ॥ तृतीये चत्वरे देवि वेदकुण्डानि का
रयेत ॥ चतुर्थे चत्वरे देवि वसुकुंडानि कारयेत ॥ बाणाख्य चत्वरे देवि कलासंख्यानि कारयेत ॥ सत्वाख्य चत्वरे देवि कुंडविंशतिकश्चरेत
॥ गिर्याख्यचत्वरे देवि तत्त्वसंख्यानि कारयेत ॥ वस्वाख्य चत्वरे देवि द्वात्रिंशत्कुंडसंहिति ॥ अंतसप्त च कुण्डानि त्वष्टमे सूर्यकीर्तितं ॥ अक्षोभ्य

सम्मतं देवि शृणु यत्नेन सांप्रतं ॥ बिन्दुस्थाने भवेद्देवि द्वितीयं चत्वरं चरेत ॥ तृतीये चत्वरे देवि वेदकुण्डानि कारयेत ॥ चतुर्थे च
त्वरे देवि वसुसंख्यानि कारयेत ॥ पन्नाख्य चत्वरे देवि मर्मसंख्यानि कारयेत ॥ अथाष्टमे चत्वरे च द्वात्रिंशत्कुण्डसंहृति ॥ अथ निरा
मते देवि नव चत्वरभेदतः ॥ तत्रादौ चत्वरे देवि बिन्दुस्थानं प्रकीर्त्तितं ॥ द्वितीये चत्वरे देवि चन्द्रसंख्यानि कारयेत ॥ चतुर्थे चत्वरे देवि व
ह्निसंख्यानि कारयेत ॥ चतुर्थे चत्वरे देवि वेदसंख्यानि कारयेत ॥ भूताख्य चत्वरे देवि वसुसंख्यानि कारयेत ॥ रसाख्य चत्वरे देवि कलासं
ख्यानि कारयेत ॥ अक्षाख्य चत्वरे देवि कुण्डानां विंशतिं चरेत अष्टमे चत्वरे देवि तत्त्वसंख्यानि कारयेत ॥ नवमे चत्वरे देवि द्वात्रिंशत्कु
ण्डसंहृति ॥ तृतीयं मेरु वक्ष्यामि नवात्मकक्रमे शिवे ॥ प्रथमे चत्वरे देवि बिन्दुस्थानं प्रकीर्त्तितं ॥ द्वितीये चत्वरे देवि पूर्ववन्नवसंख्यके ॥ तृती
ये चत्वरे देवि वेदसंख्यानि कारयेत ॥ चतुर्थे चत्वरे देवि रससंख्यानि कारयेत ॥ पंचमे चत्वरे देवि वसुसंख्यानि कारयेत ॥ षष्ठे देवि कलाख्या
नि दिक्पुरसप्तमे भवेत ॥ अष्टमे तत्त्वसंख्यानि मर्मसंख्या तुरीयके ॥ नवात्मकक्रमेणैव मेरुसंज्ञा विनिर्णये शिवे ॥ त्रयाणामनिकाराग्निकोणेतु
यस्य कार्या चरेत ॥ अधिकार्मविहीनस्य नेदं साधनमीतं ॥ इति संक्षेपतः प्रोक्तं कराल्याख्य मतं शृणु ॥ अष्टोत्तरशताख्यन्तु मेरुसंज्ञं शृणु पार्वति

॥ आदौ बिन्दुं विधायाथ ततः कुंडत्रयं चरेत ॥ तृतीय चत्वरे देवि कलासंख्यानि कारयेत ॥ चतुर्थ चत्वरे देवि ऋतुसंख्यानि कारयेत ॥ वाणाख्य चत्वरे देवि वसुसंख्यानि कारयेत ॥ अत्वाख्य च चवेरे देवि कलासंख्यानि कारयेत ॥ गिरिसंख्या चत्वरे तु विंशत्संख्यानि कारयेत ॥ रुद्राख्य चत्वरे देवि षड्विंशानि प्रकल्पयेत ॥ चतुर्विंशतिकुण्डानि पूर्ववत्कारयेत्प्रिये ॥ कुण्डयुग्मं तु कुर्वीत दक्षिणोत्तरतः शिवे ॥ प्राक्प्रत्यक्चापि कर्त्तव्यं कुण्डयुग्मं महेश्वरि ॥ अष्टमः सूर्यसंज्ञस्या देवमष्टोत्तरं शतं ॥ तत्र गर्भे क्रमेणैव मेरुः शृणु महेश्वरि ॥ आदौ बिन्दुं प्रविन्यस्य द्वितीये कुण्डयुग्मकं ॥ पृष्ठाग्रतः पार्श्वतो वा कुण्डयुग्मं प्रविन्यसेत ॥ कुण्डत्रयं तृतीये तु योनिवह्निन्यसेच्छिवे ॥ चतुर्थ चत्वरे देवि ऋतुसंख्यानि कारयेत ॥ वाणाख्य चत्वरे देवि वसुकुण्डानि कारयेत ॥ रसाख्य चत्वरे देवि कलाकुण्डानि कारयेत ॥ मुनिसंख्ये चत्वरे तु कुण्डविंशतिकं चरेत ॥ वसुसंख्या चत्वरे तु कुण्डविंशतिकारयेत ॥ संधाख्य चत्वरे देवि धर्मसंख्यानि कारयेत ॥ अतः सप्ततिकुण्डानि परमेश्वरि ॥ अष्टमसूर्यके तु कर्त्तव्यमष्टोत्तरं शतं ॥ चत्वराणां पताकानां तथा षट्शोभवस्य च ॥ तोरणानां लक्षणान्तु कथ्य शृणु सांप्रतं ॥ क्रमोत्कामादुन्नतोपि द्विविक्रमप्रभेदतः ॥ त्रिविधः क्रमादुन्नतस्याद्वितस्त्रिक्रमभेदतः ॥ उच्छ्रयो हस्तमात्रस्यात्त्रिगुणांस्व स्ववाहि ॥

ञ्छायामपरमेशानि चतुर्विंशतितत्त्वियुक॥ वंशःप्रोक्तो महेशानि क्रमान्मण्डववर्द्धनं॥ पताकानां चतुःषष्टिं तत्वसंख्या च वा प्रिये
पनसाश्वत्थनुतेन करवीरेश्च केतकैः॥ नानाचित्रविचित्रैश्च तोरणानि प्रकल्पयेत॥ जम्बूदाडिमविम्बाद्यैः वीजपूरैस्तथाम्बरैः॥ नववर्ण
मयैर्दिव्यैः चन्द्रातपांविभूषणां॥ वामक्रमेणादेवेशि दक्षमार्गक्रमेण च॥ विन्दुसर्गोचितां कृत्वा सृष्टिसंहारतोऽपि वा॥ अष्टवर्गाक्र
मेणैवाष्टोत्तरकलाक्रमात॥ पूजयेत्तत्र देवेशि स्वस्तिवाचनसंयुतं॥ महाविद्यामण्डलं च विद्यामण्डलमेव वा॥ चतुर्दीपक्रमेणैव च
तुर्वेदक्रमेण च॥ चतुर्द्वारं तु सम्पूज्य वह्निप्राकारचिन्तनं॥ महाश्मशानं तच्चिन्ता तन्त्रदेवीर्विचिन्तयेत॥ एवं संस्कृते देवि होममण्डपं चेदव
वत॥ पञ्चातं ऋतुभेदेन कालभेदेन पार्वति॥ पुष्पफलानि धान्यानि यत्किञ्चिज्जगतीगतं॥ तत्तद्धोममये देवि सर्वसिद्धीश्वरो भवेत॥ दुन्दु
भीनां द्वादशान्तु झरिकोटिप्रवादयेत॥ नानावादित्रघोषाद्यैः चतुर्विंशतिवाद्यतः॥ गन्धर्वनीलवेषान्वा कृत्वा सिद्धीश्वरो भवेत॥ षट्पारा
यणमासाद्य सर्वसिद्धीश्वरो भवेत॥ ध्वजारोहणोत्सवे या च यत्किञ्चिज्जगतीतले॥ समस्ताः सिद्धयो देवि नरस्य पादगता भवेत॥ रहस्यातिरहस्यं
च गोपनीयं स्वयोनिवत॥ सपताकादुन्दुभिर्वा रणेधारणायोगतः॥ शाककर्त्ता भवेत्सोऽपि धनदः किंकरो गृहे॥ इति संक्षेपतः प्रोक्तं क्रमनाडो

तुमिच्छसि ॥ ॥ इतिश्रीमद्दक्ष्योम्न्य महाग्रासस्वादे शाक्तिशागमतन्त्रे सिद्धमतरहस्ये महाकथने दशमः पटलः ॥ १० ॥ देव्युवाच ॥ देवशाम्भो
तुमिच्छामि रहस्यातिरहस्यकं ॥ श्रीशिवउवाच ॥ रहस्यं कथयते देवि ॥ शृणुष्वावहिताभव ॥ दलाकारा गिरिस्सर्वा गिरिः कुराडानिकारयेत्स्त्रि
ये किम्वा श्रीचक्रवत्कार्यं तत्क्रमं शृणु पार्वति ॥ चत्वारोन क्वैकाराः प्रथमे विन्दुसंगमं ॥ ततस्त्रिकोणा कर्त्तव्या मष्टारं तदनन्तरं ॥ ततो दशारं देवे
शि द्वितीयं च दशारकं ॥ मन्वस्रं च ततः कार्यं ततो नागदलं शिवे ॥ षोडशारं च दलं देवि ततो वृत्तत्रयं भवेत् ॥ चतुर्द्वारोपशोभाढ्यं श्रीचक्रं मे
रहस्यकं ॥ क्रमाक्रमादुक्तं तन्तु कृत्वा विरचयेत्सुधीः ॥ ततो परि महेशानि मण्डपं रचयेत्ततः ॥ नवकुण्डानि जायन्ते तत्रैव क्रमराशिः शिवे ॥ तत्रासिनेत्रे
वप्रज्वाल्य सुन्दरी ध्यानपूर्वकम् ॥ तदा एधविभूषाश्च मरु श्रीसर्वतोमुखं ॥ महामेरुपदं देवं दलाकालेन कारयेत् ॥ निःशङ्कस्तु दलाकारः कीर्त्ति
तः परमेश्वरि ॥ एकक्रोपि यो देवि सर्वसिद्धीश्वरो भवेत् ॥ शम्भोर्विंशच्चत्वारि क्रमात्क्रमगता श्रुता ॥ सृष्टिसंहारमार्गाणां कालचक्रं द्विधा भवे
त् ॥ सृष्टिसंहारमार्गेणास्य रव्यसाधनयोगतः ॥ चतुर्द्धा योनिगदिताः कालचक्रसमाचरेत् ॥ ततो परि महेशानि श्रीविद्याचक्रमुत्तमं ॥ पराचक्रं ततो
देवि नतः षट्शांभवाभिधां ॥ चतुर्विधे यदुदितं सर्वन्नेशाक्रमे शृणु ॥ चत्वरं पुरुषाकारं केलावाङ्मितं शिवे ॥ उन्नतोन्नतश्च तत्र किम्वा पुरुषसंह

॥ शा·तं ॥
॥ ४८ ॥

तिः पञ्चमे भवेदादौ ॥ नवकूटक्रमेण च द्वितीये तु द्विपञ्चाशः षष्ठिस्तु तृतीयकं ॥ पंचाशद्वेदसंमिता चतुर्थे परमेश्वरि ॥ द्विसप्तति पञ्चमे
तु चतुःषष्ठिस्तु षष्ठमे शिरोबिन्दुर्महेशानि सम्बन्धेन प्रपूजयेत् ॥ अथवान्यप्रकारेण क्रममन्यच्छृणु प्रिये ॥ रूपसंख्या ॥ चत्वारिंशत्त्वाद्यके
नपावति ॥ तत्र कूटानि देवेशि सर्वेण क्रमतः शिवे ॥ आदौ बिन्दुर्महेशानि द्वितीये वह्निकूटकं ॥ तृतीये चत्वारो देवि रससंख्यानि कारये
त् ॥ चतुर्थे वसुसंख्यानि· कलासंख्यानि पंचमे ॥ षष्ठे द्वाविंशतिः शिवे विंशत्कूटानि सप्तमे ॥ चतुस्त्रिंशति देवेशि वसुसंख्याभिधे भवेत् ॥
अष्टविंशद्यन्तसंख्या· ॥ द्विचत्वारिंशत् दिक्क्रमात् ॥ चत्वारिंशत्तथाष्टौ च रुद्रसंख्याविधौ भवेत् ॥ द्वादशे पञ्चाशात्कामसंख्याभिधे शृणु प
ञ्चाशद्वसुसंख्यानि· यथायोगेन कारयेत् ॥ शांभवाख्य महामेरु महासाम्राज्यदायकः ॥ यस्य विज्ञानमात्रेण त्रैलोविजयी भवेत् ॥ इति संक्षेपतः
प्रोक्तं रहस्यातिरहस्यकं ॥ गोपनीयत्वयोनिवत् ॥ संज्ञानेन च विज्ञानी सर्वदेवरहस्यवित् ॥ नाभिरणास्तु चतुःषष्ठा·काल्यास्तु पंचषोडशिका·
॥ सुन्दर्याः पञ्चषोडश च विन्यस्तव्या प्रयत्नतः ॥ शक्तिन्यासो भवेदेकः श्रीकन्यासेषु भिन्नतो ॥ सर्वमेकं महेशानि शक्तिसंगमतन्त्रके ॥ पूर्णाभिषे
कमारभ्य· दिव्यसाम्राज्यतः शिवे ॥ योगो यक्षादितो देवरहस्यातिरहस्यकं ॥ अहो धन्यवतान्धन्यो· दिव्यसाम्राज्यविन्नरः ॥ पूर्णाभिषेकसंयुक्तो· नय

॥ राम ॥
॥ ४८ ॥

ग्यामं समाचरेत् सर्वदा ध्यानसम्पन्नः सदा पूजनतत्परः । भक्तश्चिन्तापरो भूत्वा स्वेच्छारूपो नरो भवेत् ॥ आस्तिक्यं मनसः स्थैर्यं चान्तत्वं च दयालुता ॥
गुरुभक्तिर्दृढं वभक्ति भक्तभक्तिपरो भवेत् ॥ परापवादं द्रोहं च परनिन्दां विवर्ज्जयेत् ॥ स्त्रीषु निन्दा प्रहारश्च सर्वथा परिवर्ज्जयेत् ॥ परद्रव्यं परस्त्री-
श्च परान्नं सर्वथा त्यजेत् ॥ परपङ्क्तिं वर्ज्जयेच्च परहस्तं विवर्ज्जयेत् ॥ एकान्ते निवसेन्नित्यं पर्वते च विशेषतः ॥ प्रोषिद्वू पंसमेरं सर्वं जगदेत-
च्चराचरं ॥ सदानंदपरो भूत्वा देव्यानन्दपरायणः ॥ सिन्दूरतिलको नित्यं स्वेच्छाचारी जितेन्द्रियः ॥ क्रोधलोभमदं दंभमात्सर्यं च चंचलत्वतां ॥
वाचालतां पवर्ज्जयेच्च वक्रत्वं तां विशेषतः ॥ आसनस्य जयो देवि तथा निद्राजयः शिवे ॥ इन्द्रियाणां जयो देवि सर्वथा कार्य्यं द्विज ॥ आहारस्य
जयो देवि खेचरीमुद्रिकाञ्जपेत् ॥ यत्र कुत्र वसेन्नित्यं यत्र कुत्र स्मरेच्छिवां ॥ पूजयेद्विपिने घोरे ॥ कामिनी मगाडदे शिवे ॥ वश्पा मगाडलगो
भूत्वा सर्वदा चिन्तयेच्छिवां ॥ मितवाक् मिताहारी मितशायी महोत्तम ॥ तेजोरूपं तु संस्थाप्य जगदेतच्चराचरं ॥ विभाव्य पूजयेन्नित्यं मय
यत्नेन संत्यजेत् ॥ कोऽहं कस्य किमात्मत्वं किंरूपोऽहं कथं स्थितिः ॥ कुत्रोत्पन्नः कथं स्थितः ॥ किंरूपः किन्न मास्ति च ॥ किं माज्ञ प्रभिमिति ध्यात्वा
सर्वं तुत्स्मावत्त्यजेत् ॥ अहं नारो भवाम्यत्र नारारूपोहमेव हि ॥ यत्कृतं कारितं यच्च यत्सर्वं चिन्तितं स्मारितं च यत् ॥ प्रेरितं दर्शितं यच्च तदपि

नन्दीपि तं चरेत् ॥ तया तां क्रियते सर्वं नान्यकर्त्तास्ति भूतले ॥ पूर्णाभिषेके संयुक्तो यस्मिन्देशे विराजते ॥ स देशो धन्यतां याति समन्ता
द्दशयोजनं ॥ पूर्णाभिषेकहीनानां दीक्षा नहि फलप्रदा ॥ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ शीतोष्णे समतां नीत्वा सदात
क्तमानसः ॥ देवतायास्वयं कृत्वा देवरूपो नरो भवेत् ॥ पूर्णाभिषेकहीनानां दीक्षा पूजा च निःफला ॥ आर्शीया ॥ महेशानि पूर्णादी
क्षायुतस्य च ॥ तन्त्रोक्तेनैव संग्राह्यानत्यषां च समाचरेत् ॥ तस्य तोषणमात्रेण संतुष्टाः सर्वदेवताः ॥ सर्वत्राधिकारोहि ॥ तस्य हस्ते व्य
वस्थिताः ॥ महाविद्या स्वरूपोहि स एव परिकीर्त्तितः ॥ नीलावक्रे वसेत्तस्य कालीहस्तगता भवेत् ॥ सुन्दरीगेहगा तस्य कमला त्वग्रगोच
रा ॥ वगला तस्य क्रोधेतु वाला स्वाहृदये स्थिता ॥ एवमन्या महाविद्याः सिद्धविद्याश्च पार्वति ॥ सर्वोत्कृष्टः स गा देवि विनाचक्रार्यादिचारणा
त् ॥ पूर्णाभिषेकयुक्तस्य रेकाराक्षौरयोः शिवे ॥ तस्य कोपेन देवेशि जगदेतद्विनश्यति ॥ तस्य तोषणमात्रेण त्रैलोक्यं लक्षितं भवेत् ॥
पंचवर्षे भवेद्वालः पूर्णादीक्षामार्गाख्यकर्म्मणि ॥ नवयत्वेन जातित्वे राज्यत्वे नापि पार्वति ॥ पाषिडत्वेन देवेशि राज्यत्वे नापि पार्वति ॥ तस्या
पमानो देवेशि न कर्त्तव्य कदाचन ॥ प्रमादात्कुरुते यस्तु तस्य तापो भविष्यति ॥ आज्ञानान्मोहतो दम्भाद्रुद्रादपि महेश्वरि ॥ सदा तत्पूजयेद्यत्नान्न

नयेतां तारिणीं वच ॥ तस्या नाशकारिष्यामि ताराहं भैरवेन च ॥ पूर्णाभिषेकयुक्तस्य स्थापनं देववत्स्मरेत् । पश्चाद्देवालये देवः सदा वसति पार्वति
तथा पूर्णायुते देवि विद्या तिष्ठन्ति सर्वदा ॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इ-
ति श्रीमदक्षोभ्यमहोग्रतारासंवादे षट्सहस्राज्ञवमेरुविधौ शक्तिसंगमतन्त्रराजे सिद्धनन्तरहस्ये एकादशः पटलः ॥ ११ ॥ श्रीदेव्युवाच ॥ देवशम्भो
तुमिच्छामि रहस्यातिरहस्यकं ॥ पूर्वे संसूचितं जन्म तन्मे कथय शंकर ॥ ॥ श्रीशिव उवाच ॥ रहस्यातिरहस्यानि ताराया योगरहस्यकं ॥ कथ्यते दे-
वदेवेश शृणुष्व सावहिता भव ॥ तारायोगे योग एव तथा ताराजपो जप ॥ तारामन्त्रो महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ॥ स धन्यः स च विज्ञानी स
वती स च दीक्षितः ॥ स चात्मा स महादेवः सर्वदेवाधिकप्रभुः ॥ परमात्मा सह वाच्य सर्वदेवनमस्कृतः ॥ सदर्शनी सविज्ञानी ब्रह्मानन्दः परायणः ॥
तस्यैव जननी धन्या पिता यस्य सुरोपमः ॥ ताराजापी पूर्णदीक्षासंयुक्तस्तारिणीस्वयं ॥ सर्वेश्वरः सर्वगश्च सर्वमन्त्रपरायणः ॥ सर्वतन्त्रार्थवे-
त्ता च सर्वमन्त्रपरायणः ॥ पंचपारायणासक्तः पंचरत्नप्रजापकः ॥ एकचित्तमनस्कालोकः जपेद्दीक्षायुतो यदि ॥ तत्त्वं सिद्धिं विजानीयात् त्वात्र का-
र्या विचारणा ॥ पुरत्ते केलिरविता न्मन्त्रा जपेज्जापे न सिद्धिदा ॥ तस्य दर्शनमात्रेण मन्त्रक्षोभविनाशनं ॥ मूको यडोपि देवेशि पूर्णदीक्षायुतस्य

च ॥ जलं वस्त्रं रसः शैयोहि महाकविवरो भवेत् ॥ सिद्धमन्त्रप्रयोक्तव्या तारायाः परमेश्वरि । घटहस्तं पदा दत्वा तदा घटसरस्वती । सर्वस्वदीतिदेवे
शि प्रहरार्द्धयमेव च ॥ एतद्योगफलं प्रोक्तं नवषीत्य महेश्वरि ॥ इतोपि वा चाधिक्रेष्ठं किं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ श्रीदेव्युवाच ॥ देवेशश्रोतुमि
च्छामि पूर्वोक्तं यड्हस्यकं ॥ ॥ श्रीशिवउवाच रहस्यातिरहस्यञ्च ॥ नवषीत्यानिगद्यते ॥ महापदि महाघोरे प्राप्ते प्राणात्ययसङ्कटे । राज्यहानौ ऽथवा ना
शे सुतनाशे समागते ॥ महामारीभये प्राप्ते राष्ट्रभङ्गे महेश्वरि ॥ राज्यलक्ष्म्या प्रयोगश्च परराज्यविनाशकं ॥ महाप्रीतिकं योगं षट्कर्मसाधनं परं
ते — नमहेशानि श्रृणु सावहिता भव ॥ ॥ श्रीशिवउवाच ॥ प्रासेपच्छाक्षरी तारां कुल्लुकां सहितां जपेत् ॥ अधिष्ठात्री च राज्ञ घरालक्ष्मी च वी
जाक्षयापरा ॥ कास्याः शक्तिः शैवशिवे तारावीजन्तु देवतु ॥ तारापरा वर्णमाया तदेवर्णरि कीर्त्तितं ॥ छिन्ना चैकाक्षरी मन्त्रः सएव परिकी
र्त्तितः ॥ एकस्मिंश्च नये देवि महाक्रोधाभिधं ततः ॥ चतुर्विंशाक्षरधरः कूर्च्चवीजाक्षरं शिवे । चराद्यघरोर्द्धतिरव्या ता कूर्च्चवीजाक्षरं भवेत् ॥
केवलं परपजापे रात्रिशक्तिजपं भाग्यं भवेत् ॥ पूर्वोवीजपरं शान्तिरूं त्र्यं कीलकमुच्यते ॥ पश्चषीत्यामहेशानि विशक्तिर्देवता मता ॥ कालीवी
जन्तथा तारा छिन्ना काली चतारिणी ॥ छिन्ना तारा कालिका च षोडशी विजया कला ॥ मन्त्रश्च वशगास्तस्य त्रैलोक्यराज्यदायिनी ॥ देवता ता

रिणी पूर्वा प्रतिदेवी तु चरिका ॥ अधिदेवी तु विजया अक्षरी परमा कला ॥ एकबीजसमा देवी देवेशि नन्दे वायुधभूषणा ॥ मध्यबीजं स्वरूपस्याद
न्त्यबीजश्च वाहनं ॥ नवाक्षरी परा विद्यास्य दारा वामेश्वरी ॥ त्रिंशन्नार्णा महातारा त्रिलोके सुरतमीरितं ॥ त्रैलोक्यविजया विद्या स्मृतमात्र
वरप्रदा ॥ त्रैलोक्यविजयाख्याख्यमन्त्रे देव परिकीर्त्तितं ॥ एकबीजसमा देवेशि नन्दे वसमन्त्रमीरितं ॥ अथवा यत्र भक्तिः स्यात्तत्पीठपूजये शि
वे ॥ एतत्प्रयोगे देवेशि छिन्ना वाग्गाः प्रकीर्त्तिताः ॥ संहारास्त्रं महेशानि वारामयं परिकीर्त्तितं ॥ सेव चाङ्कपरी विद्या शुष्कवक्त्रे तु जी
वका ॥ शुभाशुभस्य वक्ता तु शीवार्त्ताकथनी भवेत् ॥ त्रैलोक्यवार्त्ताकथिनी महापद्मावती कला ॥ ऊनविंशाक्षरी विद्या त्रैकाल्या ज्ञानगो
चरा ॥ किंचिज्जपन्मूले विद्या ॥ तदन्याप्रजपेच्छिवे ॥ सार्वा सा तु महेशानि जपपूजादिकं स्वसि ॥ अनुलेपनगन्धश्च दद्यात्तेन पार्वति
॥ त्रिमासाभ्यासयोगेन उदयान्तमितं जपेत् ॥ वरास्थिरासनस्त्वेन यज्ज्ञातं तन्निवेदयेत ॥ एतत्प्रयोगयोगेन किं न यन्न करास्थितं
॥ साम्राज्यसुन्दिकायोगात् किन्न सिध्यति भूतले ॥ कालीतारामयी प्रोक्ता वटुकास्य स्वरूपिणी ॥ प्रणवश्च तथा मायास्व
न्ते दानयुग्मकं ॥ कूर्च्चयुग्मं बीजयुग्मं स्वाहान्तो चैकविंशति ॥ एतस्य धारिणी देवी पताकास्थानगोचरा ॥ पताकायां शिवे स्वतन्त्रं चतुष्क

मध्यकोष्ठकं॥ चतुष्कं वातवर्षेश्च·नागयज्ञोपवीतिनं॥ कपालशूलभृ पाशं·स्वपुत्रैः परिवेष्टितं॥ कुक्कुरैर्भैरववर्गाश्च·वेष्टितं ब्रह्मरूपि
णां द्वादशारिस्थितं देवि·प्रतक्ष्फलदं करौ पद्मासनसमासीनं·त्रैलोक्यजयदं विभुं॥ एतत्त्यताकासभ्याए त्रैलोक्यविजयी भवेत्॥ महा
राज्यपदं जित्वा·त्रैलोक्यविजयी भवेत्॥ पश्चाज्ञोरेव पुरश्चर्याक्रमेणा तु विशेषतः॥ कुहनसारश्च हीरेणाःजातिमात्रं परित्यजेत्॥ कु
आरश्च ह्यपन्नारं·प्रीतेत्यर्थतारिपीमनाः॥ वलिदानं प्रकुर्वीत यदेवया च्यतेशिवे॥ माहिषत्वेन कुष्माण्डं·छागत्वेन तु कर्कटी॥ वीजपू
रं नरत्वेन·रुम्रापुष्पं हयस्मृतं॥ मूलकं मत्स्यभेदेन·यथायोगेन कारयेत्॥ सात्त्विकं राजसं देवि·तामसं तु तृतीयकं॥ त्रिविधं वलिदानं तु·
कीर्तितं परमेश्वरि॥ ॥ श्रीदेव्युवाच॥ वद कर्त्ता कस्मिन्विशिष्टोरिति·काशान्ति किं स्वरूपकं॥ शिवशक्त्यात्मको वापि·ब्रह्मविष्ण्वात्मकोपि
वा॥ भर्त्ता पुत्रार्थवा भ्राता·वा किं यातदद प्रभो॥ श्वत्वमे संशयो जातो·संशयम्भवनाशया॥ ॥ श्रीशिव उवाच॥ रहस्यातिरहस्यं च रहस्या
तिरहस्यकं॥ कथं तत्कथ्यतां देवि·श्रापयर्थं कुरु पार्वति॥ ॥ श्रीदेव्युवाच॥ शापस्त्वत्स्मरणाभ्यां तु हिमाद्रिशिरसा शये॥ सरुवाविसुरवा भू
यान्किमन्यद्दुजल्पिते॥ ॥ श्रीशिव उवाच॥ शापार्थं न प्रहृष्टोस्मि·तान्कथां कथ्यतेश्शृणु॥ येनानाः प्रेतकूष्माण्डा·यक्षराक्षसकिन्नराः

॥ब्रह्माविष्णुस्तथारुद्र ग्रहाश्चान्यमहेश्वरि॥ तज्ज्ञाता॥ परमेशानि तैः ग्रस्तन्तु चराचरं॥ केचिद्ब्रह्मनिसेवन्ते शिवंविष्णुं तथापरे॥ महाविद्याभजेभ्यन्ते नते वै सिद्धिभागिनः॥ वेताराख्या महादेवि जपपूजादिहारका॥ तथाविनाज्ञानार्थाय भक्तानुग्रहणाय च॥ वहुकोयं महेशानि योगिनीनां तु कोटिशः॥ भैरवानां कोटिकोटिं महाविद्यास्त्वनेकशः॥ त्रिसर्वसंख्याताराः स्यात्कालीदशार्वुदा शिवे॥ कला कोटिप्रभेदात्तु प्रभेयुसुंदरी तेजसंयुतः॥ बालानिकोटिसंख्याभिच्छिन्नाः षोडशार्णवर्वतः॥ पूर्डिज्ञा लक्षवसान्ते श्वन्न षोडशमायुता॥ कोटिद्वादशभिर्देवि भुवन्नाशन पार्वति॥ धूमाकला लक्षभेदैः सिद्धविद्याख्यनन्तनः॥ चतुराशीतिलक्षेश्च मातङ्गिम न्नताः शिवे॥ एतत्सर्वं मया तेजः सर्वब्रह्माण्डरूपधृक॥ सर्वतेजः समुद्भूतं वडुरूपं सनातनं॥ सत्वंरजस्तमयुतो ब्रह्माविष्णुमहेश्वरि॥ तद्भक्तिभिर्महेशानि रूपत्रयधरं परं॥ तत्रापि दशधा भिन्नं चण्डरूपं सनातनं॥ महोग्रतारा यादन्तसुपवीव महेश्वरि॥ कपालछिन्नपादन्तकात्याकालो निवेदितः॥ दन्तीत्र शूलकालेन पञ्चूलन्तु चित्राकोये॥ कालीतारा त्वथाछिन्नास्वरूपा सन्ति च॥ अन्यदेवासिद्धयेश्च यक्षगन्धर्वकिन्नराः॥ रूपं कोष्ठकरमासास्य संभवन्ति निरन्तरं॥ एवं वडुकरूपन्तु तज्ज्ञात परमेश्वरि॥ यदारभ्यधृ तद्रूपं वडुकाख्यं शिवे नतु॥ तदाप्रभृति देवेशि चेतारा स्यानदुःखदा॥ सिद्धिं सन्तभिरन्तां त्वां देवतादर्शनोत्सुका॥ एवं तु वटुकं

॥ ता·तं ॥
॥ ५४ ॥

पूजयन्नाथपूजार्थमेव च वा ॥ यपूजन्ति देवेशि तेन दाशिवरूपिणा ॥ सर्वसिद्धिश्च वादी विसाधको संभवन्ति च ॥ वेतालाश्च यक्ष किङ्करत्वं यक्षिणी पाद
कागता ॥ खड्गाञ्जनविलाश्चायाश्च परकाये प्रवेशनं ॥ तदारभ्य महेशानि साधकस्य करस्थितं ॥ सर्वन्तु मावगा स्यान्तु यस्य त्याकारं भवेत् ॥ एवं श्री
वटुको जातसर्वसिद्धित्वयः शुभ ॥ दशविद्या योगरूपं समासान्य वर्षं तिच ॥ उपरि पादसर्वेश्वानन्दशयोगसमन्वितं ॥ वटुकस्यैतिथिः प्रोक्तो व
टुको त्याज्जिकारिणी ॥ देव्याः पुत्र त्वं तो यातो वटुके परमेश्वरि ॥ त्वं विहाय च येमां च संभजन्ति युगे युगे ॥ तेषां न सिद्धिर्देवेशि कोट्यार्बुदयुगे
रपि ॥ खड्गशूलधरं कान्त्या नारूपायां पूर्वमीरितं ॥ किंच तुर्थस्तु हस्नाशं वटुकं परमेश्वरि ॥ महस्यातिरहस्यं च नरहस्यातिरहस्यकं ॥ सर्वसिद्धिप्रदं देवि
सर्वसाम्राज्यदायकं ॥ सर्वोपन्नारगो योगः स्वैरं न्यरक्षकपरः ॥ परोसे न्यस्य राष्ट्रस्य विदा चीमासकः परः ॥ परराज्यमहेशानि नामो पड्वकारकं ॥ अहो
रात्रे शादेवेशि वीरसाधनयोगतः ॥ वटुकस्तन्त्रमन्त्रः स्या तारा काली तथा शिवे ॥ अन्यप्रयोगादेवेशि क्वचित्सिध्यन्ति दानवा ॥ गोपनीयं गोपनीयं गो
पनीयं वरानने ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीमदक्षोभ्यमहोग्रतारासंवादे ज्ञानसंगमतन्त्रराजे ताराहस्ये सिद्धप्रयो
ग-द्वादशः पटलः ॥ १२ ॥ ॥ श्रीदेव्युवाच ॥ देवेश श्रोतुमिच्छामि वीरराज्यादिनिर्णयं ॥ वीररात्रिर्महारात्रिः कालरात्रिस्तथैव च ॥ मोहरात्रिर्घोररात्रिः क्रो

॥ राम ॥
॥ ५४ ॥

धर्मरात्रिस्तथैव च ॥ तथैव चावला रात्रिन्तारा रात्रिस्तथैव च ॥ शिवरात्रिर्दिव्यरात्रिन्दारुणा च यथाक्रमात् ॥ कथ्यते परमेशानि शृणुष्वावहिता भव ॥
चतुर्द्दशी शक्रभेश्च कुलाकुलवासरा ॥ अर्द्धरात्रौ यथायोगो दिव्यरात्रिः प्रकीर्त्तिता ॥ शुक्लाष्टमी चाश्विनस्य नवरात्रन्तु तस्य वै ॥ महारात्रिर्म्महेशानि का-
लरात्रिं शृणु प्रिये ॥ दीपोत्सवचतुर्द्दश्यां ॥ अमायायोगस्य वचेत् ॥ कालरात्रिर्म्महेशानि तारा कालीप्रियंकरी ॥ जन्माष्टमी महेशानि मोहरात्रि
प्रकीर्त्तिता ॥ कृष्णावतारपर्य्यन्तं तारायाः शापवर्ज्जितं ॥ जातः कृष्णावतारे तु निर्मुक्ता तारिणी परा ॥ अत्यन्तो विंध्यवासिन्या विष्णुरूपे समागते ॥ भीम
ह्यतारिणी विद्या महाराणा परापरा ॥ स्मरणाद्देवसंसिद्धा स्मृतिपुष्टिकरी परा ॥ चैत्रमासि नवम्यां च ॥ शुक्लपक्षे च भृगुसुते ॥ क्रोधरात्रिर्म्महेशानि
तारारूपा भविष्यति ॥ मासि मार्गशिरे प्राप्ते कृष्णाष्टम्यां महेश्वरी ॥ महाकालस्वरूपा च घोररात्रिः प्रकीर्त्तिता ॥ ज्येष्ठे या दशमी शुक्ला भृगुवासरसं-
युता ॥ दश्ययोगसमायुक्ता रात्रावेकादशी यदि ॥ सा तिथिर्द्दिव्यरात्रिश्च कीर्त्तिता परमेश्वरी ॥ षष्ठी या दशमी शुक्ला दश योगसमन्विता ॥ वटुकस्य ति-
थिः प्रोक्ता वटुकोत्पत्तिकारिणी ॥ अमा भौमसमायुक्ता भार्गवे तु लभ्यते ॥ फाल्गुणे कृष्णपक्षे तु ह्यर्धरात्रौ भृगौ शिवे ॥ शिवरात्रिस्तु संज्ञाता सर्व-
सिद्धिप्रदायिनी ॥ अमा भृगुसमायुक्ता सूर्य्यग्रहणयुग्यदि ॥ अपराह्णे यदा योगे मृतसंजीविनी तिथिः ॥ स्नानदानादिहोमांतमनंतफलदं भवेत् ॥

अष्टमी चैत्रमासीया संक्रमेण समन्विता ॥ सिद्धरात्रिरिति ख्याता तारा काली समाकलौ ॥ तृतीया माधवशुक्ला क्रूरवारर्क्षसंयुता ॥ दारुणा की
र्तिदा कि सर्वसिद्धेश्वरी परा ॥ क्रमेण कथितं सर्वं पर्वणा जाभिधं शृणु ॥ तृतीया पौषमासीया भृगुवासरसंयुता ॥ सापि चेत्मकराक्रांती कुलन
क्षत्रसंयुता ॥ चतुर्थीसहिता त्वेतस्या डेवती सहिता क्वचित ॥ पर्वणा जाभिधं पर्व सर्वपर्वोत्तमोत्तमे ॥ तृतीया चैत्रमासिया रेवतीसंयुता यदि
॥ सिद्धियोगे महे महेशानि होमकर्मणि शस्यते ॥ प्रतिमासे पौर्णमासी मासनक्षत्रसंयुता ॥ कुलवारसमायुक्ता मार्थितेः सुंदरी भवेत ॥ अष्ट
मी प्रतिमासस्य कृष्णपक्षस्य पार्वति ॥ भौमयुक्ता तथा ऋक्षयुक्ता वा केवला वचा ॥ देवी रात्रिरिति ख्याता सर्वसिद्धिप्रदायिनी ॥ चतुर्थी मा
घमासस्य मकराक्रा भवेद्यदि ॥ गणपरात्रीरिति ख्याति ॥ ॥ नवमी कृष्णपक्षस्य कुलनक्षत्रसमन्विता ॥ वारयुक्ताथवा देवि सिद्धरात्रिप्र
कीर्तिता ॥ चतुर्थी कृष्णपक्षे च कुलवारर्क्षसंयुता ॥ केवलं भौमयुक्ता वा वा ॥ रविः ससंक्रमः ॥ अमा भौमसमायुक्ता कुलर्क्षसंयुता यदि ॥ कृ
ष्णा रात्रीरिति ख्याता अक्षोभ्यप्रीतिकारिणी ॥ अमार्क श्रवणे याते युक्ता वेतुष्यमाद्ययो ॥ अर्द्धोदयं सविज्ञेयः किंचिन्न्यूनो महोदयः ॥ धर्म
रात्रिर्महेशानि कीर्तिते परमर्षिभिः ॥ अमा भौमेन सोमेन योगेन भृगुणाथवा ॥ गुरुणा रविनन्दे वि कुलनक्षत्रसमन्विता ॥ दिव्यमाण्डलिको

योगस्सर्वपर्वव्याताधिका॥ माघमासे शुक्लपक्षे सप्तमी या प्रकीर्त्तिता॥ सैषा तिथिस्तु साज्ञेया जपहोमादिके श्वरेत्॥ बुधाष्टमी तृतीया च ख्यातिमा
सस्यायो भवेत्॥ विद्युरात्रिरिति ख्याता भाद्रे मासि विशेषतः॥ माघे मासि शुक्लपक्षे पंचम्यां भृगुवासरे॥ वसन्तपञ्चमी प्रोक्ता कामसञ्जीविनी ति
थि॥ श्मशानिकं जपं होमा कीर्त्तनं कामनर्त्तनं॥ श्रावणी पौर्णमास्यान्तु तद्दक्षपरमेश्वरि॥ पवित्रारोपनं कार्यं रक्षां दक्षविधां चरेत्॥ पौर्णमासी चैत्रमासी
या तस्यां दमनपूजनं॥ प्रतिविद्याविधौ देवि प्रोक्तयोगे प्रपूजनं॥ एतद्योगपूजानाद्धि सिद्धिं विन्दति किं पुनः॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रो
तुमिच्छसि॥ ॥इति श्रीमदक्षोभ्य महोग्रतारासम्वादे शक्तिसंगमे त्रयोदशः पटलः॥१३॥ ॥श्रीदेव्युवाच॥ देवदेव महादेव सर्वेषां सुखवर्द्धना
केन सिद्धिं ददात्याशु तारा त्रैलोक्यतारिणी॥ श्रीमहादक्षिणा काली सिद्धिं काली प्रयच्छति॥ तन्मे वद महादेव यस्यान्ते वल्लभा॥ ॥श्रीशिवउ
वाच॥ रहस्यातिरहस्यं च कथयामि निवेश्यतां॥ सपथं कुरु देवेशि तोषितं चैव दाम्यहं॥ यथा त्वत्स्वराराध्या चैषा वर्ण्या विमुखी भवेत्॥ तथार्थेन महे
शेसि कथ्यते शृणु सांप्रतं॥ सिद्धिर्मधुमती नाम्ना प्रादुर्भूता तदाज्ञया॥ काली तारा भयन्वाम तत्प्रसादात् भूप्सिता॥ श्रीविद्या यासु खन्दत्तं का
लाकार युगं शिवे॥ तारया वाङ्मुखे दत्ता भुवनस्य हृदम्बुजं॥ छिन्नयाच राज्यं मातङ्ग्या नयनद्वयं॥ लक्ष्म्या ललाटे दत्तं च तथैव सिद्धविद्यया॥ केया

दत्ता महेशानि प्रत्यक्षो ब्रह्मा ह्यविग्रहा॥ हासस्तु बालपादश्च राजीदत्तो महेः महेश्वरि॥ भीष्मश्च हरु यो देवि शुभवत्यास्तु निग्रहः॥ श्मन्ये देवास्तु केशा
न्नवस्मा गंः हृदयास्तु जे॥ एवं सर्वा समाजाता तेजो राशिसमुद्भवा॥ महामधुमती सिद्धि त्रैलोक्याकर्षणी परा॥ पार्वतीति हन्वतीन्दुर्गाम्स्र तसंजीविनीय
रां॥ सर्वमाकर्षणतुर्णां त्रैलोक्याकर्षकारणात्॥ कालीतारामयान्धामः भाविर्भूत मभूच्छिवा॥ महापापसमस्तुष्टा पापसान्त परापराः॥ महामधु
मतीविद्या त्रैलोक्याकर्षणी परा॥ भेरवाकर्षणी विद्या चेतसाकर्षणी तथा॥ किन्नराकर्षणी देवी देवाकर्षणकारिणी॥ तस्या मंत्रं प्रवक्ष्यामि त्रै
लोक्याकर्षणं परं॥ पः पंचमं पाचकयुक्त नादविंदु विभूषितं॥ महाकामकलायुक्ता ड्रीं क्रान्तेकाक्षरीकला॥ मधुमतिसमुद्धृत्य नान्तां कामसम
न्वितं॥ स्थावरेति समुद्धृत्य जंगमाकर्षणीति च॥ युग्मान्ते वह्निजानायाचैकालार्णा प्रकीर्तिता॥ अष्टादशाक्षरी विद्या त्रैलोक्याकर्षणी
परा॥ कामदेव ऋषिः प्रोक्तो निवृज्ञायत्रिका ततः॥ छंदः प्रोक्तं महेशानि देवता शैवकीर्तिता॥ ड्रां बीजं च तथा स्वाहा शक्तिः प्रोक्ता महेश्व
री॥ स्थावरजंगमाकर्षणविनियोगः प्रकीर्तितः॥ षड्दीर्घभाजा बीजेन कुर्यादङ्गानि षट्क्रमात्॥ ततो ध्यानं प्रवक्षीत वक्ष्यमाणं महेश्वरि
गौरांगीं शरदिंदुसुंदरमुखीं॥ पीतांशुकापीवरां॥ प्रोत्तुंगस्तनमंडलां प्रविलसद्ग्रावनद्धैकावली॥ विन्तोत्तुंगतुरंगगाभिनयमापीतां गतां गंगजं

ध्यायेत्पायसलालसां मधुमतीं दोर्भ्यां दधानांस्टरीणीं॥ दिग्वन्धभूतभूर्ज्जादीन् कालीवत्समुपाचरेत्॥ पंचावरणकं नास्ति केवलां पूजयेच्छिवे
॥ सर्वविश्रान्तिवप्रोक्तः विशेषः कथ्यते श्रृणु॥ एवं ध्यात्वा जपेद्दिव्यां सर्वाकर्षणकारिणीं॥ पुरश्चरणसिद्ध्यर्थं सहस्राणां तु सप्तते॥ सिद्ध
मंत्रे सिद्धचर्या प्रोक्ता देवि मया तव॥ कदलीवनमाश्रित्य वर्षमात्रं महेश्वरि॥ सर्वकालं जपेन्मंत्रं पायसान्नपरायणा॥ वीरसाधनवद्देवि
लक्षमात्रं जपेत्ततः॥ ततः सम्प्राप्तिसाहस्रं प्रत्यक्षार्थं महेश्वरि॥ पायसं कदलीपत्रे पायसं घृतसारवं॥ भुक्त्वा मा चावते वीतज्जने शय्या
दर्तान्द्रितः॥ गन्धर्ववेषो गतभीर्विभागंपायसं चरेत्॥ श्लेष्महृत्य पुराकृत्वा तत्क्रमं श्रृणु पार्वति॥ एकाशीचां श्रृणु गमं चरकवसंपुराणमे
वच॥ पायसाशनपूर्वाशा स्वयं च भक्षरोछनैः॥ एकस्मिन्कदलीपत्रे मितुत्सर्गं समाचरेत्॥ प्रथमं सप्तमं याति गृह्णीमेव यथा तथा
॥ द्वितीयसप्तकं देवि प्रतिमा कांचनीमिव॥ तृतीये सप्तके देवि प्रत्यक्षा भाति पायसं॥ ग्रंददाति हृष्टतः साधकस्य यथेप्सितं तिष्ठंत्यहर्न्नि
शसार्धं साधकस्य यथेप्सितं॥ आकर्षणं च तु निधं सुमेरोश्च दिगं ततः॥ पाताले दिंडलोकाश्च हे मन्त्री शैलभूरुहाम्॥ असत्यानि च वाक्यानि दूरा
त्रूमितसादपि॥ नदीपुरी च रत्नानि समाकर्षति तत्क्षणात्॥ धनधान्यं च पुरस्थाना राज्ञा च कथयत्यपि॥ गृहस्थो विद्विषाश्चापि स्मत्वमत्वरमावि

शेत ॥ त्रैलोक्याकर्षणीविद्यानेदेयायस्यकस्यचित् ॥ षट्कर्मागृह्णात्वंसिद्धिदाशास्तुसर्वदा ॥ इतिसंक्षेपतःप्रोक्तोमन्त्रभेदाश्चसाधनं
॥ ॥ इतिश्रीशक्तिसंगमतन्त्रराजेताराखण्डेताराकाल्यङ्कःसिद्धिपटलःचतुर्दश ॥ १४ ॥ श्रीदेव्युवाच ॥ देवेशश्रोतुमिच्छामिमन्त्रा
न्त्राश्चसाधनं ॥ श्रीशिवउवाच ॥ एकाक्षरीचाशवीजा·थयुग्मात्र्यक्षरीभवेत् ॥ अहीनास्वाहयायुक्ता·त्र्यक्षरीकामपूजिता ॥ बीजसम्बो
धनंयुक्तो·पञ्चार्णापरिकीर्तिता ॥ बीजसंबोधनयुता·ठद्वयान्तामुनिप्रिया ॥ बीजसंबोधनयुता·स्वाहान्ताऋषिपूजिता ॥ सम्बोधनेन्च
युग्मान्ता·षड्वर्णासकलार्थदा ॥ संबुद्धिस्वाहयायुक्ता·सर्वाकर्षणकारिणी ॥ बीजकर्म्मान्तगाविद्या·महाविद्याप्रकीर्तिता ॥ कर्म्माद्यां
ठद्वयान्तांचरुद्राणीपरमेश्वरी ॥ कर्म्माद्याबीजआद्यान्ताविद्यास्यपरिकीर्तिता ॥ बीजकर्म्मान्ततःस्वाहान्तासिद्धविद्याप्रकीर्तिता ॥ बीजसं
बोधनपदं ॥ कर्म्मान्ताचकलापरा ॥ बीजसंबोधनपदं·कर्म्मठद्वयसंयुतं ॥ बीजसंबोधनपदं·कर्म्मस्वाहान्वितापरा ॥ बीजसम्बोधन
पदं·ठयुकस्वाहान्वितापरा ॥ बीजंचयुक्ततःस्वाहाविद्यान्यापरिकीर्तिता ॥ संबोधनठयुकस्वाहाविद्यासर्वार्थदापरा ॥ बीजंकर्मठयुक
स्वाहा·विद्यासर्वज्ञसुन्दरी ॥ संबोधनततःकर्म·ठयुकस्वाहान्वितापरा ॥ संबोधनततःकर्मःस्वाहान्ताशिवसुन्दरी ॥ चतुर्विंशतिभेदस्तु

गादिता परमा कला ॥ बाला मधुमती भिन्ना तथैव सुन्दरी मनोः ॥ निधिसिद्धो भवेद्विद्या त्रिभेदा सम्प्रकीर्त्तिता ॥ एवं त्रिंशति भेदोक्ता त्रैलो-
क्याकर्षणी परा ॥ बीजनेकदलीपत्रा वने गत्वा निशामुखे ॥ शुभे लग्ने शुभदिने शङ्काङ्कामनान्वित ॥ अष्टादशाक्षरस्यास्य महामधुमती
मनोः ॥ मन्त्रसिद्ध्यर्थमित्युक्ता गन्धप्रभृतिभिर्ज्जपेत ॥ एकविंशतिचाधृत्य दिवसानसमुज्जपेत ॥ षडङ्गं युग्ममार्गेन कृत्वा ध्यात्वा प्रपु-
जपेच्च ॥ गन्धपायसं कृत्वा कदलीपत्रगोचर ॥ बीजं मधुमती प्रोक्ता चतुर्थान्तं समुज्जपेत ॥ पायसन्तत्र दत्वा च दिवस्य च पुनः पुनः ॥ त-
स्याः समुच्चरन्त्या तु पुनरा च मनोरक ॥ दत्वा ताम्बूलमादर्शं प्रगाम्ये च पुनः पुनः ॥ पायसार्थं पृथक्कृत्वा शेषार्थं भक्षयेत्समं ॥ एक-
मात्पादिभिर्देवि दिव्याम्बरविभूषितं ॥ गन्धर्वं चेषं कृत्वा च प्रत्यहं नसह स्मृकं ॥ त्रिंशतं च चतुस्त्रिंशद्देकविंशतिवा सरान ॥ प्रजपेत्पर-
मेशानि देवता वरदा भवेत ॥ वरकस्य तु संयोगात्क्षिप्रं यौवनचान्यथा ॥ श्रीताराः पाशकाग्रन्तु कोटिकापाशकस्तु रा ॥ इमां विद्यां साध-
यित्वा सिद्धिमाप्नोति नान्यथा ॥ यस्य त्वार्थयते कामान्ता न्कामानक्षरोक्षरो ॥ ददाति सापरा विद्या सर्वाकर्षणकारिणी ॥ लोह्याकारसन्नद्धं दुर्गदेवा-
लये शिवं ॥ धनदं सकरं विद्ध्यु पार्वतीन्त्वा प्यारं धती ॥ एवं दशम शविद्या समाकर्षति तत्क्षणात ॥ लङ्कां समुद्रद्वीपानि सिद्धयक्षमहोरगाम ॥ स्वप्नता

न्यपि वत्सरान्निजसमाकर्षत तत्क्षणात ॥ सिद्धमन्या तु धानादीन्निधीन्सिद्धीनक्षशोनञ्च ॥ सुमेरुं स्वै वके सासंक्षणादाकर्षयेत्प्रिये ॥ मन्त्रे देहाश्रितन्देवि
त्रैकाल्यज्ञानमेव च ॥ सर्वम्वेदान्तिदे वे शिसावधानङ्करोति च ॥ त्रैलोक्याकर्षणी विद्या नदेया यस्य कस्यचित ॥ म्नादौ विद्यान्तु संसाध्यः ततः सिद्धिं समा
धयेत ॥ गोपनीयं गोपनीयं गोपनीयस्त्व योनिवत ॥ इति संक्षेपत प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीमदक्षोभ्य महोग्र तारा संवादे शक्तिसंगमत
न्त्राजे मधुमती सिद्धिविधिर्नाम पटलः पंचदश ॥ १५ ॥ श्रीदेव्युवाच । देवेश श्रोतुमिच्छामि क्रमदीक्षाविनिर्णय ॥ ॥ श्रीशिव उवाच ॥ रहस्यातिरह
स्यञ्च कथं तत्कथयामि त ॥ तथापि तव सङ्गतया कथ्यते शृणु साम्प्रतं ॥ चन्द्राग्निरपक्षघोराख्य परो निर्वाणतत्परा ॥ षट्शाम्भवन्नतो देवि च क्रमभेदनेन
च ॥ तच्चक्रे देहविज्ञानं प्रकारप्रवेशनं ॥ तत्ज्ञानाद्भवेन्मेधा दीक्षाप्रोक्ता मयातव ॥ हादाविदन्तिगादितं शृणु कादौ महेश्वरि ॥ चन्द्राग्निरसराज्ञी च ॥ म
हाराज्ञी ततः शिवे ॥ महाकामकलाकाली ॥ गुह्यकाली ततः शिवे गुह्यकाली द्विधा प्रोक्ता सकला निष्कला समाता ॥ दशवक्त्रा तु सकला प्रोक्ता वा शिशु
का कला उग्रा सौम्या महाक्रूरा त्रिधा साऽपि प्रकीर्तिता ॥ निःकलासु गुह्यकाख्यान्ना काली भेदे नकीर्तिता ॥ केवलेयं भवेन्मोक्षदायिनी सा राज्यप्रदायि
णी ॥ चन्द्राग्निवेदपंचार्णा तथा नीलां क्रमेण च ॥ हंसतारा महानीला तदन्त्वे वीनसंभवी ॥ केवला तु भवेमेधा सिद्धिक्रीडक्रियादि द्विधा ॥ चि त पीदिव्य

साम्राज्यमेधादीक्षाय कीर्त्तिता ॥ देवरूपा दिव्यरूपा मंत्ररूपा महत्परा ॥ सर्वरूपा सर्वपूर्वास्मिहला आज्यमेधया ॥ सिद्धिक्रमाद्धिक्रमे गौवमेद वाड्हल्य
मीरित ॥ विद्याराज्यभिधादीक्षाच्छिलमत्ताविधौ स्मृता ॥ चन्द्रवह्निरसैरंकैः रूपमाचे षोडशीतिथा ॥ परा षोडशसप्तदशी तत्तदतीता परे भवेत्
॥ दीपिका मालिनी कुब्जा क्रमाद्दिव्यादिराज्यता ॥ वगलाया महेशानि साम्राज्यपारमेष्ठता ॥ चन्द्रवेदस्वरूप्यमेषः मच्चहीनं शिवान्नो ॥ हृदयचक्र
ताराणां च पंचाशत्कुल्लुका तथा ॥ गायत्रीक्रमयोगेन साम्राज्यपारमेष्ठक ॥ एतत्तु चक्रसंयुक्तं सर्वसाम्राज्यवृद्धिधृक ॥ श्रीदिव्यसर्वसाम्राज्यदीक्षा
सर्वोत्तरा भवेत् ॥ ततोपि दीक्षा देवेशि नास्ति ब्रह्माण्डगोलके ॥ देवताविद्याप्रभेदाश्च महाविद्याप्रभेदता ॥ सिद्धविद्याप्रभेदाश्च महामन्त्रास्त
थैव च ॥ तत्क्रमे चार्द्दे देवेशि शावरं दशशावरं ॥ कालशावरकं देवि तथैव सिद्धशावरं ॥ त्रिधा दर्शनमंत्राश्च यत्किंचित्तन्त्रजालकं ॥ सर्वाधिका
रो देवेशि तद्दीक्षाविधौ भवेत् ॥ एतद्दीक्षासमायुक्ता साक्षात् श्रीकालिका स्वयं ॥ प्रहाम्बुक्रमे गौवरुद्रशाविद्यास्वरूपध्रक ॥ कामकलाभि
धाविद्या सभेदा गुप्तिदेवता ॥ अङ्गमन्त्रास्तु यान्यापि तास्या वाह्यागताः सदा ॥ क्रमदीक्षा महेशानि पंचविधास्तु भेदत ॥ तदङ्गमंत्रा गाय
त्रीकुल्लुकापंचकाः शिवे ॥ अन्यविद्याविधौ प्रोक्तं रहस्यातिरहस्यकं ॥ क्रमदीक्षाविनादेवी यो जपेत्साधकाधमः ॥ सदारिद्रो महापापी सुतहारी

प्रजायते ॥ श्रीविद्यायां कालिकायां·तारायां परमेश्वरि ॥ क्रमदीक्षामहादेवि·यजपत्साधकाधमः । सदरिद्री महाघोरी·लक्ष्मीहीनस्तु निन्दि
तः ॥ अन्धःकाराः कुशः कुब्जः पङ्गुः ॥ षंडस्तु कुष्टयुक ॥ सर्वेरोगयुताकृपा·दाधिचिन्तासमाकुला ॥ सुतहारीश्च स्त्रीहारी·कन्याराज्यविनाश
कः ॥ अथवा बहुलो भूपा ॥ मन्त्रक्षोभमवाप्नुयात ॥ देवताशापमाप्नुयात्तस्युपीडान्नऊहे सदा ॥ विद्यापारे वदे वेश्मि·स्त्रीहारी विकसेमदा ॥ क्र
मदीक्षासमायुक्ता·राजो भवति निश्चितं ॥ महाविभवसंयुक्ता·सर्वसिद्धिमवाप्नुयात ॥ विजयी विरयी साक्षात्सिद्धश्च सिद्धिदः शुभ ॥ प्रहृष्टात्मा
सन्यवेत्ता·त्रिकालज्ञकविः सुखी ॥ कोटिसिद्धिश्वरः शूलः सुन्दरः काममोहनः ॥ आनन्दात्मा परात्मा च·परातीतसुरोत्तमः ॥ राजराजेश्वरः साक्षात्म
हाकालसमः कृतौ ॥ एताद्दिव्या पाशकमप्दारिद्र्यन्दीनता क्वचित ॥ गुरुहीना क्रमत्यागा·त्संपदापो वियोगतः ॥ दारिद्र्यं प्रथमं भूपा नात्र कृ
र्याद्विचारणात ॥ चिन्तामणिगृहं यत्र·यत्र रत्नस्य मंदिरं ॥ नवरत्नात्मको पानं·सर्वैश्वर्यमयङ्गृहं ॥ कल्पवृक्षवनं यत्र·पारिजातवनन्तथा ॥ यत्र
मणेस्तु प्राकारो·दारिद्र्यं तत्र कुत्र वै ॥ तस्मात्क्रमविहीनस्य·दारिद्र्यन्तु पदे पदे ॥ क्रमयुक्तगृहे प्राप्य·क्रमं संप्रार्थयेत्सुखी ॥ अन्यथा गुरुमो
घेन·दारिद्र्यत्वमवाप्नुयात ॥ अन्यायुर्वैभिवे देवि·नात्र कार्याद्विचारणा ॥ विधिर्लोपस्तु समाज्ञ ॥ तस्याशीरातावजेत ॥ इति संक्षेपतः प्रो

न्नं कर्महीनस्य नैव फलं ॥ गोपनीयं गोपनीयं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीअक्षोभ्यमहोग्रासंवादे शक्तिसंगमतन्त्रराजे ताराखण्डे षोड
शपटलः ॥ १६ ॥ ॥ कर्मदीक्षाविधायक ॥ ॥ श्रीदेव्युवाच ॥ देवदेव श्रोतुमिच्छामि पुर्वोक्तं यद्रहस्यकं ॥ गोपनीयं गोपनीयं तदेव कथ्यतां ध्रुवं ॥ ॥
श्रीशिव उवाच ॥ रहस्यातिरहस्यञ्च यन्न कस्यापि कीर्त्तितं ॥ तदेव कथ्यते देवि शृणु सावहिता भव ॥ उद्यापनमुपाकर्म पवित्रारोपणन्तथा ॥ विविधं
तुप्रकारं च रक्षाबन्धनन्तुत्तरं ॥ कर्मेणापरमेशानि साधकः कारयेत्सदा ॥ चैत्रमासि पौर्णमास्यां दमनारोपणं चरेत् ॥ श्रावणे मासि तत्प्राप्ते
पवित्रारोपणं क्रिया ॥ न कुर्यात्साधको यस्तु निष्फलाः सकलाः क्रियाः ॥ वर्षमात्रकृतं जापहोमपूजादिसत्क्रिया ॥ सर्वं हन्ति महेशानि तस्मादेत
त्समाचरेत् ॥ आद्यौ नित्यौ महेशानि ततो नैमित्तिकं चरेत् ॥ उपाकर्माभिधं कर्म नित्यवत्परिकीर्त्तितं ॥ नैमित्तिकं पवित्राख्यं कामारक्षाविधिर्भवे
त् ॥ नैमित्तिकद्वयं यत्र तदन्यां काम्यमुच्यते ॥ काम्यद्वयं यत्र भवेत्तदाद्यश्च नैमित्तिकं ॥ त्पद्वयं यत्र भवेत्तदन्यं काम्यनित्ययुक् ॥ आश्वलायनानां
श्रवणे पुरा कात्यायने भवेत् ॥ पौर्णमास्यां सामगानां पञ्चम्यां हस्तजे पि च ॥ उपाकर्म प्रकर्त्तव्यं तदन्तेतिसपूजनं ॥ ततः पवित्रपूजायां ततो रक्षावि
धिर्भवेत् ॥ सूतकोदितये देवि ग्रहणे संक्रमे करे ॥ उपाकर्म निदेवेशि कुर्याज्ञाडपदेन ॥ पवित्रं लक्षणां शान्तिं कुर्याज्ञाडपदे सदा ॥ पञ्चम्यां स्व

॥श्या·तं॥
॥५८॥

दशम्यांच चतुर्दश्यणान्नथैवच ॥ पौर्णमास्यां विशेषेण गोकुलयोगविशेषतः ग्रहणातत्र चेद्भूयाः अक्षयोगं समाचरेत् ॥ तत्र नित्यं प्रकर्त्तव्यं सूर्याकर्म
ततो भवेत् ॥ श्रीचित्रग्रहादेवि सूर्यमेधं समुत्सृजेत् ॥ अधिवास्य चतुर्दश्यां पौर्णमास्यां प्रपूजयेत् ॥ द्विभिकोणे यातिग्रंथिं सप्तविंशतिरेव च
चतुःपञ्चाशदेवेशि शतमष्टोत्तरं तथा ॥ पञ्चविंशतिवारं ग्रंथिः त्रिशतं वा सहस्रकं ॥ अष्टादशयोगिमध्यं ॥ सुक्रमात्पवीरं कीर्तिता ॥ उत्तमादि त्रि
भेदेन पवित्रं त्रिविधं भवेत् सूत्रपट्टं स्वर्णमयं कुशजं लोमजं च वा रक्तजं गोपत्रं दीक्षां ॥ नाडजं शाणिकं मौञ्जं ॥ सार्द्धग्रन्थिद्वयं चैव सार्द्धग्रन्थित्रयं त
का ॥ एकग्रन्थिश्च वा देवि क्रमेणाकारयेत्प्रिये ॥ सार्द्धग्रन्थिद्वयं देवि नानागणाख्यं प्रकीर्तिता ॥ सार्द्धग्रन्थित्रयं देवि भवत्यग्रन्थिप्रकीर्तिता ॥ एकग्रन्थिम
हेशानि सर्वानियग्रन्थिसंख्यया ॥ पद्मनेत्रनियमं स्वर्णरौप्ये पिनाकिनि च ॥ स्वर्णसूत्रमये देवि स्वर्णजे ग्रन्थिरीरिता ॥ ग्रन्थिं कृत्वा महेशानि पूजये
द्ग्रन्थिदेवतां ॥ स्वर्णजे वेद्मवक्षोक्ता शिवपदसमुद्भवा ॥ स्वर्णा आद्या क्रमशः अन्यान्नद्वयोक्तान्नुसारतः ॥ पञ्चसिद्धिविधौ देवि रत्नजा परिकीर्तिता
॥ वर्णत्रिकोणं भूबिंबषट्कोणं च षडस्रकं ॥ दलाष्टकं चत्वारे दशारस्थवनारकं ॥ द्वादशारं ॥ षोडशारं पञ्चारं च चतुर्दलं ॥ इत्ताङ्गं चक्रत
द्गं च यन्त्रराय तानि कारयेत् ॥ मध्ये यन्त्रे चर्पीतो रत्नानि विविधानि च ॥ धारयन्त्य मिशानि पवित्ररक्षणाय च ॥ त्वगादिदोषरवनाशनाय ग्रन्थ

॥श्याम॥
॥५८॥

पः परिकीर्त्तिता ॥ उन्नमादित्कमेणौ वं कारयेत्परमेश्वरि ॥ माणिक्यंच तथारत्नं कुलीवेन्द्रमणिस्तथा ॥ हीरके चैव वैदुर्यं गोमेदपु
ष्परागके ॥ पद्मरागे नीलमणौ हीरतेशोणरत्नके ॥ कार्के परिश्रेकीर्त्तिः शिवरत्ने च विद्रुमे ॥ विन्दुरत्ने च मायूरे याच्चे कुक्कुटसंज्ञके
राशेक्षे च चन्द्रमणौ प्रवाले मौक्तिकावरे ॥ रक्षायन्त्रफलं देवि कोटिरत्नसमप्रवेत ॥ यन्त्राण्येतानि विलिखेत् सर्वकार्यार्थसिद्धये ॥
श्रीविद्यायां कालिकायां तारायां छिन्नाविधौ शिवे ॥ मातायां भुवनेश्वर्यां कमलायांश्च कारयेत ॥ चतुर्दलमहेशानि वीरमात्रं च आलिखे
त ॥ चपशोभाय यादेवि यथायुक्त्या समाचरेत ॥ यथावधृतिमंत्रेण त्वंपविष्ट नवाप्रिये ॥ आपदुधारके शापि मूलेनाविच्ययाक्रियात ॥ गृस
गाम्बन्सरोद्देवि रक्षा सर्वज्ञता भवेत ॥ वलीसुरवेश्वरस्यार्थ ज्ञानार्थं गोतमादिभिः ॥ मोक्षार्थं कपिलाद्येश्च शाक्यार्थं शंकरादिभिः ॥ सत्त्वभे
दात्कमेणौ व यथायोगेन वैशृणु ॥ श्वेते रक्ते तथा पीते नीले च हीरते पि च ॥ कर्पूरे वक्त्र चित्रे च यथायोगेन कारयेत ॥ स्वर्णाशिकामना भे
दाश्च यथायोगेन कारयेत ॥ सर्वसिद्धीश्वरो भूयात्तन्त्रकायाद्विचारणात ॥ प्रीतिविद्याविधौ देवि पवित्रा लोपनं भवेत ॥ प्रीतिविद्याविधौ देवि
रक्षावरांकमाद्भवेत ॥ अष्टगन्धभवं सूत्रं जीवच्चक्रभवं च वा ॥ पुष्यराजसारभवं मन्त्रात्य च चाप्रिये ॥ तथैवागुरुसारोत्थं सूत्रं प्रोक्तं महेश्व

री॥ रहस्यातिरहस्यं च रहस्यातिरहस्यकं॥ गोपनीयं प्रयत्नेन·गोपनीयं स्वयोनिवत॥ अस्मा गाड गोरक्षं यावत्·पाका त्रिजगतीतले
समस्तानां सिद्धयादेर्विरक्षाधारकसाधके॥ सम्प्रवक्ष्ये महेशानि नात्र कार्या विचारणा॥ नाडीसिद्धिर्भवेद्देवि नात्र कार्या विचारणात्
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि॥ ॥इति श्रीशक्तिसंगमतन्त्रे अक्षोभ्यमहोग्रासम्वादे सप्तदशः पटलः॥१७॥ ॥श्रीदेव्युवाच
देवेश श्रोतुमिच्छामि·गोप्यागोप्यं महोत्तरं॥ ॥श्रीशिव उवाच॥ रहस्यातिरहस्यं च कथने शृणु सादरं॥ पूर्णाभिषेकदीक्षादिषु ज्ञानामपि
पार्वति॥ पवित्रारोपनं रक्षा·सभेञ्च परिकीर्तितं॥ सन्ध्याधिवासनं वापि·पूर्वाधिवासनं च च॥ कृत्वा पवित्रकन्नैव्य सर्वकार्यार्थमेव च॥ सर्वान्त्र
चपरिसे·तथा गरुडरत्नके॥ सर्वरक्षारासिद्धार्थं रक्षाणां वन्धनं श्रेरत्॥ तारे श्रीकामगाख्या या·काली छिन्ना च तारिणी॥ वगलाविमलाभूञ्ज
·वञ्चोर्जगा षड्क्रमं॥ त्रितारः पञ्चतारश्च सप्तर्षिरश्वयोगतः॥ श्याकर्षिरणा परांम्बा या· पराप्रासादकेपि च॥ वीजारोपनानि वा गाथ्य·प्रेनके
·कारक्रमतः॥ एकादित्रिचतुःपंच·षडर्णा क्रमयोगतः॥ विद्यासंयोजपे·यन्त्र·सर्वसिद्धार्थमेव च॥ श्रावणं पुरणी मात्मनुरक्षान्यथाविधाश्रेण
गोरक्षाहयरक्षा च·गजरक्षा तृतीयका॥ जनरक्षा देशरक्षा गृहरक्षा समभिधा॥ धनरक्षा वालरक्षा·क्षत्ररक्षा पराया ता॥ सर्वरक्षा च दशमी

रक्षादुर्गाविधा मता ॥ अष्टम्यां च नवम्यां च पञ्चम्यां दशमीदिने ॥ चतुर्दश्यां पौर्णमास्यां पक्षयोरुभयोरपि ॥ उपाकर्म भवेद्दोः मत
ःपवित्रधारणं ॥ रक्षाबन्धस्तदन्तस्याः क्रमात्रिवित गमाचरेत् ॥ चतुर्थ्यामधिवासो हि गणेशे परिकीर्तितः ॥ पञ्चम्यां धारणं कार्यं मातङ्ग्या
मधिवासनं ॥ दशम्यां धारणं कार्यं सप्तम्यामधिवासनं ॥ अष्टम्यां पूजनं कार्यं धार्यं भौरं महेश्वरी ॥ अष्टम्यामधिवासो हि नवम्यां धारणं
शिवे ॥ शाक्तेषु प्रोक्तमिदं देवि पञ्चरात्रक्रमे श्रृणु ॥ नवम्यामधिवासो हि दशम्यां धारणं चरेत् ॥ वैष्णवे चैव द्वादश्यां त्रयोदश्यां वि
धारणं ॥ अधिवासश्चतुर्दश्यां पौर्णमास्यां प्रपूजनं ॥ शिवे प्रोक्तमिदं देवि श्रीविद्यायां च पौर्णिमा ॥ चान्द्रेपि पौर्णमास्यां तु पवित्रधार
णं चरेत् ॥ कुशैः काशैः सदा कार्यं पवित्रं ब्रह्मचारिणां ॥ वनस्थानां सनभवं च सरीणां भूवश्च वा ॥ यतीनां क्षौरिकान्ते च सर्ववर्णा गृहीत्वा च
॥ राज्ञः सुवर्णसूत्रं स्यात् क्षत्रियाणां च रौप्यजं ॥ द्विजानां सत्सूत्रं स्मृतं ॥ क्रमेणापरिकीर्तितं ॥ तथैव रक्षणं देवि सर्वथा समयाच्च च ॥ अत्रार्थे देवदेवे
शि शृतिहासन्त्वं शुभे ॥ पुराश्रीकान्तिके पार्थ पार्वत्या रक्षणं कृतं ॥ शच्या देवेन्द्ररक्षणार्थं जयाय वृत्रनाशने ॥ महाविद्यादिभिः पूर्वं रक्षितो
वटुकः पुरा ॥ पूर्वं कृतयुगे देवि नकृपः कृचिरेश्वरा ॥ उपाकर्म विधायाथ पवित्रारोपणं स्थितं ॥ कृत्वा पवित्रं यत्नेन देवेन्द्र शरणागतः ॥ त

॥ श्रा·त ॥
॥ ६० ॥

मार्गमध्ये देवेशि विनारक्षोपयोधमः॥ पुत्रो विपर्ययो जातो रक्षाहीनान राधिपः॥ रक्षाबन्धनमात्रेण गान्धा शहाद्दशारक्षणां॥ अकृतं देवदेवेशि
मतिभ्रष्टो नरो वै भवेत्॥ वर्षमात्र कृता शार रक्षाबन्धनयोगतः॥ अकृत्वा पंचत्रे महादेवि वीजाकेरपि पावति॥ अकृत्वा वीजैः पताकाद्यैः सर्वत्र रक्षा
णां भवेत्॥ वेदसंस्कारसवाग्नेः चौकाकर्म प्रकीर्तितं॥ गृहीतमदमन्त्रेण रक्षणानुपवित्रकं॥ तदाविष्टान्निरक्षार्थं रक्षाबन्धनमीरितं॥ तस्मा
त्सर्वप्रयत्नेन रक्षाबन्धनमाचरेत्॥ विना रक्षां महेशानि वर्षमात्रकृताः क्रियाः॥ सकलानि फलादेवि देवता विमुखो भवेत्॥ सर्वैरपि
देवेशि रक्षाबन्धनमाचरेत्॥ सर्वरक्षाप्रदा देवि भवन्त्येव न संशयः॥ नित्यनैमित्तिककाम्यं कर्माचितमीरितं॥ इति संक्षेपतः प्रोक्तं किं
मन्यच्छ्रोतुमिच्छसि॥ ॥श्रीदेव्युवाच॥ देवश्रोतुमिच्छामि रहस्यातिरहस्यकं॥ ॥श्रीशिव उवाच॥ किंतद्रहस्यं देवेशि तद्वदस्व वि
यंवद॥ ॥श्रीदेव्युवाच॥ पवित्रारोपनं कर्म दमनारोपणं तथा॥ कथ्यतां देवदेवेशि यद्यहं तव वल्लभा॥ ॥श्रीशिव उवाच॥ आषाढे
उत्तमो मासः श्रावणो मध्यमः स्मृतः॥ हीनो भाद्रपदे मासः पक्षौ शितिशिततरौ॥ प्रशस्तः शुक्लपक्षस्तु तदभावे परः स्मृतः॥ पंचमी चा
ष्टमी चैव नवमी दशमी तिथौ॥ द्वादश्यां च चतुर्दश्यां पौर्णमस्याम् अथापि वा॥ पर दमनं देवेशि तत्तु कार्या सञ्जनितन्नथा॥ त्रिगु

॥ राम ॥
॥ ६० ॥

गांत्रिगुणीकृत्य॥ प्रशान्त्या मलयवासिना॥ पश्चिमास्याकृ मनुमितिः हृच्छिरोः सो[illegible]येद्गत॥ मन्त्रारथपवित्राणि मनोरम्याणि कारये॥ अष्टो
त्तरशतं श्रेष्ठं मध्यमन्तु तदर्द्धकं॥ तदर्द्धञ्च कनिष्ठं स्यात् यथाशक्त्या तु पूर्ववत्॥ पूर्वोक्ततत्वभेदेन कलभेदेन: ज्वभेदेन वा प्रिये॥ कृ
त्वा पवित्रं यत्नेन ग्रन्थीन्दत्वा विधानत॥ अन्तरस्यादितैर्मन्त्रैर्दशग्रन्थीन्तु कारयेत्॥ पञ्चवैर्वा चिद्यसंयुक्तं कुंकुमादिभिरद्रिजे॥ पवित्रदा
नदिवसे पूर्वेद्युरधिवासनं॥ तत्रोपिवासनं वापि कुर्यात्तु परमेश्वरि॥ रात्रौ समायाभिः साकं नित्यपूजामनन्तरं॥ कुंडे सिंहासने मन्त्रैः सूत्रपा
तन्तु वामत॥ प्रार्थयित्वा तु वर्णाभ्यां कृत्वा रक्षावगुण्ठने॥ दन्तकाष्ठं तथा गन्धस्त्रा सश्चन्दनमृत्तिका॥ सिद्धार्थश्च तथा धात्रीफलं शृंगा
रभूषणं॥ नकुलमष्टसुपरार्विज्ञेयादन्तरोत्तरं॥ पूर्वादिदिक्षुक्रमशः पवित्रं सूत्रभाजनं॥ अश्वत्थपत्रपात्रेषु॥ प्रसिपेसिद्धिहेतव॥ हुंकार
सामवेदेश ब्रह्मनागा शिवध्वजा॥ सूर्यसदाशिवो सर्वादेवनारायन्ते वापरा॥ सूत्रेषु पूजयेद्ब्रह्मविष्णुरुद्राश्च त्रितन्तवे॥ कृपाञ्चपो हृषीवीरा
गायत्री चापराजिता॥ जया च विजयादुर्गा वसुक्तिदा च सदाशिव॥ मनोन्मनी च नवमी दशमी रौद्रवर्तो सुरवी॥ ग्रन्थिस्थादेवताः पूज्या रूप
चौरः कलात्मके॥ पूरमन्त्रेन चामन्त्र्य॥ पवित्रेषु कलासमपत्॥ नित्याः षोडशदेवेशि श्रीविद्याश्च स्मरेत्प्रिये॥ अष्टौ वारा चाष्टवाणी कलास्था

नेत्र पूजयेत॥ कात्यानित्यादिनित्याश्च पूजयन्परमेश्वरि॥ अविधिवा सविधिर्वाक्तः पश्चादाराधनं भवेत॥ नित्यार्च्चनानन्तरे तु नैमित्तिकमि
धं भवेत॥ समस्तेभ्यः पवित्राणि कन्याकाभ्यः समाजनं॥ स्वगुरुं पूजयेत्पश्चात् वस्त्रालंकारगोधनैः॥ यथाशक्त्यानमस्कृत्य देवीरूपेणचि
न्तयेत॥ आरोपयेत्पवित्रश्च वित्तशाठ्यविवर्जित॥ गुरुः संपूज्यते यत्र तत्तत्कर्मफलावहं॥ सचान्नपूज्यते यत्र क्रिया सानिफलं सदा
॥ गुरोरभावतत्पुत्रः पुत्राभावे तदङ्गना॥ तदाभावे च तत्पौत्रे दौहित्र तदसंभव॥ सर्वाभावे तदन्यत्र गुरुगोत्रसमुद्भवं॥ पूजयेद्दीक्षितं य
त्र तत्र ताः सफलाः क्रियाः॥ न पूज्यते निष्फलास्ताः भवन्ति परमेश्वरि॥ कृत्वापूर्णाहुतिं पश्चाद्दत्वादोषापविक्कं॥ चक्रमभ्यर्च्य सिद्धार्थे पूज
येत्तन्निवेदयेत॥ नकरोत्पवर्नं कश्चेनो तस्य धर्मा विनिष्फलं॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि॥ ॥इति श्रीमदक्षोभ्यतारासंवादे
शक्तिसंगमतन्त्रे कामदीक्षापवित्रारोपणन्नाम सप्तदशः पटल॥१७॥ ॥श्रीदेव्युवाच॥ देवश्रोतुमिच्छामि इतिहासपुरातनं॥ ॥श्रीशिव
उवाच॥ शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकं॥ भक्तिश्रद्धापरा याते नाकथ्या विद्यते मम॥ न चारोप्यं त्वया मन्त्र आगोपि विगलत्यपि॥ रहस्य
मेतद्देवानां सर्वसिद्धिमभीप्सतां॥ न च विघ्नामथायोगान्न विधानं न चार्च्चनं॥ नान्यः प्रयोगो न जपो न होमो न च पूजनं॥ वक्ष्यमानसहस्राणस्य सह

ग्रोशं न चार्हति ॥ सिद्धिमीयुः पुरे तस्याः प्रसादात्पार्थिवर्षभ ॥ पौरूवो नहुषश्चैव सोमदत्तो नहुषस्तथा ॥ अजमीढः कार्त्तवीर्य्यो भजश्चैराप पुरूरवा
॥ पृथुर्गयोरातिर्देवो मान्धाता नहुषो रघुः ॥ विदूरथश्च भरतो दिवोदासः प्रतर्द्दनः ॥ हरिश्चन्द्रो यमदग्निश्च जैगीषव्यश्च देवलः ॥ पैठीनसी वी
तिहव्यः कश्यपो भृगुरङ्गिराः ॥ संवर्त्तश्च वसिष्ठोऽत्रिर्व्यासः शातातपस्तथा ॥ उद्दालको भरद्वाजो जावालो जैमुनिस्तथा ॥ सप्तद्वीपेश्वरत्वं च
चक्रवर्त्तित्वमेव च ॥ वायुपूर्वमहीपालाश्चिरंजीवित्वमप्यलं ॥ योगसिद्धिं तथान्येपि तपस्या सर्वथाधिकां ॥ सापानुग्रहसामर्थ्यप्राप्तवंतो म
हर्षभ ॥ त्रैलोक्याधिपतित्वं च यत्प्रसादात्कोपस्थितं ॥ ताराक्षः कमलाक्षश्च विद्युन्माली तथैव च ॥ एते त्रयः समत्कान्तगुणो दैत्यास्तारसूनवः ॥ ते तप्य
न्ते तपो घोरं दिव्यं वर्षशतत्रये ॥ ततः प्रजापतिस्तेभ्यो वरं संप्रार्थितं ददौ ॥ चतुर्वरहूपं दत्वा सोऽदैर्य्यमदगर्विताः ॥ एकस्तेषामवध्यत्वं सर्वभूते
भ्य उत्थितं ॥ द्वितीयं योजनानां हि त्रिरक्षान्तरस्थितं ॥ त्रयाणां त्रिपुरं भूमौ नलंघ्यं दैवतैरपि ॥ वरं दत्वा च दद्भाता सर्वशृणुत पुत्रकाः ॥ सर्व
प्रकारैः कस्यापि नावध्यत्वं जगत्त्रये ॥ एकेनापि प्रवारेण घटमानेन सर्वथा ॥ सर्वेश्वकोरं निधने मृड्ढो कुरुत तदाहं च ॥ तेविद्धा सर्ववद सर्वेश
रेणैकेन यः शराग्रात् ॥ दहेत्त्रयाणां त्रिपुरं सतो मृत्युर्भविष्यति ॥ तथैव सृष्टारपोतेधा ब्रह्मलोकं पुरे युतं ॥ तेपि सर्वे तथा चक्रुर्यथा पूर्वं विचार

रितं ॥ तारारत्नस्यसे वर्णा पुरं पूर्वं व्यरिस्थितं ॥ योजनायुतविस्तीर्णा नामदेवायतोऽभये ॥ राजते कमलास्यस्य योजनायुतविस्तृतं ॥ दशसा
हस्रविस्तीर्णा विद्युन्मालिनभोपमं ॥ त्रिविरक्षांतान्नेषांपुरङ्कुमनसीमति ॥ प्रकारपरिवोपेतं त्रयाट्टालकशोभितं ॥ ध्वजगोपुरनिश्रे
णी पताकापच्च शोभितं ॥ खड्गपाशांकुशाशिष्टकदाकार्मुकधारिभि ॥ पाशशूलभुशुंड्यार्षिचक्रमुद्गरशोभिभिः ॥ त्रिशन्निखर्वषट्वृ
न्दैः नवत्यर्बुदकोटिभिः ॥ एकैकं पुरमाक्रांतं दानवैर्युद्धदुर्मदैः ॥ दृष्ट्वातु तान्हरीशींश्चाज्ञि देवाः सर्वे सवासवाः ॥ पलायांचक्रिरे केचित्केचि
च्छापितमभयेः ॥ केचिच्च गुरुधुर्दृ वामात्यज्ञात्रिदिवं परे ॥ केचित्समुद्रं विविशुः केचिच्च गिरिकन्दरं ॥ जक्कुः केचिद्दियाप्रागारात्ज्ञगुः के
चिच्चतुर्दिशं ॥ दृष्ट्वा पुरागामधियादेवानामीहृशींदशां ॥ रुद्रजह्नामशरणं पुरोधायप्रजापतिं ॥ दुताडवत्मरातं भूत्वा तेदेवाः सपि
तामहाः ॥ ऊचुः प्राञ्जनयोभूत्वा पिनाकिनमुमापतिं ॥ तपस्यायावरान्धातुः संप्राप्यात्रिपुरासुराः ॥ वाधन्ते स्मान्महेशानि शौलगह्वरगानपि
त्वन्नः सरणं नास्माकं विद्यते देव कश्चन ॥ अतो निवेदयामस्ते प्रथमाधिपते प्रभो ॥ दवाङ्गनास्समाकृष्य नयन्तित्वपुरप्रति ॥ निरध्वं जगज्जा
तं निःकल्पतरुनन्दनं ॥ निर्मनुष्या मही सर्वा निर्देवाप्यमरावती ॥ निस्तोपनिम्नगा जाता नीरत्नाः सप्तसागराः ॥ पादपानां कोटरेषु कन्दरेषु महाम्भृतां

॥ लीनाभूत्वा वयं सर्वे तिष्ठामस्तत्र पार्दिताः ॥ तेषां हि समस्तानां त्रैलोक्ये त्वदन्यो नास्ति कश्चन ॥ तान्निहत्यासुरान्स्वर्गे पुनरस्मान्निवेशय ॥ इत्युक्त
स्त्रासितैः सर्वैर्विहस्य वृषभध्वजः ॥ प्रत्युवाच सुरान्सर्वान्रथो मे कल्प्यतामिति ॥ ततो ब्रह्माब्रवीत्तत्र स्मितं कुर्वन्महेश्वरं ॥ निर्मातव्यो रथो देव क
स्त्वदारोहणक्षमः ॥ त्वद्धारो रथनिर्माणे सामर्थ्यं नैव विद्यते ॥ त्वया गणसंपदनं चास्त्रं कर्तव्यं षोडशिकामपि ॥ त्वमेव कल्पयस्वाद्य स्वबुद्धिः कस्या
स्ति शंकर ॥ इत्युक्तो ब्रह्मणा शंभुः सुरवद्धर्षयन्नसुरान् ॥ चत्वारो वाजिनो वेदास्तेन चोणकर्मणा जय ॥ वेदाश्च यावन्तो यान्ति सर्वासुरविमर्दना
: ॥ ताराश्चस्यन्दनपत्तेन चोणाकर्मप्रभावत ॥ क्षाराभवति भो ब्रह्मकमलाक्षं पवित्रतः ॥ वर्षमात्रकृताशांति पवित्रमृषिभिः स्मृतं ॥ कमलाक्षत
पःक्षीणां पवित्रं सा प्रजायते ॥ सर्वस्वस्त्ययनं नाम पवित्रारोपणं मतं ॥ चत्वारो वाजिनो वेदाः सपुराणा मेदिनी रथ ॥ सूर्याचन्द्रमसौ चक्रे कुवरो गंध
मादनः ॥ विंध्यो गिरिर्नाभिरस्तु कैलाशाक्षस्त्वमेव च ॥ मेरुर्मे ध्वजदंडः स्यात्सारथिर्भगवान्विधिः ॥ प्रणवस्तु प्रभेदाः स्यात्तुरगाणानि च रश्मयः ॥ धनुर्मे
मंदरो भूयाच्छिंजिनी वासुकी भवेत् ॥ विष्णुः शरो मे भवतु वाहे वायुर्विशन्नपि ॥ यमोस्त्वत्र श्वकालश्च फणीमध्ये विशतु च ॥ वासवश्चारथश्रेष्ठस्या
त्कुवेरवरुणावुभौ ॥ भवतः सुरवरस्थाने मस्तके सर्वदेवता ॥ नासत्यापरिनीसंस्थाप्यज्ञाः सर्वेपदातयः ॥ अष्टांगदशविद्याश्च शास्तास्थानेश

नामकं ॥ षट्त्रिंशद्गुलो वंशो मनुबंधनसंयुतः ॥ मन्त्रयुक्तादित्यरूपा·शारा पिनाकगोचरा ॥ पिनाकवापराश्च्च·वेत्तिकाली सदाशिवः ॥ रव
रुपान्यच्च सवलं कल्पयामास शंकरः ॥ अत्र श्रुकवचं घोरा लब्धा रक्षां विना शिवः ॥ त्वयोगपं रक्षणां शंभुरलब्ध्वा चिन्तितो भवत् ॥ नीमील्य
त्राणि मे त्राणिनश्चिरं तस्थौ जगत्पतिः ॥ अथ ध्यानगतो भूत्वा तुष्टाव विश्वतारिणी ॥ स्तुत्वा संप्रार्थयामास रक्षां दशविधां परां ॥ ततः सोयं दिदेशा
स्मै रक्षां दशविधां परा ॥ दक्षविद्या महीरक्षा त्रैलोक्यविजयाभिधा ॥ वेदसंदीपनाकुलसंदीपका तत्र प्रकीर्तिता ॥ चतुराशीतिभेदानां राशीवि
द्या परात्परा ॥ रसाज्ञा येन्नैव विधै·पुष्टा खलागर्भदिनी ॥ तत्र मनात्राभिधा स्वर्गे त्रैलोक्यविजया भुवि ॥ आकर्षणा गत्वा पाताले·त्रिपुरासुरघा
तिनी ॥ कालीसुखाभिधा वैरि जने वा दिङ्मने तथा ॥ तारासुखाभिधाड्डाकाभिस्तुत्वा रक्षणनु सर्वतः ॥ त्रिशक्तिर्विद्या रूपत्वा·त्रैलोक्यविजयाभिधा ॥
त्रयाणां नाशनार्थं च·त्रिशक्ति रक्षणां परं ॥ आज्ञा जगाम संतुष्टः शंकरस्त्रिपुरं प्रति ॥ अत्र पाशुपतं चापे सन्धाय वृषभध्वजः ॥ पुराणि त्रीणि
दैत्यानां विभेदैकेन पत्रिणा ॥ क्षणेन भस्मसात्कृत्वा जग्मु दैत्याय मानसं ॥ ततः प्रभृति श्रीदेवि·रक्षारक्षेति विश्रुता ॥ लोकोत्तराभिधा रक्षासम
र ख्यातया त्रमविष्यति ॥ इति वृत्तं पुरावृत्तं·तं नरक्षा प्रकीर्तितं ॥ विद्यामिमं मंत्रितं सूत्रं·यस्तु धारयते नरः ॥ रक्षा भवति सर्वेषां दुष्टानां विघ्नका

रिणां ॥ महाविघ्नमहाभूतप्रेतनाराक्षसादयः ॥ दैत्याश्च दानवाः क्रूरा नश्यन्ति श्रवणमात्रतः ॥ इयं मेद पुराणस्थानवक्तव्यप्रकाशिता ॥ महाविद्या
दिग्दशोकेन वक्तव्या वटुकेभैरवे यन्त्रपताकासूत्रं च मन्त्रवर्णविगर्भितं ॥ सर्वथावर्त्मयेद्दीक्षा सर्वज्ञता भवेत् ॥ आवयोर्मासिसंवृत्तं वृन्नेम
मस्तु गणासिवे ॥ गोपनीयं गोपनीयं गोपनीयं स्वयोनिवत् ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीमदक्षोभ्य महोग्रतारा
संवादे शक्तिसंगमतन्त्रे राजेड्याकर्म पवित्रारोपणविधिर्नामाष्टादशः पटलः ॥ १८ ॥ ॥ देव्युवाच ॥ देव श्रोतुमिच्छामि दमनारोपण
क्रिया ॥ शिव उवाच ॥ पवित्रारोपणायन्तद्दमनपूजनं ॥ चैत्रादयश्च ये मासाः पक्षौ सितासिते तयोः ॥ एतेषां पूर्वपूर्वस्तु कालः सर्वोत्तमो भवे
त् ॥ अष्टम्यां च चतुर्दश्यां पौर्णमास्यामथापि वा ॥ पूर्वरात्रौ प्रकुर्वीत सम्यग्वासाधिवासनं ॥ आमन्त्र्य दमनं चैव्यो चतुःकल्पततोदिभिः ॥
कामनेत्रसमुद्भूत रतिनेत्रजलाप्लुत ॥ ऋषिगन्धर्वसिद्धानां विमोहकानमस्तुते ॥ शिवप्रसादसंभूत अत्र संनिहितो भव ॥ शिवकार्यं समुद्दिश्य
नेतव्योसि शिवाज्ञया ॥ इत्यामन्त्र्य रतिकामे तत्र संपूजयत्सुधिः ॥ त्वयस्तुत्वा च दमनं समूलं पल्लवैर्युतं ॥ आनीतो ह्यथवान्येन सोत्पाद्य
नीतमीश्वरि ॥ वामेन स्थापयेद्देवि सर्वतोभद्रकोष्ठके ॥ वस्त्रवार दमनपात्रे स्थापयेत्पूजयेत्पुनः ॥ प्रणवस्तु वनेशानि रतिन महे त्वपि ॥ रति

॥ श्या॰तं ॥
॥ ६४ ॥

मंत्रो मेह श्यामि कामं मंत्रस्तु कथ्यते ॥ प्रणवं कामबीजं च कामायन महत्यपि ॥ मंत्राभ्यां पूजयत्तत्र दमने कर्णिकागतं ॥ ततस्तन्त्वम्न पूर्वादि
दलेषु एसिकान्यसेत् ॥ अष्टस्वष्टाष्टभिर्मंत्रैरष्टद्रव्या युताः कामात्तु ॥ कामो भस्मशरीरश्च तथानंगश्च मन्मथः ॥ वसंतसखनामा च
स्मर इक्षुधनुर्द्धर ॥ पुष्पवाणाः त्वताराद्यानुकृ दताः प्रकीर्त्तिताः ॥ कर्पूरं रोचनायुग्मं कस्तूरीं च ततः प्रिये ॥ अगुरुं कुंकुमं धात्री फलं च
दनमेव च ॥ सुगन्धिपुष्पाभिः कुर्याद्दष्टद्रव्याणि पार्वति ॥ संपूज्य मादनं सम्यग्गंधपुष्पाक्षतादिभिः ॥ जपेन्मदनगायत्रीं यथाशक्त्या प्रय
त्नधीः ॥ कामदेवाय स्तुस्का विद्महेति वदेत्ततः ॥ मवेदनंगगायत्रीं तन्नानंगः प्रचोदयात् ॥ नमोस्तु पुष्पबाणाय जगदानन्दकारिणे ॥ म
न्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय च ॥ अनेन मनुना देवि नमस्कुर्यात्ततः परं ॥ अथ विज्ञापनं कुर्याद्धृद्ये मदनपाणियुक् ॥ आमं
त्रितासि देवेशि सम्यः काले मया शिवे ॥ कान्तव्यान्तु यथालाभं पूर्व पर्वेत वाञ्छया ॥ विज्ञापनाक्षमस्त्रेशानि शक्तिं परीतोषयेत् ॥ ततः संपूज्य देवे
शि गंधपुष्पाक्षतादिभिः ॥ षोडशार्णा जगन्माता वांछितार्थफलप्रदा ॥ इत्यापूरयते देवि कामान्कामेश्वरेश्वरि ॥ अनेन प्रार्थयेद्देवि पश्चा
द्दमनमीश्वरी ॥ वर्मावगुण्ठनं कुर्यादस्त्रेणापि च लाञ्छितं ॥ ततो जागरणं कुर्यात्सम्यश्च जागरो नहि ॥ अथ प्रातः समुत्थाय कुर्याच्च नित्यपू

॥ राम ॥
॥ ६४ ॥

जनं ॥ ततो नैमित्तिकं कुर्याद्दमनस्य प्रपूजनं ॥ तेनैव महतीं पूजां मध्यमं एषमीरितं ॥ मनोहरीं च विविधं कृत्वा नैवेद्यमुत्तमं ॥ सकर्पूरं च ता-
म्बूलं दद्यात्तत्प्रार्थयत्ततः ॥ समस्तचक्रचक्रेशि सर्वविद्याशरीरिणी ॥ देवमातर्मम मतं तत्तु भवत्विष्टं तवाज्ञया ॥ ततः स्वसुहृमभ्यर्च्य पुष्प-
धूपाम्बरादिभिः ॥ दत्वा दमनकं तस्मै नमस्कृत्य प्रसाद्य च ॥ जलकेलिं ततः कुर्यात्सार्द्धं समयाभिः सुरवं ॥ अन्नदानं प्रकुर्वीत सुहृत्तागणस-
मन्वितः ॥ एवं यः कुरुते विद्वान् दमनारोपणं क्रमं ॥ तस्य सांवत्सरी पूजा क्रियशान्तिस्त्री तदा भवेत् ॥ इति संक्षेपतः प्रोक्तं मितिहासं विशेषतः
सामान्यं च प्रवक्ष्यामि यत्न सिद्धिर्प्रविन्दति ॥ तया भङ्गा यमदना मम शैलभवे यदा ॥ भस्मीभूतस्तदा देवि रतिप्रीतिश्च दुःखिते ॥ तत्रैव
वारिसंभूता दमनस्य लता शिवे ॥ तत्सा रमं च सौभाग्यं महादासीत्सुरोचने ॥ तेनासौ तुष्टहृदया वरो दत्तो मया प्रिये ॥ रत्यैप्रीत्यै च तस्मात्तु
दमनः प्रकटीकृताः ॥ दमनं तु च यो मंत्री वर्षमध्येन पूजयेत् ॥ तस्य सांवत्सरी पूजा मदनाय भविष्यति ॥ इति तस्मै वरो दत्तः मया वसुरवन्दिते
॥ अन्यथा तत्फलं सर्वं स्मातं कामो पजायते ॥ तस्माद्दमनपूजादि कार्त्तव्यं वीरवन्दिते ॥ समूलं दमनं गृह्य स्थापये पात्रके शुभे ॥ दमनं मन्त्रवधा
कृत्वा पूजयेत्तदनन्तरं ॥ आनन्देश्वरबीजेन नवधाविन्दुनासह ॥ नवप्रकारस्तत्राच्य दमनं पूजयेत्क्रमात् ॥ अघोरविद्यया पश्चादभिषिं

चैत्रमेव हि ॥ पूर्वोक्तम्वा दक्षिणास्या दिशि सिंहासने कृत्वा ॥ अस्त्रेण रक्षणं कुर्य्यात्कवचेनावगुण्ठनं ॥ तदर्द्धे त्रि शूलमुद्रां भ्रामयेद्दम
नोपरि ॥ चैत्रमासि चतुर्द्दश्यां दमनारोपणं भवेत् ॥ ऊर्द्ध्ववक्त्रस्य मन्त्रेण हृदयेन प्रपूजयेत् ॥ शैववाड्मूल देशेषु ह्यधिवासं च कारयेत् ॥ प्र
थमे दिवसे कुर्यादधिवासनमुत्तमं ॥ सद्योधिवासने वापि वर्षपूजाफलं हरेत् ॥ प्रातःकाले चतुर्द्दश्यां नित्यार्च्चनं ततस्ततः ॥ नवकोणं विर
च्य च सिन्दूरेण महाप्रभुं ॥ पात्रासीनवसन्तञ्चापि हे मध्यापि पूरितं ॥ एकस्मात्कलशाद्रम्यं स्थापयेद्दिशि कोत्तमः ॥ दक्षतो मण्डलं कृत्वा कुं
कुमाद्यैर्विचित्रितं ॥ अशोकतरुमाश्रित्य त्रिकोणं मण्डलं लिखेत् ॥ तन्मध्ये पूजयेत्कामं वररागं वारणप्रभं ॥ रक्तवस्त्रं रक्तभूषं वामदक्षि
णयोः प्रिये ॥ रतिप्रीतिविशोभाढ्यं पञ्चबाणधनुर्द्धरं ॥ वसन्तसहितं कामं पूजयेत्सर्वसिद्धये ॥ वाग्भवं भुवनेशानि क्लीं यत्कामात्मकेन
च ॥ कामायेन मस्तुभ्यं नववर्णात्मको वरवर्णिनि ॥ कामबीजत्रयं प्रोक्ता पुरो भान्मकमालिखेत् ॥ रत्यै नमश्चाष्टवर्णात्मनि मन्त्रो वरानने ॥ प्रीतिं वदेद्र
तिस्थाने प्रीति मन्त्रोष्टवर्णकः ॥ मोरस्य मवातिप्रीतिच्छान्मरोमातृभूषणो ॥ पद्मताम्बूलवर्णा च रक्तवस्त्रविराजिते ॥ वामदक्षिणयो ध्यात्वा काम
हृद्यान्तरे ॥ वसन्तं पूजयेत्पश्चात्त्वाद्म्ववनमध्यगं ॥ गौरवर्णं वामहस्ते सुधापूर्णघटान्वितं ॥ दक्षहस्ते न दधतं नानापुष्पसमुच्चयं ॥ सागस्क्रा

मंप्रपुज्याथ धूपदीपादि दर्शयेत् ॥ सम्यक्तु पूज्य देवेशि सर्वदेवशरीरिणी ॥ क्रमं समुच्चयेत्सम्यक् कुमारीर्भोजयेत्ततः ॥ सुवासिनीश्च संपू-
ज्य योगिनीगणामर्च्चयेत् ॥ ब्राह्मणाः परितः पूज्या नानादर्शनमानवाः ॥ तदङ्गहवनं पूर्णाकुंभं रत्नादिभूषणैः स्वर्णाभारसहस्रैश्च सुदि-
व्यवस्त्रमनोरमैः ॥ पूजयित्वा ततो देवि दमनारोपणे मतं ॥ तस्य साम्वत्सरी पूजा गफेला सेलकान्यके ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतु-
मिच्छसि ॥ ॥ इति श्रीमद्भ्योक्षमहोग्रतारासंवादे शान्तिसंगमतन्त्रे गुजेकुनविंश पटलः ॥ १९ ॥ ॥ श्रीदेव्युवाच ॥ देवेश श्रोतुमिच्छामि
न्तच्चदेशवनभेदतः ॥ षड्गुणाः स्वामिनः पञ्च भ्रातृवर्ये त्रयं भवेत् ॥ एवं क्रमेणांसं प्रोक्तामेकैकैकं पुत्रभार्ययोः ॥ सप्तदेवमहेश्यानि चामित्रेद्वि
गुणानि यो ॥ फलान्यपि महेशानि यथायोगेन वै शृणु ॥ गुरौ सप्तपञ्च वर्ज्यं शत्रुणां द्वित्रयं भवेत् ॥ वेदसंख्या महेश्यत्र एकैकं पुत्रभार्ययाः ॥ न
वनार्थं महेशानि यथायोगे नवारयेत् ॥ तांबूलसमयं तत्र शृणु देव यथाक्रमं ॥ शतपर्णानि देवेशि चक्रवर्त्ति वराय च ॥ गुरुभ्यः संप्रदातव्यान्वा
त्रिंशत्पर्णावीटिका ॥ अष्टाविंशति भूपेभ्यो बान्धवेभ्यो दशाष्टकं ॥ ज्ञानात्रपक्षपर्णानि वसु द्वादश वा प्रिये ॥ पंचविंशति शक्तिभ्यो पुत्रेभ्य
स्तत्वसंख्यकाः ॥ षट्पर्णानि च शत्रुभ्यः तुरीयं दानमुत्तमं ॥ पर्णात्रपक्षाशुपक्षे दश पर्णानि वश्ययोः ॥ वीरेभ्य षोडश शिवे दिव्यौ द्वे च सुपीठ

॥ना॰तं॥
॥ ६६ ॥

एक ॥ तदूर्ध्वंच वसिष्ठो ये मानवो ये तदर्थकं ॥ भृत्यभ्यः सप्तवर्गाणि कन्याये पञ्चविंशति ॥ चन्द्र शुक्र महेशानि पौत्रेभ्यो दशपञ्च च ॥ स्नुषायै त्रिं
शति शिवे दासे चैव चतुर्दश ॥ अन्येभ्यः परमेशानि विंशत्यर्गाणि दापयेत् ॥ अथ दानं अज्ञाम्भ्यो वक्ष्ये दानं सुमिश्रकं ॥ तिर्य्यग्दानं सेवकादौ
यथायोग्ये नयो जपेत् ॥ इति संक्षेपतः प्रोक्तः सिद्धयोगं शृणु प्रिये ॥ पालि पूगीत थादासी दासश्च चतुर्थकः ॥ परिचिन्नाप्यारविता षन्नाम्बूल
प्रदायकः ॥ हेमहस्ता हरु हस्ता स्फूर्तिकास्य तथैव च ॥ अथर्ववेदं ध हस्तस्य ताम्बूले हिनिषिध्यति ॥ आग्नेयीको मियो क्व्योद्वितीयस्य ज्यतो
यकं ॥ तृतीयो गेह्यतापला तृतीयो रतयात्रिषु ॥ पत्र फलं रवादिश्च चूर्णाश्चैव चतुर्थकः ॥ पञ्चमन्तु सुरवं प्रोक्तं रागः षष्ठ उदाहृत ॥ षड्ङ्गमि
तिसं प्रोक्तं षडे चर्यप्रदायकं ॥ षडे श्वर्य यत्र वसे तत्र लक्ष्मी निरन्तरं ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ श्रीदेव्युवाच ॥ नागव
ल्ली कथं जाता समुत्पन्ना कथं वद ॥ ॥ श्रीशिव उवाच ॥ जन्मेजयस्य यज्ञान्ते नागा नाम शुका शिवे ॥ कृत्वा जुभ स्म माहेविश्चापन्द त्वानु
दाहरां ॥ संसक्षक्षफलं भुक्ता मागभिमूलन्तु स्नात ॥ तदुद्वारार्थं सुशुक्रो ऽग्नि वोद्भैरवः स्वयं ॥ अतिया गकृत स्तेन तद्वृतो धर्म संभवः विदे
वः पतिता यत्र यदृक्षाभ स्मसचयः ॥ भस्म स्प्रावितन्मध्ये तच्छेवंय समजायते ॥ नागवल्लीलता नाम तत्र जाताति सुन्दरी ॥ नाग [illegible] हिम

राम
६६

गोहन·वाङ्गले वागले गदे ॥ कार्न्नाटे चोलसौराष्ट्रे चोलपाले वदे शके ॥ मध्ये देशे कावेले च समुद्रस्य तटे तथा ॥ नाना देशे समुत्पन्ना· नाना
गुणा समुद्भवः ॥ स्थूल सूक्ष्म प्रभेदेन ज्ञातव्या परा ज्ञानतः ॥ तत्कुरे मव मादेवि मम श्वार्थसिद्धि प्राप्नुयात ॥ ताम्बूलक्षण थैनैवं कान्त शुभ
मिच्छति ॥ ताम्बूलेन विना देवि दीक्षा स्यान्निष्फला भवेत् ॥ ताम्बूलोपि प्रशस्थानां· पतीनां ब्रह्मचारिणां ॥ नम या कथितो देवि किं पुनः
क्षोनु मिच्छसि ॥ एकदा संविदानन्दी मुक्तकेशो दिगम्बरः ॥ शय्यास्थो वा श्मशानस्थ· केवलं तिमिरालय ॥ सतत पठणं जपेद्यादौ
सैव कल्पलता भवेत् ॥ बाला मानी युवा कौमारी· चञ्चला च्चारुलोचना ॥ संपूज्य पूजयेद्रात्रौ· वक्रकोटि पवर्जिता ॥ रात्रौ यदि जपेन्मन्त्रं सैव
कल्पलता भवेत् ॥ शुक्रे रात्रौ रोमहे मंगले वा सोरनिशि ॥ संपूज्य बालां यत्नेन· सैव कल्पलता भवेत् ॥ दीपं प्रज्वाल्य परितो· मध्य यन्त्र
प्रपूजयेत् ॥ दीपं कृत्वा च रत्नेवं· सैव कल्पलता भवेत् ॥ शक्तिमाकृष्य तं सा त्रैविन्यस्य न्यासजालकं ॥ स्पृष्ट्वा ता पूजयेद्रात्रौ सैव कल्पल
ता भवेत् ॥ प्रसून तूलिका मध्ये· शक्तिस्था पयविधानतः ॥ शक्तिं संचुम्ब्य पूजयेत्· सैव कल्पलता भवेत् ॥ बाला मानी यदेवेशि· यथोक्ता शुभ
लक्षणां ॥ तामालिङ्ग्य जपेद्रात्रौ· सैव कल्पलता भवेत् ॥ पर्वते विपिने गत्वा· शक्तिमाकृष्य पार्वति ॥ तां संतोष्य समालिंग्य· जपेद्रात्रौ निरत

रे ॥ सैव भूयात्कामधेनुः सर्वसिद्धिप्रदो भवेत् ॥ गानं कर्णान्तनो दत्वा लक्षं जप्त्वा निशाकरः ॥ वालामानीय देवेशि दिवा जप्त्वा दिवाकर ॥ त
योनिरूपं यन्त्रञ्च सजीवं परमेश्वरि ॥ तत्र नाडीत्रयं वीरस्य विद्यायन्त्रं विभाव्य च ॥ संपूज्य तल्लिङ्गे देवि साक्षात्काली समो भवेत् ॥ क्रियामात्र
कायमित्तं सर्वसिद्ध्यर्थमम्बिके ॥ एतत्क्रमात्तो देवि मम रूपा न संशयः ॥ वाला शान्तिं समानीय सुन्दरीं शुभलक्षणां ॥ नासां विधाय तद्देहे त
तः साक्षाद्देवता ॥ मूलदेवीं च संपूज्य सौगन्ध्येन तैलयोगतः ॥ तस्याः पादौ च प्रक्षाल्य रत्नमसृणे तैललापनं ॥ ततः केशो तस्य स्नानं मार्जनं प्रोक्ष
णां चरेत् ॥ मूलजपेन्नतो देवि त्रैलोक्यविजयी भवेत् ॥ जलेन पादप्रक्षाल्य स्नानन्तज्ञालातथ्वरेत् ॥ त्रैलोक्यविजयी हि चाररागा ॥ तस्य स्मुरवस
मातो वयजपात्त्रैलोक्यनायकः ॥ तस्या हस्ते करं दत्वा जपात्त्रैलोक्यसिद्धिभाक् ॥ तिथिसिद्धि पीठसिद्धि जपसिद्धिश्च षड्विध ॥ स्थिति
सिद्धिस्तथा जप्त्वा आज्ञासिद्ध्यादिकं भवेत् ॥ आद्यं यामं षट् घटिका त्यक्त्वा तां पूर्वं संगवः ॥ नाडीचतुष्टये देवि नाडीयुग्मेपि मध्यके ॥ का
मधेनुसमायोगो ब्रह्माराउ सिद्धिदायकः ॥ गोपयं गोपनीयं गोपनीयं स्वयोनिवत् ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ॥ श्रीदेव्यु
वाच ॥ देवेश श्रोतुमिच्छामि योगश्चितामणिप्रभं ॥ ॥ श्रीशिव उवाच ॥ चिन्तामणिंद्वयं शृणु महेश्वरि ॥ वालामानीय चार्वङ्गीं संशोध्य

नासज्ञानतः॥ मुद्रपीठन्तु संस्थाप्य योनिं मुखगतां श्चरेत्॥ मुखेन चोप्यं संजप्य प्रविकाङ्क्ष्य प्रयत्नतः॥ तत्रत्वं विसिहन्देवि जयाचिं नाम
सिभिर्वित्॥ वामां मानीय च पलं मैथुनानन्द मानसां॥ योनिचक्रं स्वलिंगं तु संकोच्य च बलेन कः॥ स्थित्वा विपरीतान्ना जपकुर्यादधः
शिवे॥ योनिस्सर्वान्न त्वमुखे पूर्ववन्क्रममाचरेत्॥ तन्त्रत्वे सिहनादेव सुरवाङ्गुर्वाति चयत॥ तदेव सत्यं भवति प्रोक्तं स्पर्शादिकर्मीच्छसि॥ ॥
इति श्रीमदक्षोभ्य तारासंवादे शक्तिसङ्गम तन्त्रराजे प्रथमखण्डे कामधन्वादि योगेत्रिंशः पटलः समाप्तः॥ ३० ॥ ॥शुभम्॥







त्राशिासर्वाशिायर्यायाम्भा यकागमान् ॥ बृहत्संज्ञानि देवेशः यथाश्चे गक्रमेशाच ॥ उपशब्दो बृहत्पूर्वकितंत्रयामलगोचरः ॥ ॥श्रीदेवउवाच॥ ग्रंथना
मन्वयाप्राक्तं वियतकुत्रस्थितं वद ॥ किंपदं मर्त्यलोके च स्वर्गपातालयोः कियत् ॥ ॥कालउवाच॥ पंचाशद्देसहस्रा भौरेषट्त्रिंशत्संख्यकं विभु ॥ मत्र
संख्या स्वर्गलोके पाताले दशवै स्थिता ॥ एवमागमसंदोहः कथितस्ते मयानघ ॥ शैवं शाक्तं गाणापतं सौरं वैष्णवमेव च ॥ महावीरं पाशुपतं वैष्णवं वी

रवैष्नवं ॥ वीरशैवंतथाचींद्रस्वायंभुवमतोत्तरं ॥ पंचशास्त्रिंगारुडंचैकेरलंशावरंतथा ॥ श्रीसीद्धशावरंदेवतथैवकालशावरं ॥ कुमारिशावरंदेविविजया
शावरंतथा ॥ कालिकाशावरंदिव्यशावरंवीरशावरं ॥ श्रीनाथशावरंदेवनारिशीशावरंपरं ॥ श्रीशंभुशावरंरुद्रंसख्याशावरंजानय ॥ रक्तोघोरःस्त
थाशुक्लाघोरोविराजत्रकस्तथा ॥ भस्माघोरस्तथावाम्यःघोरघोरनतःस्मृतः ॥ चीनाघोरस्तथानीलःसर्वभस्माभिधस्ततः ॥ घोराघोरस्तथासिद्धान्घो
रश्चैकादशःस्मृताः ॥ मायाकापालिकंचापि·वीरबौद्धागमैतथा ॥ जैनागमोरक्तशुक्लपटसंबंधिजानय ॥ चीनभेदास्तुबौद्धिशतेतिप्रकीर्त्ति-
ताः ॥ बौद्धानांशतभेदास्तुदशपाशुपतेस्मृता ॥ कौलेभेदाष्टकंवायधुतवैदिकशास्त्रकं ॥ यथावर्णात्तुधर्मेशायोजनीयंप्रयत्नतः ॥ येषुयेषुचव
र्णेषु·येयेधर्माःप्रकीर्त्तिताः ॥ नषुचैतेधर्माःयोजनायाःप्रयत्नतः ॥ शास्त्रेणोनतथाकार्यं·व्राम्हणेःपंप्रविनस्यपसि ॥ स्तुन्यष्ठवंहिकर्त्तव्यंमृडशंकरं ॥ स
नङ्गोप्यरहस्यंचयोजानानिसचेश्वर ॥ एतद्विग्रंथवाहुल्यान्नोक्तमत्रमयानघ ॥ शिवेन्यद्वेसुचिंतयन्नदस्वप्रियंवदे ॥ सिद्धविद्यालघुवि-
द्यार्तथामता ॥ त्रिधात्वांकथयानाहि·पुनर्मन्त्रेनन्दर्शिनं ॥ तदेतत्कथ्यनीदेविसंख्याचादौवदप्रिये ॥ अत्रासंख्यामहाविद्यातस्यानामानिव
म्यहं ॥ तदेतत्कथ्यनीदेविसंख्याचादौवदप्रिय ॥ अत्रासंख्यामहाविद्यातस्यानामानिवच्म्याहं ॥ सिद्धविद्यामहाविद्येन्येचगुरोक्रम ॥ चतुर्युगा

दिरूपेणाकथंसिद्धाचकिंविधा॥ कावासिद्धासत्ययुगेकामहासिद्धामहेश्वर॥ कावाविद्याचान्ययुगेसंतेकथ्यतेश्वराफ॥ सत्येयुतेसिद्धविद्यासुंदरि
भुवनेश्वरी॥ कालीतारेतिदेवेशिसिद्धविद्याप्रकीर्त्तिताः॥ कालिकासिद्धविद्यात्रसर्वदेवमहेश्वर॥ छिन्नमस्ताचबगलामातंगीकमलातथा॥ एताए
वमहाविद्याविद्यांसंश्वराफवल्लभ॥ धूमावतीभैरवीचविद्यात्वेप्रतिष्ठितंकालीतारामहा विद्याषोडशीभुवनेश्वरी॥ भैरवीछिन्नमस्ताचविद्याधू
मावतीतथा॥ वगलासिद्धविद्याचमातंगीकमलात्मिका॥ एताएवमहाविद्याःसिद्धिविद्याःप्रकीर्त्तिताः॥ वीरनाथमतेदेविपुगभेदात्रिधागति
॥ कालिछिन्नासुंदरीचसिद्धविद्याचतारिणी॥ वगलाकामलाधूमामहाविद्यात्रंभवेत॥ मातंगीभैरवीचैवत्रिपुराशूलिनीतथा॥ वनदुर्गाच
त्वरिताविद्यात्वेनमहेश्वर॥ तोतलात्रिपुरामायाकौह्रीशीभ्रमरांकिका॥ भोगवतीतथाक्लिन्नाहयारूढाचकुक्कुटी॥ त्रिकंटकेतिदेवेशिमहावि
द्याःप्रकीर्त्तिताः॥ नित्यामतमिदंप्रोक्तंश्वराफकुब्जामतेशिवे॥ वज्रप्रस्तारिणीभोगवतीपद्मावतीतथा॥ महामधुमतीसिद्धिमृतसंजीविनीतथा॥
॥ अघोराराजमतिंगीमातंगीहिंगुलांबिका॥ कालरात्रीतिदेवेशिमहाविद्याःप्रकीर्त्तिताः॥ ॥शिवउवाच॥ ममान्यथाछिन्नयोक्तविद्येशोपोवहुत
त्रच॥ मयाज्ञातोस्तिविश्वेशिशिष्यमावंभजप्रिये॥ ॥देव्युवाच॥ देवेशश्रोतुमिच्छामिसिद्धविद्यादिनिर्णयं॥ ॥शिवउवाच॥ सिद्धविद्यामहावि

याभेदत्रयक्रमेणाच॥विद्यामंत्रक्रमेणैवद्विधाजातिःप्रकीर्त्तिता॥स्त्रींयन्नपुंसकेत्वेनत्वेधाजातिःप्रकीर्त्तिता॥चतुर्युगक्रमेणैवभेदभेदान्तराणिशि
वे॥सत्येकालीचश्रीविद्याकमलाभुवनेश्वरी॥सिद्धविद्यामहेशानित्रिशक्तिवगलाशिवे॥महाविद्यास्तुत्रयुगेमातंगीभैरवीशिवे॥धूमावती
चविद्यास्यात्त्रेतायांशृणुपार्वति॥कालीतारासुन्दरीचसिद्धविद्याप्रकीर्त्तिता॥मातंगीभुवनालक्ष्मीमहाविद्याप्रकीर्त्तिता॥धूमावतीभैरवी
चविद्यात्वेनमहेश्वरि॥द्वापरेकालिकातारारोचिनीभैरवीतथा॥सिद्धिविद्यामहेशानिसुन्दरीभुवनारमा॥धूमावतीमहाविद्यामातंगीकम
लातथा॥विद्यात्वेचमहेशानिकलौकालीचकेवला॥कालीताराछिन्नमस्तासिद्धिविद्याकलौमता॥सुन्दरीभैरवीलक्ष्मीमातंगीभुवनेश्वरी
महाविद्यामहेशानिधूमाचवगलाशिवे॥विद्यात्वेनमहेशानिकलौसंकीर्त्तितामया॥उन्मत्तभैरवमतेभेदान्यःकथ्यतेशृणु॥कालीताराम
हाविद्याषोडशीभुवनेश्वरी॥भैरवीछिन्नमस्ताचविद्याधूमांवतीतथा॥वगलासिद्धिविद्याचविद्याधूमावतीतथा॥त्रयोदशमहाविद्यायु
गभेदात्रिधापिच॥एताएवमहाविद्यात्रियुगंव्याप्यसंतिच॥कलौकालीकलौकालीनकेवला॥साधिताकालनाथेनप्रत्यक्षाकालिका
कलौ॥कलौकालीविहायाथयःकश्चित्सिद्धिकामुकः॥सचक्षुषाविनारूपंदर्पणेद्रष्टुमिच्छति॥कलौकालींविहायाथयःकश्चिज्ज्ञा

ज्पमिच्छति ॥ सा हि स्त्रीति निष्कन्यार्थं हि मद्यैलं निषेवते ॥ कलौ कालीं विहायाथ यः कश्चिन्मोक्षकामुकः ॥ स भोजनं विनान्नेन तृप्तिमभी
प्सति ॥ कलौ कालीं विहायाथ यः कश्चिद्भुक्तिमिच्छति ॥ स चग्राङ्गीं विनादेवि विनादेघिमनसो मे श्रुनी यथा ॥ कालौ कालीं विहायाथ यः क
श्चिद्भुक्तिकामुकः ॥ स सिद्धान्नं परित्यज्य पङ्कपिण्डोजनमिच्छति ॥ कलौ कालीं विहायाथ यः कश्चित्काव्यमिच्छति ॥ स तु स्वं निष्कन्यर्थं यापानिकु
रुते सदा ॥ सदाशिवो महासुर्वोपमन्त्रोऽधिसस्वन ॥ युगत्रेये पि देवेशि कलि पूर्वेषु गतवतः अन्यां विद्यामपि भजन् सिद्धिमाप्नोति मानवा ॥ कलौ कास्य
र्शमसिर्नान्यविद्या कदाचन ॥ श्रीमहाकालिका विद्या कलौ पूर्णफलप्रदा ॥ प्रज्ञानाज्ञानतो वापि सप्तनीलं वा सहेलया ॥ स्मृतापि सिद्धिदा का
ली सत्यं देव महेश्वरि ॥ चतुर्युगानां राज्ञी विकालिका परिकीर्त्तिता ॥ विद्याराज्ञी सिद्धविधा कलौ शीघ्रफलप्रदा ॥ नामे ऽ उपसाम्याच्च महा
विद्या प्रकीर्त्तिता ॥ कलिर्हि यस्या दासस्य पादपूजां करोति हि ॥ सकृन्नामस्मृते येन कालिकाया महेश्वरि ॥ तस्यै सेवापरः सोऽयं कलि वा
धान तस्य हि ॥ कलिर्पर्श्वं निविन्नानि हैयरव्रीशैले भूरुहान् ॥ स्वयं मागत्य यत्नेन ददाति प्रतिवासरे ॥ एतद्धि सिद्धिवाहुल्यं मया वक्तुं न
शक्यते ॥ यद्दानेन तु चत्वरा नतेयन्द क्षिगास्पना ॥ सेयं दक्षिणाकाली तु सिद्धिभूमिरितीरिता ॥ कालिका षोडशी तारा वामाचारप्रिया

मता॥ छिन्नमस्ताचवगलावाममार्गाधिदेवता अ नंग्पाद्यामहादेव्ववाममार्गेरतासिद्धिदा॥ कमलाभुवनावालातथाधूमावतीशिवे॥ दक्षिणा
चारयोगेनसिद्धन्त्येवनसंशयः॥ वामाचाररतापितथासिद्धन्त्येवमहेश्वर॥ भैरवीवामसंतुष्टावालादक्षिणवामगा॥ वसंतसुन्दरीविद्यातथा
संगीतसुंदरी॥ वामदक्षिणयोगेनसिद्धन्त्येवनसंशयः॥ रेराफकादक्षिणाचारोत्वन्यादेवाश्चदक्षिणामर्दिनीवाममार्गेरताप्रत्यक्षाभवति
ध्रुवं॥ वालायामुभयाचारः श्रीविद्यायांतथैवच॥ लोपामुद्रादक्षिणेतित्रिषुलोकेषुविश्रुता॥ सेववामप्रियादेविवामाशीघ्रफलप्रदा॥ का
लीतारा छिन्नमस्तासुन्दरीवगलामुखी॥ भैरवीचैवमातंगीवामाचारप्रियामुदा॥ मातंग्यावगलामुख्यादक्षिणाचारयोपिवर्त्तते॥ मातंग्या
लघुमातंग्यासुमुखीवामतत्परा॥ क्वचिद्गणेशरुद्रेषुविष्णुसौरस्वयंभुवे॥ वामाचारेवैदिकेपिभैरवावामतत्परा॥ क्षेत्रपालाःवामपराचीना
कापालिकातथा॥ तथापाशुपतादेववाममार्गेप्रतिष्ठिताः॥ योगाश्चकेरलायेचवीरवैष्णवगाभवा॥ चांडास्वघोरादेवेशवामचारपरा
यणाः॥ वार्हस्पत्यादयस्त्वेन्येभेदावामपरायणाः॥ वीनावामपरादेवीवौद्धाचारपरायणा॥ गोपालसुन्दरीविद्यातथानृसिंहसुन्दरी
विद्यातथानृसिंहसुन्दरी॥ श्रीवृक्षसुन्दरीविद्यातथैवरामसुन्दरी॥ सुन्दरीगणावेदेवितन्तुर्वापिहयाननः॥ यक्षिण्याद्याःपर्वविद्याःका

मिनीयोगनायिका ॥ वाममर्गेणसिद्ध्यंतिनान्यथाःसिद्धिःक्वचित् ॥ एवंचदक्षिणामूर्त्तिर्हयग्रीवगणेश्वयाः ॥ वामदक्षिणयोगेनउभया-
चारतत्परा शैवेशाक्तेगाणपतेसौरेस्वायंभुवेतथा ॥ चांद्रेवैष्णवेपंचरात्रेवैस्मार्तेवैदिकेपिच ॥ कापालकेमहेशानवाममार्गोत्रकारणं ॥ वाममार्गप्रका-
रेणसर्वसिध्यंतिनान्यथा ॥ वाममार्गविनादेवनहिसिध्यंतिदेवता ॥ तोतलाकुलजादुर्गाछिन्नात्रिजगसुरी ॥ वामाचारेणसिद्ध्यंतिदक्षिणेक्षोभ-
कारकाः ॥ अन्नार्थेप्रत्यमादेवसिद्धभैरववच ॥ अथोन्येश्चममार्गोयंनरोभवतिनान्यथा ॥ सुन्दरीवामसंस्थाचकालिकावाममार्गगाः ॥ काली
ताराछिन्नमस्तासुमुखीचमतंगिनि ॥ बगलादेवदेवेशवाममार्गपरायणा ॥ वामाचारंविनायाथकालींतारांचभैरवीं ॥ महापिशाचिनीदेव-
छिन्नमस्ताविशेषतः ॥ योपासनांकर्त्तुकामस्तस्यपातोभविष्यति ॥ सदरिद्रोममद्रोहीसुनहारीसजायते ॥ विशेषात्सर्वमंत्रेषुकुलाचारःप्र-
कीर्त्तितः ॥ नदासिद्धाःसर्वविद्यानात्रकार्याविचारणा ॥ सुरेश्वरीमहाविद्याशक्तिःसर्वामहेश्वर ॥ मंत्रमंडलगाविद्यावामाचारेणसिद्धिदाः
वामाचारेणसिद्ध्यंतिह्यस्मरादिगणाःशिवे ॥ वाममार्गविनादेवनहिसिद्ध्यंतिकुत्रचित् वामाचारःप्रधानोत्रसर्वेषुदर्शनेषुच ॥ आदौशा-
क्तंततःशैववैष्णवंगाणायंतथा ॥ सौरंचांद्रंजैनधर्मंस्वायंभुवमनंतरं ॥ वामेचानभविष्यंतिचेतद्विजातिजातयः ॥ एवंदर्शनमार्गेपिनाहिवा

मेकरोतिचेत्॥ तस्यसिद्धिर्नदेवेशिममवैरीप्रकीर्त्तितः॥ सर्वस्मादधिकोवामःधर्मःप्रोक्तःकुलागमे॥ तत्रापिकालिकानाराविधौप्रियतरःस्मृत
ः॥ वामधर्मपरित्यज्ययःकालींभक्तितोर्च्चयेत्॥ तस्यक्रियाचविफलामहापशुरितीरिता॥ तत्राम्नायेपिदेवेशिश्रेष्ठःसर्वेषमभेदतः॥ प्रथ-
मस्तृतीयःस्यात्त्रितयंत्रितयंत्रिषु॥ यथाक्रमेणातत्रस्यात्तत्रपूर्णंहिवोत्तमं॥ षट्दर्शनादिमंत्राणांषट्सुस्थानेषुयोजनं॥ तत्रपूर्णाभि
षेकोहिपूर्णारूपःप्रकीर्त्तितः॥ तत्रपर्यायभेदेपिवाममार्गःप्रधानतः॥ शैवेचैवेष्णवेशाक्तेसौरेगाणपतदर्शने॥ बौद्धेपाशुपतेसांख्येमंत्रेकाले-
मुखेपिच॥ दक्षिणोवामसिद्धांतिवैदिकादिष्वपिप्रिये॥ विनालिपिसिनाभ्यान्तुपूजनंनिःफलंभवेत्॥ एवंदशासुविद्यासुषडाम्नायत्ववा
मता॥ मध्यमाम्नायमाख्यातःकनिष्ठंसपूर्णंप्रिये॥ कुब्जादिभेदेदेवेशिपूर्वाम्नायादिकल्पनं॥ कथितस्तेकनिष्ठोत्रसंक्षेपूर्वप्रकीर्त्तिता
कादिकालीमहाशक्तिःशारदात्रिपुरसुन्दरी॥ कादिहादिप्रभेदेनद्विधाम्नायार्थसंहति॥ कुलार्णवेतंत्रकौलेवीरचूडामणावपि॥ सिद्धांतेत्रि
पुराख्येचतथाज्ञानार्णवह्वये॥ श्रीमूर्त्तिसंहितायांचतथैवसमयार्णवे॥ एततंत्रेषुमुख्येषुधर्मोवामाम्नायादिकारणं॥ कादित्वाद्ब्रह्मरूपत्वंहा
दित्वाच्छिवरूपता॥ ब्रह्मरूपेमहाचारेनदिवानिशाप्रिये॥ नवाप्रयासकरणंनास्तिभूशुद्ध्यादिकारणं॥ स्वेच्छयासर्वमेतद्धितस्याद्विधा

महोन्नमा ॥ कादिः कालीति शक्तिस्तेनुपक्रम्य प्रकीर्त्तितं ॥ कादिकाली चादिकाली कलौ कालीतु केवला ॥ सुन्दर्य्याहादिकं वहु ॥ एवं वध्या
नवाकुल्यात्कलौ सिद्धाति वानवा ॥ तस्मात्सर्वयुगे देवि कालीतारा फलप्रदा ॥ सुन्दर्य्यातुकुलाचारो राजसः परिकीर्त्तितः ॥ दिव्योपि कीर्त्तितो दे
विकाली राजसनामसौ ॥ दिव्योपि धीरवाकुल्यते न शीघ्रफलप्रदा ॥ कादिस्तु कामराजोसि हादिर्लोपा प्रेरिता ॥ इदं वेदशास्त्रसंमत्या परिभा
षिकमीरितं ॥ काद्यो मनवः संति वहवः परमेश्वर ॥ न तत्र कादीनां क्वापि हादावपि महोन्नम ॥ हाद्यो मनवो देव षट्त्रिंशत्प्रसंख्यकाः ॥
न तत्र हादिनां क्वापि षोडशीमेव हादिना ॥ कादित्वं कालिकायां च तेन प्रोक्तः कहात्मकः ॥ काल्यामपि हादिकादिभेदाः संत्येव भूरिशः ॥ न तत्र
कादिहादित्वं लोपायां नतु हादिता ॥ लोपातु सुन्दरीभेदः कामराजाद्यो यथा ॥ इत्येवं कादिहादित्वं हादिः श्रीषोडशी परा ॥ हादेस्तु नियमा
ः प्रोक्ताः यमसंयमनादयः ॥ कादेस्तु नियमो नास्ति स्वेच्छयाधर्ममाचरेत् ॥ नित्याश्लिष्टं कादिमतं परिभाषामयं मतं ॥ शक्तिसंगनामानं म
हाकादिमतं शिवे ॥ कादिहादितद्वयं च त्रितयं यत्र तिष्ठति ॥ चिच्छक्तिः कादिरूपः स्याद्धादिश्चिद्ज्ञानगोचरा ॥ चिदानन्दस्वरूपाख्यं शिव
शक्त्यात्मकं महः ॥ शक्तेः प्राधान्यं कादौ च सर्वदा परिकीर्त्तितं ॥ सुन्दर्य्यान्तु षुचित्क्वापि समयेषु प्रधानता ॥ काल्यां शक्तिं विहायाप्ययः कश्चि

ज्ञायमाचरेत् ॥ सद्दीरिड्डीमहाउः ॥ स्वीयोगिनीविवर्त्तपःसत् ॥ सुंदर्य्यांब्रह्मचारित्वंकालेचानन्दरूपता ॥ सर्वंहिकादिहादिनींसंज्ञाप्रोक्तामहेश्वरि ॥ सर्वप्रपंचसिध्यर्थंगोपनार्थंमहेश्वरि ॥ गौडकेरलकाश्मीरसंप्रदायानुसारतः ॥ दीक्षाविद्याविधौकार्य्यातारायांचविशेषतः ॥ कालिकायांच सुन्दर्यापूर्णादीक्षादिविंशति ॥ कादिहादिमतेद्वंद्वत्याभिषेकविधिंचरेत् ॥ स्वस्वविद्यागुरूणांश्चनामानुकूलतःश्चरेत् ॥ दक्षकाश्मीरगौडाख्यनानाभेदप्रविस्तरैः ॥ श्रुगुकानन्दनाथान्तनामाज्ञाचप्रदापयेत् ॥ पूर्णाभिषेकसुंदर्याषोडश्यामेवकीर्त्तितः ॥ अभावेलघुषोडश्यांपरिभाषांमनावपि ॥ राजराजेश्वरीविद्यापंचमीपरसुन्दरी ॥ श्रीमहाषोडशीपूर्णा-पूर्णादीक्षितपूर्त्तिदा ॥ अन्यभेदेपिकर्त्तव्यंसंक्षेपात्परिकीर्त्तितं ॥ तथा कामकलाकाल्यांदक्षिणायामपिस्मृतं ॥ महाविद्यासुसर्वासुह्यभिषेकःसमावहः ॥ तत्रस्वस्वमतेनैवनामदानंप्रकीर्त्तितं ॥ कालीताराछिन्नमस्तान्वेकरूपास्तिपार्वति ॥ तथानवाक्षरीकाल्यांगुरव्योवासिद्धिकाविधौ ॥ गुह्यकालीसिवविद्यातत्वानींनवकेयुता ॥ सदाप्रेतसमासीनामहागुह्यस्वरूपिणी ॥ दशवक्त्राकार्यमंत्रनामधेयंस्वकल्पता ॥ गुरूणांक्रमप्रकारेणासंप्रदायानुकूलतः ॥ यथादशासुमुख्यासुगुरवःसन्निपंक्तिशः ॥ तथादशमविद्यासुषोढान्यासःप्रकीर्त्तितः ॥ नैतेपूज्यासपर्यादौसर्वसिद्धिप्रदायका ॥ सुन्दर्यामपिदेवेशिकामराजादिकोतथा ॥ स्वाम्नायायां-

चलोपायंमधुमत्यादिभेदतः॥ सर्वत्रभिन्ननामानोगुरवःपरिकीर्त्तिता॥ कालीक्रमार्गेनोक्तेनाकालिकाफलदाध्रुवं॥ कुलार्णवोक्तसन्मार्गां
सुन्दरीफलदाक्वचित्॥ अर्णावाःसर्वसामान्याःसर्वधर्मेषुनन्दिनि॥ विनापूर्णाभिषेकेणकालींतारांचसुन्दरी॥ येजपन्तिनरादेवितेनराःयम
किंकराः॥ तस्मात्तुसर्वथाकार्यस्त्वभिषेकःशुचिस्मिते॥ आम्नायहादिनामानिसमभिषेकोध्रुवंचरेत्॥ सांगंद्वयंमहेशानिपूर्वैवकथितंमया॥ प
रायामपिदेवेशितत्रप्रासासारयोगतः॥ भेदाष्टकेपिशादितःसंप्रदायात्कुलतः॥ आम्नायविद्याभेदेपिह्यभिषेकविधिःस्मृतः॥ दशलक्ष
प्रभेदैश्चकालीविद्याकलौस्थिता॥ दशपूर्वैःसप्तलक्षैःसुन्दरीकीर्त्तिताभुवि॥ त्रिनिखर्वजतारास्याछिन्नपाःखर्वमात्रकं॥ पंचाशीतिस
हस्रैश्चलक्षपंचकसंयुता॥ भुवनेशीमहाद्याचवगलांश्चराकसारयं॥ तत्वलक्षात्तुवगलासहस्रनवनिर्गता॥ धूमावतीमहाविद्याषडशीति
सुभैरवी॥ मातंगीनेत्रलक्षाचकमलालक्षपंचका॥ एतेस्तुषंलिकायोगात्प्रस्तारात्तुविनिर्गता॥ सामान्यमुख्यतेदेविदीक्षानामप्रकीर्त्ति
ता॥ सप्तसप्ततिभेदेनसुन्दरीतुप्रतिष्ठिता॥ चत्वारिंशत्प्रभेदेनभैरवीभुविकीर्त्तिता॥ भुवनेशुपष्टभेदास्यान्मातंगीपंचधास्मृता॥ कमला
शतभेदाचषट्त्रिंशद्वगलास्मृता॥ धूमावतीपंचभेदातारात्रिर्वात्रयोदश॥ दशधाकालिकाछिन्नातथाषोडशधास्मृता॥ श्रीकाल्यादशभे

॥श्रान्त॥
॥७॥

दानीभेदैर्दीक्षाप्रकीर्त्तिता॥दक्षिणासूर्ययुग्मा च श्मशाना दशधा स्मृता॥भद्रकालीषोडशधाकालकालीतथाष्टधा॥गुह्यकालीचनवधासप्तधा
कामकालिका॥नवधाधनकालीचसिद्धिकालीत्रयोदश॥चन्द्रकालीविंशतिधाहंसकालीचसप्तति॥एवंभेदैपिकर्त्तव्यः किमन्यछ्रोतुमिछ
सि॥ ॥इतिश्रीमदक्षोभ्यतारासंवादेउत्तरमतेपरिभाषायामप्रथमः॥श्रीदेव्युवाच॥देवेशश्रोतुमिछामिपूर्णाभिषेकसन्ततिंपरा॥ ॥शिवउवा
च॥सुन्दरीतारिणीकालीक्रमदीक्षात्रिगामिनी॥क्रमपूर्णाभिषेहेशानिक्रमाछंभुभविष्यति॥पूर्णाभिषेकेकृत्वातुयत्रकुत्रमृतोपिवेत्॥
सर्वदेवीरूपःस्यात्सदेवोधन्यतामियात्॥विनापूर्णाभिषेकेनपशुरूपोशिवोपिच॥विनापूर्णाभिषेकेनदेवतानप्रसीदति॥विनापूर्णा
भिषेकेनकालीतारांचयोजयेत्॥तस्यक्रियाहरिष्यामिवातुलोजायतेनरः॥पूर्णाभिषेकयुक्तस्ययत्किंचिदमृतंभवेत्॥तस्यक्रियाचस
फलादेवतासुप्रसीदति॥पूर्णाभिषेकयुक्तोहिमंत्रान्दृष्ट्वाजपाछिवः॥तत्क्षणात्सिद्धिमाप्नोतिनात्रकार्याविचारणा॥विनापूर्णाभिषे
केनगुरुधर्मेणपार्वति॥नजपोनतथाहोमोनपूर्णानाकश्चित्॥गुरुंविनापिदेवेशिन्याभिषेकीनयंजपेत्॥तंसभेदंसाधयित्वासिद्धिमन्तु
मर्थाहति॥पूर्णाभिषेकयुक्तोहिनमस्कारयेत्॥षडाम्नायोपदेशश्चयत्रनागर्भितपार्वति॥ऊर्द्ध्वाम्नायादिराज्ञीतुश्रीमहाषोडशीपरा॥का

॥गुरुः॥
॥७॥

ल्पांतुकामकालीयंतत्रापिदक्षिणेश्वरि॥षडाम्नायेशांभवेच्चतुष्ठयकालीश्चभोद्दया॥दक्षिणाकालिकाविद्यासिद्धविद्यापरात्परा॥चतु
र्युगेश्वरीकालीकलौतारेवकेवला॥सर्वदैवतुकालीयंचतुर्यामेनसिद्धिदा॥अन्याविद्याश्चदेवेशबहुयासफलाप्रदा॥सुन्दरीतुक
लौनैवकूर्येच्चारोपिनोकलौ॥सम्प्रदायैर्भवत्क्रूरंतत्क्रूरमध्यमेत्सादा॥कलौसुरवाप्रसुद्धत्वात्क्रूरोच्चारोनजायते॥तस्मात्त्वंतुप्रयत्नेरौद
ध्रायत्नेनसंजयेत्॥अथवास्यात्कामराजोलोपामुद्रांजवाजपेत्॥सर्वतःसिद्धिदाकालीकलौस्मृतिफलप्रदा॥सहेलंवासलीलंवायस्यास्म
रणमात्रतः॥षष्ठिसिद्धीश्वरोदेविदिव्यौघरूपोभवेद्धुवे॥शांवरेकेरलेशैववैष्णवेसौरगाणपे॥चांद्रेस्वायंभुवेचीनेमिलित्वापञ्चमात्रकं
अंगमन्त्रामहेशानिनवार्बुदकोटयः॥त्रिंशत्रिखर्वेषट्वृन्दःपंचत्रिंशच्चपद्मकाः॥मंत्राःप्रोक्तामहेशानिविंदुप्रस्तारवीजकं॥भाषाभन्द
ध्वस्तुपर्यायभेदतः॥आगमाम्नायभेदेननाथसिद्धादिभेदतः॥शैवसौरेवैष्णवेचगणेशेष्वपियत्नतः॥मुख्यमेकंप्रकुर्वीतनतत्राम
प्रदापयेत्॥पूर्णाभिषेकपीठाचलतुपूर्वामहन्नाथा॥पंचपीठापरिज्ञानात्किमुतःसिद्धिसाधनं॥षट्स्थांभवशीघ्राप्नसांगोविद्यां
सभेदजीं॥समंत्राचैवविज्ञात्वादीक्षाकार्याहितेच्छुना॥प्रथमंकालिकाक्रमंहमारक्ताभासुन्दरीततः॥द्वयाःकालीमुख्यरूपासिद्धि

॥शा॰तु॰॥
॥८॥

दांनीलभासुरा॥ उत्पत्तिर्दशविद्यानांदेवानामपिपार्वति॥ सूक्ष्मेसंकथितादेवीद्वयोराम्नायभेदतः॥ पातंजलेविमर्षिणांसांख्येसिद्धांतसंमते
॥कुलचक्रोदयेदेविभास्करेशेखरेतथा॥ तरंगिरापर्णावेदविष्णुकाशेसंहितांविधौ॥ अन्यानिडामरादीनितत्रापिकीर्तितानिप्रिये॥ प्रतिशाक्तो
क्तंत्राणिषष्टिवेदांगानिच॥ सूक्तान्यपितथासंतिस्मृतिश्रुत्यादिकंतथा॥ षडाम्नायेमहादेवतथाषड्दर्शनादिके॥ भिन्नाभिन्नानि
तंत्राणिसंहितादीन्यपिप्रिये॥ शैवेद्वात्रिंशतंत्राणिचापतंत्राणिवैष्णवात्॥ शतत्रयंपंचविंशात्संख्याकानिमहेश्वरि॥ असंख्यातानिचो
क्तानिदशविद्याक्रमात्क्रमः॥ महाविद्यासिद्धविद्यातथाविद्याक्रमेपिच॥ महानीलक्रमेशैवकालीशीघ्रफलप्रदा॥ महाचीनक्रमेशैवता
रापूर्णफलप्रदा॥ दिव्यचीनक्रमेशैवछिन्नमस्ताविधिःस्मृता॥ गंधर्वाख्यक्रमेशैवपंचमीअतिदुर्लभा॥ महागन्धर्वमार्गेणषोडशीफ
लदायिनी॥ सौभाग्याख्यक्रमेशैववगलाफलदाकरी॥ जीवचक्रक्रमेशैवभैरवीअतिकीर्तिता॥ महाधूम्रक्रमेशैवफलदाधूम्रनायि
का॥ राजमार्गक्रमेशैवमातंगीसकलेष्टदा॥ ब्रह्मभावक्रमेशैवदिव्यमार्गक्रमेणच॥ पशुमार्गक्रमेणापिमातंगीकमलासदा
॥दशमेणादेवेशिदशविद्याफलप्रदा॥ काल्यादित्रितयेदेविएकोपिपरिकीर्तितां॥ एकद्वित्रिविधादेविकोटिधानंतरूपि

॥तस॥
॥८॥

रणी॥ अंगंगकैर्नामभेदैर्नानामन्त्रविधायिनी॥ ॥श्रीशिवउवाच॥ नवरूपंमहान्मे पूर्वंतुनीलरूपकं॥ तृतीयेसुन्दरंरूपंरक्तवर्णा
परात्परं॥ लोकान्तरिचत्वरितासुदुर्गाचशारभे॥ धेरश्रीकालचामुंडावाराहीछिन्नमस्तविका॥ अन्नपूर्णामहाविद्याकलौकल्पव
रप्रदा॥ कुलाचारप्रसन्नास्यात्कुलाचारफलप्रदा॥ वनदूर्गानृग्रदुर्गातथैवसर्वमंगला॥ वज्रप्रस्तारिणीकालीतारेतिनामवाच
का॥ अनेनरूपसंयुक्ताकेवलादक्षिणेश्वरी॥ डामरेवामरेवामरेदेविचोत्तराम्नायडामरे॥ वशिन्याम्नायकेदेविवामरूपक्रियास्पना
॥ ब्रह्ममालामुण्डमालातत्प्रधानातकालिका॥ नारिकेरभवामालासिद्धमालाप्रकीर्त्तिता॥ शैवमालागुरुज्ञाश्चैस्थिरगत्याविनियो
जिता॥ शिवप्रधान्यात्छैवंसाक्षीं भवेःसप्रकीर्त्तिताः॥ शाक्तैःप्राधान्याच्छाक्तेस्यात्छिदुपाहंचिदात्मिक॥ एतद्विलोपनाल्लोपासुज्ञावि
ज्ञेयमीरिता॥ अल्पाचारादधर्मत्वाद्बहुत्वादपिशांकरि॥ सुन्दरीश्रीमहाविद्याराजराजेश्वरेश्वरी॥ न्यासजालैःसदाचारैःकलौ
क्लेशेनसिध्यति॥ स्वःस्वपापिष्ठदिवसाःसंभवंतिकलौयुगे॥ वायवाहुल्यतोदेविसुन्दरीनप्रसीदति॥ ब्रह्ममालाधारणात्तुब्रह्मवि
द्याप्रकीर्त्तिता॥ शिवमालाप्रियत्वाच्चमहापराशिवात्मिका॥ अतएवमहेशानिकादिहादिमतद्वयं॥ कादिहादिमतंदेविद्वयं

यस्यास्तिशंकर ॥ द्वितयेद्दक्षिणेतोयस्तु कालीतारामयोध्रुवं ॥ एवंकादिमतंदेवि नित्याक्लिष्टंनदर्श्यते ॥ चिंतेयेदीक्षणाप्राप्तिः भाग्यपारो
नलभ्यते ॥ मुण्डमालागलेधार्या तत्रकादिमतेशिवे ॥ मुण्डरुद्राक्षसहितैर्धारणीतारिणीविधौ ॥ केवलंमुण्डमालात्तु सर्वसिद्धिपरि
विका ॥ नारिकेरमयीमाला नदभावप्रकीर्त्तिता ॥ एतस्याधारणादेवि किंनयत्नकरास्थितं ॥ श्मशानेभोजनंकार्यं तद्भस्मधारणेछिवे ॥
भगलिंगामृतेर्देवि नत्वचयेतर्प्पयेछिवे ॥ भगानंदपरोभूत्वा भगेयत्नेनसंविशेत् ॥ सुरताज्ञानमेतद्धि कालीतारामयंपरं ॥ भगेनैवसमा
लापास्तु भगःसाधकोभवेत् ॥ ॥देव्युवाच॥ मुण्डमालाधारणंतु कथंकार्यंवदाधुना ॥ ॥शिवउवाच॥ रुद्राक्षवत्धारणंचकालीः
मुण्डमयीपरा ॥ रुद्राक्षैरुद्रमंत्रैश्च मुण्डाक्षकालिकामनुः ॥ मुंडंशिवस्यकंठेतु वर्त्ततेयेनहेतुना ॥ तेनेयंमालिकासिद्धिरुद्रभूष
णारूपिणी ॥ रुद्राक्षाःसाधकेनैव ध्रीयतेसुरीपते ॥ नारिकेरमयीमाला सर्वविद्याविधौश्रुतिः ॥ सर्वस्यान्मुण्डमालेयं कलौजाग
न्निकेवला ॥ कालिकाब्रह्मविद्येयं निर्गुणाचित्स्वरूपिणी ॥ येनकेनप्रकारेण साधनीयापराविका ॥ ससिद्धःसिद्धिदोलोके वज्ञःकिं
परचण्डिके ॥ पारंपराद्भप्रमखेनदंनेराविपार्वति ॥ महिमावर्णितुंशक्तो नहिकोप्यक्षिभूतले ॥ ॥इतिश्रीअक्षोभ्यतारासंदेहभ्रातंत्रेसि

॥गुरु॥
॥९॥

—८/

क्रमतरहस्ये द्वितीयः पटल ॥ २ ॥ ॥ देव्युवाच ॥ देवेश ब्रुहि यत्नेन चाम्नायादिविनिर्णयं ॥ ॥ शिव उवाच ॥ आम्नायो नवधा प्रोक्तश्चोत्तमा
दिप्रभेदतः ॥ त्रिभेदे वहुभेदत्वात्त्रिनयं त्रिनयं त्रिष ॥ उत्तमं शृणु तत्रादौ शैवादिदर्शनेन च ॥ शाक्तं शैवं वैष्णवं च सौरं गाणायमेव च ॥ बौद्धं च
देवदेवेशि दर्शनानि च षट् क्रमात् ॥ षट्दर्शनस्य परा मात्रं ऊर्द्ध्वाम्नाये प्रकीर्त्तिता ॥ अनेनैव प्रकारेण पूर्वदक्षिणपश्चिमाः ॥ उत्तरोर्द्ध्वत्षड्
संज्ञः षाडाम्नायाः प्रकीर्त्तिताः ॥ अयं श्रेष्ठो निगदितो देवालोके विराजते ॥ मध्यमः कथ्यते ह्यापि तिष्ठत्येव न संशयः ॥ मध्यमः सूचितो देवि
दशविद्यादिभेदतः ॥ ऊर्द्ध्वाम्नाये महाषोढाद्युत्तरे तारिणीस्मृता ॥ कनिष्ठश्चैव षड्ब्राभेदैरेवं त्रिधा शिवे ॥ अयं ह्यादिमते प्रोक्तः शृणु
कादिमतेधुना ॥ पूर्वोक्त एव श्रेष्ठः स्याद्दशविद्यादिमध्यतः ॥ महाकामकला काली ऊर्ध्वाम्नायेत्र देवता ॥ दशकाल्यादिभेदैश्च कनिष्ठ
ः परिकीर्त्तिताः ॥ शाक्तं शैवं वैष्णवं च गाणायं शौरमेव च ॥ ऊर्ध्वपूर्वदक्षयोगे प्रत्यकोदक्ष पार्वति ॥ क्रमेणायोजनाद्देवि तदन्यः परिकी
र्त्तितः ॥ बौद्धाम्नाये चेटकाश्च गधर्वाघप्सरादयः ॥ इंद्रजालादिकं देवि पातालाम्नाय मध्यगाः ॥ पूर्वाम्नाये चात्मकौले दिव्यरक्षोत्तद
क्षिणो ॥ पश्चिमे वीरकौलश्च उत्तरे वामयवच ॥ ऊर्द्ध्वे दिव्यो महेशानि पाताले पशुमार्गकः ॥ तदिच्छया तत्तन्मार्गः कीर्त्तितः परमोत्त

मे ॥ ब्रह्मकाला सिद्धरूपा ह्यनिरुद्धसरस्वती ॥ शिवरूपी विन्ध्यरूपा श्रीमंऊर्ध्वसुन्दरी ॥ तत्रापि ब्रह्मवीराया योगं शृणु पार्वति । षट्त्रिं-
शच्छक्तिमध्ये च संगुज्या चोत्तरोत्तरं ॥ उत्तराकादिनीयन भेदा द्विधा स्मृता ॥ पार्वतीया कादिरूपा ह्यादिर्मातंगिनी परा ॥ मातंगिनी तु या ना-
री सा नारी पुष्पिणी यदि ॥ सापि चेद्वा यदि भवेत् सापि प्रथमपुष्पिणी ॥ आषोडशाब्दतः प्रोक्ता सर्वोन्नमोन्नमा ॥ ईदृग्विग्विधा पार्वति
या केवलं कालिका स्मृता ॥ ईदृग्विधां समानीय सुन्दरीं कामलालसां ॥ न्यस्त्वा शक्त्यादयो न्यासा स्तस्याः सर्वांगके प्रिये ॥ एवंभूतं जावचक्रं
योनिचक्रं प्रपूजयेत् ॥ सांगां साचरणां देवि साधस्थापनपूर्वकं ॥ सचल्पनं च संपातसंलोका योनिमण्डलं ॥ संजपेत्परयाशानिध्या-
नपूजापुरःसरं ॥ योनौ ध्यानं प्रकुर्वीत स सिद्धो विजायते ॥ एतस्यालाभतो देवि पार्वतीयां च पुष्पिणीं ॥ पूजयेद्देवदेवेशि त्वभावेस्वि-
यमप्फलं ॥ पूर्वोक्तां स्थापनां वीक्ष्य सामरस्यप्रयोगतः ॥ निर्गुणादन्नयायुक्ताः सगुणाः प्रभवाम्यहं ॥ सगुणाद्दन्नयायुक्तो निर्गुणाः प्रभ-
वाम्यहं ॥ ब्रह्मज्ञानाद्भवेन्मुक्तस्तदुपायो निरेव च ॥ योनिं शक्तिं विहायाथ कालीतारां च यस्मरेत् ॥ स दरिद्रो महापापी वीरहा सैव संम-
तः ॥ एतदभ्यासबाहुल्यात् किं न गच्छन्न केर भवेत् ॥ तत्र मराणासनं वापि क्वाविंशत्यानि च ॥ एतन्मध्ये ग्राह्यमेवं तत्र जप्या तु तारिणी ॥ वी

रासुनंसमारायवरमालींकरांबुजे ॥ वीरपात्रंविरशक्तिंवीरवीधांनतोजयेत् ॥ ध्यानरवांतंचसंधार्यामहामोहनमालिका ॥ एवंता
द्रूप्यतांकृत्वाब्रह्मकालीमयोभवेत् ॥ ब्रह्मत्वंकथमित्युक्तंवदस्वमपिशंकर ॥ ॥ शिवउवाच ॥ नन्दाराधप्यप्रियंवेदेस्त्रीपुंसयोगेय
त्सौख्यं ॥ सामरस्यात्मकंपरं ॥ परनन्दरसोमुक्तिरितिसंख्याप्रकीर्त्तिता ॥ पुंरेतोधिकतोदेविशिवजन्मप्रजायते ॥ स्त्रीवीर्याधिकतो
देविकन्यारूपीस्वयंशिवा ॥ सान्योहिदेविशिवब्रह्मत्वमनिर्गुणोहिनिराकृतिः ॥ निर्गुणत्वंकथंदेवतदेवकथ्यतेश्वरात् ॥ क्रीयमाणास्तुतोदेवि
बुद्धिस्तुकरणतांगता ॥ तद्देवनिर्गुणत्वंचनिराकारत्वमंबिके ॥ अनेकधावर्णमानमेकमेवास्तिकेवलं ॥ यथायथायस्यबुद्धिस्तथातेनप्रव
र्त्तते ॥ वर्णानांशक्तिरूपंचतद्ब्रह्मपरिकीर्त्तितं ॥ पूर्वंसवर्णितंयत्तुसगुणंतत्प्रकीर्त्तितं ॥ अवर्णपरंयन्महेशानिनिर्गुणंतत्प्रकीर्त्तितं ॥ ब्रह्मानन्दसमुत्पत्ति
निर्गुणापिप्रदद्रूपते ॥ निर्गुणोसमताखण्डेनखण्डेसमतापरे ॥ एवंसमरसानन्दोमुक्तिरित्यभिधीयते ॥ योनिलिंगोद्भवंसौख्यंब्रह्मानन्देनतंविदुः ॥
तदुद्भवेमहासौख्यंपरब्रह्मेतिकीर्त्तितं ॥ शक्तिदर्शनजंसौख्यंस्वर्गइत्यभिधियते ॥ सौख्यानन्दोभवेन्मुक्तिरित्युक्तंकालिकागमे ॥ पुनर्गमागमंसौ
ख्यंविरक्तिःपरिकीर्त्तिता ॥ विपरितंब्रह्मतत्वंमहानन्दस्तदुद्भवेत् ॥ आलोकनंब्रह्मपदंस्पर्शनंब्रह्मदर्शनं ॥ संयोगोग्रहणंदेविवियोगःसंक्रमः

स्मृतः॥ ध्वनिर्वाग्यातिदेवेशि संक्षपतो भवं शिवे ॥ परतत्वे स्वात्मशक्तौ स्वात्माकारे शिवे सदा ॥ शरीरस्थे महालिंगे सामरस्यं विलोक्यते ॥ एतदभ्या
सकार्यार्थं शक्तिसंभोगभावना ॥ इदं मुख्यं यथा देवि तथा कुण्डलिनी शिवे ॥ सौख्यानन्दे समायाने सानिनिर्गुणानाभता ॥ असिधाराव्रतास्थेयं
कालिकाकीर्त्तिता भुवि ॥ शक्तियोगाच्छिवे ब्रह्मरूपत्वं कीर्त्तितं मया ॥ सद्गुरुभावनीं कृत्वा पूर्वपरशिवः स्थितः ॥ सर्वसंहारकं कर्म कृत्वा दशविधा
यच्च ॥ सुखद्वंद्वं विहायाथ शिवो ध्यानपरोह्यभूत् ॥ ध्यानस्य संक्षनिर्जातासाध्यसुभावनागता ॥ तदाभ्यासनिपिन्नार्थाशक्तैराकर्षणं कृतं ॥ देव्याज्ञानं॥
शिवो भ्रष्टो मार्गच्युतिपरायणः ॥ शिवस्य तद्विस्मरणं दृष्ट्वा देव्या कृपा कृता ॥ एवं वुद्भिः कृता देव्या शिवोपात्तमयीतिरे ॥ मानसे धृतमात्रेण शिवेना
कर्षणं कृतं ॥ शिवाकर्षणकं कर्म मम मिथ्यात्वदायकं ॥ इत्येवं मानसे धृत्वा मंत्रः कल्पा प्रकाशितः ॥ कालिका कामसुरता महाकालसमन्विता ॥
स एव ब्रह्मादिनाथस्तु परब्रह्मेति गीयते ॥ सच्चिदात्मस्वरूपेयं ब्रह्मरूपाथ निर्गुणा ॥ तयास्वनिर्मितां शक्तिं शिवाग्रे स्वर्गमार्गतः ॥ साधनार्थं मया दत्ता
त्वयं श्रीकालिका ब्रुवीत् ॥ तदा शिवः परशिवः पूर्वाभ्यासेषु तत्परः ॥ एवं शक्तेः साधनाच्च कालीकास्यरूपागतः ॥ कल्पाग्रे शिवशक्तिस्तु पाकार्या निर्मि-
ता पुरा ॥ श्रुतिगर्वान्वितः शंभुर्द्वितीया सुंदरी मम ॥ पूर्वा काली महाविद्या सा वै सुन्दरिका नहि ॥ एकस्मिन् दिवसे देवि द्वाभ्यां शक्तसमन्वितः ॥ प्रपंच

मूलोदि शिवःकालाभ्रसंनिभांवदेत् ॥ द्वितीयावाक्येपितथाघोरदृष्टेतिसंवदेत् ॥ तृतीयचाक्यंदेवेशि द्वितीयांसुन्दरीप्रति ॥ त्रैलोक्यसुन्दरीप्राणप्रि
येममस्वरूपिणी ॥ इत्युक्तेदक्षिणादेवीब्रह्मरूपाद्यचंडिका ॥ आदिशक्तिःपूर्णारूपाक्रोधाविष्टाबभूवचत् ॥ वामसुन्दरंरूपंसौभाग्यपार्णवकरंपरं ॥ राज
राजेश्वरीरूपंविभ्रतीपरमेश्वरि ॥ तदापरशिवःशंभुर्विस्मयीविनलोचनः ॥ प्रकर्षेणात्पंचानांसंयोगोयुगपद्भवेत् ॥ प्रपंचशीलेनविद्यागदितापरमे
श्वरि ॥ महाप्रपंचरूपावैकोटिब्रह्माण्डनायिका ॥ षोडशीवैतदाजातामहाश्रीचक्रनायिका ॥ आद्याश्रीदक्षिणाकालीद्वितीयाकालभैरवी ॥ तृती
याराजराजेश्वरीविद्यायाःपरिकीर्त्तिता ॥ तस्याःकृपाकटाक्षेणराजराजेश्वरोह्यभूत् ॥ न्यासजालादिकंसर्वपूजामंत्राननेकधा ॥ तदैवषडाम्नायाह्यूर्ध्वा
म्नायादिकाःप्रिये ॥ पूर्वाप्रकृतिरूपास्यान्मूलविद्याप्रियंवदे ॥ तदाम्नायप्रपंचोयंनिर्मितःपरमेश्वरि ॥ काद्यंमतंकादिमतंहाद्यंहादिमतंप्रिय ॥ क
कारोह्यादिभूतस्तुहकारस्त्वन्त्ययोमतः ॥ क्षकारोमेरुसंज्ञस्तुस्वराःषोडशकीर्त्तिताः ॥ कहन्तमेवंमहामंत्रस्तूत्तराम्नायगोचरः ॥ उत्तराम्नायराज्ञीचश्रीम
हातारिणीतुसा ॥ सुंदरीकालिकारूपाश्रीमहाब्रह्मतारिणीतारिणी ॥ द्वितयंदेविसर्वदानिष्ठातिप्रिये ॥ एवंयुग्मात्मकोमंत्रःकादिहादिमता
त्मकाः ॥ प्रथमंकादिवर्णोवाहादिकःप्रथमोथवा ॥ कादिःप्रथमंवर्णाःह्यन्यःचरामर्द्धरितः ॥ वीरेश्वरारणींगणानानास्मेचप्रियवादिनि ॥ मात

केतिवेतुख्यातदाग्रक्षसमन्विता। संपूर्णा मातृकादिविद्या चान्ये च न संशयः। तस्मात्कादिमतं चाद्यं कीर्त्तितं प्रियवादिनि। कादिहादि चादिवर्णा गृह्यते
यदि भाविनि। कादिहादिस्थ सर्वत्र मंत्रप्रोक्तो महेश्वरि। ककाराद्युग्ररूपत्वं सुन्दरी परशिवात्मिका। कलौ कादिमतं पुरा पंचवर्गमेकं स्थितं प्रिये। एवं
संसारसिद्ध्यर्थे प्रपंचो निर्मितः पुरा। आगमे बहवो भेदाः षड्दर्शनप्रकारजाः। अन्येऽपि कोटिशो भेदाः सन्त्येव प्रियवादिनि। धर्मशास्त्रं चतुर्वेदाः पुराणां व्या
ख्यातिस्तथा। न्यायमीमांसवेदांतसांख्यं पातंजलं तथा। काव्यादि बहवो भेदाः प्रपंचाश्चैव कीर्त्तिता। यदारभ्य धृतरूपं सुन्दरं परमेश्वरि। तदारभ्य प्रपंचो
यं सर्वत्र परिवर्त्तते। हादिकादिमतं चैकवर्त्तते सत्यवादिनि। तदा पुमांसो देवेशि महाकालस्वरूपिणा। स्त्रियः श्रीकालिकारूपा भवत्येव न संशय
ः। इत्येवं हि प्रपंचार्थं शाक्तं वैष्णवशांभवं। गाणपं सौरबौद्धं च षड्दर्शनमितीरितं। मतानि बहुसंख्यानि संजातानि सुरेश्वरि। वैदिके शाक्तनि
न्दा स्यात् शाक्ते वैष्णवनिन्दनं। वैष्णवे शैवनिंदा स्याच्छैवे गाणपतेस्तथा। गाणपत्ये सौरनिन्दा सौरे विष्णुनिन्दनं। चीने जैनस्य निंदा च जैने कापा
लिकस्य च। कापालिके बौद्धनिन्दा बौद्धे नानाविधा मताः। एवं भिन्ना मतान्याद्यपुराणाद्येषु शांभवि। वेदानां चैव शाखा वै बहवः परिकीर्त्तिताः
। एवं निन्दासमापन्ने भेदा जाता महेश्वरि। नैकेन तु मनो लग्नं नकस्य प्रियवादिनि। सर्वत्रान्योन्यनिन्दा तु पंचेन प्रकाशिता। भिन्नं भिन्नं प्रशंसः

मिनिन्दन्तिचपरस्परं। नविद्यासिद्धिमाप्नोतिसंभ्रमन्तिपिशाचवत्॥ अन्योन्यंयदिनिन्दाननंदैवेकंप्रजापते॥ तस्मादेकस्तुसिद्ध्यर्थंकालिकांभवना-
शिनीं॥ पुनर्वैदैत्यनाशार्थंरूपंसुन्दरमेवच॥ संबिभ्रतीमहादेविविश्वंभाग्यखिलनाशिनी॥ सप्तप्रेतैकापर्यंकराजिनेशवहृदिस्थिता॥ ध्येतरूपंमहाकाल
हृदयांभोजवासिनी॥ कोटिकालानलज्वालाशेवनीयाविधानतः॥ सर्वसर्वादिभूतेयंकादिसिद्धिप्रदायिनी॥ इतिसंक्षेपतःप्रोक्तंकिमन्यछ्रोतुमिच्छ
सि॥ ॥इतिश्रीमदक्षोभ्यतारासंवादेब्रह्मसर्वशायोगेतृतीयःपटल॥३ ॥देव्युवाच॥ देवेशश्रोतुमिच्छामिशक्तिकोणविनिर्णयं॥ ॥शिवउवाच
॥त्रयोग्नयःत्रयोग्रामाःदेवाश्चापित्रयोगणाः॥ भावत्रयंतथाशक्तित्रयीनाडीत्रयात्मिका॥ त्रिधासिद्धिस्थितत्वाख्यापात्रत्रयमयाद्भुतं॥ त्रिकोणवासिनी
कालीवीरसिद्धावरप्रदा॥ ध्येयानेपाकलौदेविनान्यविद्याकदाचन॥ सुन्दरीशिथिलादेविराजसागप्रदर्शना॥ दशकोटिप्रजापाद्धेकदाचित्सदाभवेत्
कलौकालीकलौकालीकलौकालीचकेवला॥ श्रीमत्कादिमताधीशाकलौशीघ्रफलप्रदा॥ सदापंचमकारैश्चपूजयेत्कालिकांविकां॥ शक्तिविनानहि
जपेत्नशक्तिःकारणंविना॥ सदापंचमरुष्वेहमित्येवविभावयेत्॥ एवंभावसमायुक्तःषोढान्यासपरोभवेत्॥ दशविद्याविधौदेविदशधाभिन्नभि
न्नत॥ श्रीविद्यायामहेशानिषोढापंचकमीरितं॥ लघुषोढापूर्वषोढामहाषोढातृतीयका॥ चतुर्थीमंत्रषोढाचपंचमीगण्यषोढिका॥ षोढाष

ङ्कंकालिकायाभेदभेदान्नेशाच॥ लघुषोढामहाषोढागुह्यषोढातृतीयकं॥ मंत्रषोढाशक्तिहंसीदिव्यषोढारसाभिधा॥ षोढाष्ठंचक्रकंक्रोधोछि
न्नायावह्निसंज्ञिका॥ कालिकायांतथोदेविचान्यास्युद्वितयंशिवे॥ लघुषोढामहाषोढाछिन्नायांपरमेश्वरि॥ प्रत्येकंषडृषित्वंचसाध्यातंचसमा॥
चरेत्॥ ऋषिछन्दादिकंयत्रकीर्तितंपरमेश्वरि॥ तदेवतत्रगदितंमन्त्रकेमूलदेवता॥ ध्यानंछेदादिकंस्तोत्रंदेवीवत्सर्वमेवतु॥ श्रुयुतंचपरश्चर्यान्य
सनेक्रममार्गतः॥ इतिसंक्षेपतःप्रोक्तंसर्वमनत्किमिच्छति॥ क्रमेणादशविद्यायाकल्पकाचविधिंवदे॥ कालीतारातथाछिन्नासुन्दरीवगलामुखी
॥ मातंगीकमलालक्ष्मीसिद्धविद्याचभैरवि॥ धूमावतीक्रमेणैवमहाविद्यादशैवतु॥ कालीकूर्चवधूमायाफडन्ताकल्लकामता॥ अघोराख्यो॥
ऋषिःप्रोक्तोदिराट्छन्दःप्रकीर्तितं॥ देवताकल्पकाकालीवीजमायाभिधंमतं॥ कामशक्तिस्तथाकूर्च्चंकीलकंपरिकीर्तितं॥ षट्दीर्घाद्येनका॥
मेनषडंगन्यासईरितं॥ ध्यानपूजादिकंसर्वकालिकावत्समाचरेत्॥ मायारमातथाकूर्चंतारिणीकल्पकामता॥ तारिणीकल्पकायाश्चविरूपा
क्षोऋषिःस्मृतः॥ उष्णिकछन्दः॥ समाख्यामंदेवतानीलतारिणी॥ कूर्चवीजंतथामायाशक्तिवधूचकीलकं॥ मापयातुषडंगानिसर्वनीलसरस्व
ती॥ वज्रवैरोचनींप्रोच्यसेतुध्यानंतेसवर्मच॥ अग्निकालोऋषिःप्रोक्तोगायत्रंछन्दईरितं॥ हंवीजभूत्तथाशक्तिकीलकंरोचिनीमता॥ शिवषड

दीर्घयुक्तेनषडंगन्यासमाचरेत्॥ध्यानपूजादिकंसर्वंछिन्नावत्समुयाचरेत्॥संपत्प्रदायाःप्रथमंबीजंश्रीभैरवीमतौ॥विकरालोऋषिप्रो
क्तःपंक्तिछन्दःप्रकीर्त्तितं॥देवताभैरवीनाम्नाप्राकुल्लुकापरिकीर्त्तिता॥ह्वीजंसैमहाशक्तिरमत्रकीलकंमतं॥षड्दीर्घाढ्यनबीजेनषडंगन्या
समाचरेत्॥ध्यानपूजादिकंसर्वंबालावत्समुपाचरेत्॥सुन्दर्याःकुल्लुकादेवीसम्प्रोक्ताद्वादशाक्षरा॥वाग्भवंकामराजंचलज्जाचत्रिपुरेपदं
॥श्रीचभगवतीप्राच्यन्तस्तेद्वयंवदेत्॥सुन्दरीकुल्लुकायास्तुऋषिरानन्दभैरवः॥गायत्रीछन्दआदिष्टंवाग्भवंबीजमीरितं॥लज्जाशक्ति
र्मेहेशानिकामबीजंचकीलकं॥देवतात्रिपुरेशीचषडंगंत्रिद्वयेनच॥ध्यानपूजादिकंसर्वंसुन्दरीवत्समुपाचरेत्॥मातंगीबगलालक्ष्मीधूम्रो
च्छिष्टाक्रमेश्वरा॥तारंकूर्चंनारसिंहैःपंचानीकुल्लुकामता॥ऋषिर्भैरवनामाचयावत्संदीसिपार्वति॥देवतासैवबीजादिस्वस्वन्तैर्दैवक्रमेण
च॥ध्यानपूजादिकंसर्वंसस्वदेववदाचरेत्॥इतिसंक्षेपतःप्रोक्तंवेहरूपंशृणप्रिये॥केहेश्वरीमहाविद्याद्भुतसिद्धिफलप्रदा॥केहेतित्र्यक्ष
क्षरोमंत्रोयस्यचित्तेविराजते॥सएवकालारूपःस्यान्नारादेहःमवाप्नुयात्॥केहेतिपष्पिराशिसख्यातत्सरंसर्वदाचरेत्॥ऋतुस्नातासमा
दायतस्यायोनिंप्रपूजयेत्॥योनिपूजनमात्रेणत्रैलोक्यविजयीशिवः॥त्रिकोणसंज्ञायोनिःस्यात्तत्रस्थाबिन्दुरुच्यते॥त्रिकोणमध्येसा

गावैतथासावरणीप्रिये॥ सारहस्यांप्रपूज्याथतत्रयंत्रंचिभावयेत्॥ कृत्वावरणपूजाचयत्किंचिज्जयतिप्रिये॥ ततःसर्वसिद्धिर्देविनात्राकार्यो
विचारणा॥ तयापठुच्यतेदेविशुभंवायदिवाशुभं॥ ततःसर्वयत्नेनदेविकर्त्तव्यंहितमिच्छता॥ योनिलिंगामृतैर्देवितर्पणंसर्वदाचरेत्॥ व्र
ह्मरूपासिद्धरूपाप्रसन्नाकालिकाभवेत्॥ उत्तमान्तेयोनिपूजास्याद्यंत्रपूजाचमध्यमा॥ अधमाग्निपूजाचपादपूजाधमाभवेत्॥ कुचपूजा
नाभिपूजाकोणाभावेप्रकीर्त्तिता॥ कोणेतदीयविध्यंतेनास्याल्लिस्त्रःप्रधानिका॥ स्वयंभुस्रवतिवासौसापुष्पंस्रवतिभानवी॥ वीजंस्रवतिचाग्नेयी
त्रिकोणेमध्यगास्मृता॥ आग्नेयनादिकांवीक्ष्यपूजाजाप्यप्रतर्पयेत्॥ भगलिंगामृतैःकुण्डगोलोद्भवस्वयम्भुपुष्पकैः॥ स्वयंभूकुसुमैर्देविपूजयेत्का
लिकांसदा॥ मुण्डमालागलेधार्यामहाशंखंकरांवुजे॥ ध्यायेद्योनिर्मुखेह्लालाकामवालानवाग्रत॥ करमालादंतमालास्वासनंयोनिमण्ड
लं॥ एवंयःकुरुतेदेवित्रिशक्तिसिद्धिमाप्नुयात्॥ अन्यथानान्तजापेश्चवीरसाधनकोटिभिः॥ त्रिसक्तयोनसिद्ध्यन्तिकिमन्यच्छ्रोतुमिच्छसि
॥ ॥इतिश्रीउत्तमतेचतुर्थःपटलः॥ ४॥ ॥देव्युवाच॥ देवेशश्रोतुमिच्छामियक्षिणीमंडलंशुभं॥ ॥शिवउवाच॥ गन्धर्वाप्सरसो
यक्षकिन्नरागुह्यकादयः॥ एतेषांदेवदेवेशिमण्डलानिवहूनिच॥ यक्षिणीमण्डलंचादौततोगंधर्वमण्डलं॥ अप्सराकिंनरीयुग्मंततोऽ

ष्टकयुग्मकं॥ भूतिनीनाशिनीयुग्मेकूष्मांडमंडलंतत॥ महाक्रोधनक्रोधनश्रीयाषण्मंडलेनवा॥ अन्नेथानैवसिध्यन्तिलक्षकोटियुगैरपि
॥ महाविद्यामहायक्षामण्डलंसिद्धमण्डलं॥ महायक्षश्चपक्षिरापोमहायक्षश्चयक्षकं॥ कस्मिन्कोवाभवेद्यक्षोमहत्पक्षश्चकोभवेत्
यक्षिणीकाचकस्यांचमहायक्षिणिकाभवेत्॥ एतद्ज्ञानतोदेवीनहिसिध्यन्तिकुत्रचित्॥ पूर्वोक्तेमण्डलान्यत्रसिध्यन्तिविद्यपाध्रुवं॥ आ
द्यैकालीचतथ्यक्षीमहामधुमतीपरा॥ द्वितीयाभ्रंमराज्ञाचसुन्दर्यास्तुरसुन्दरी॥ भैरव्याःश्चन्द्ररेखाचभार्याश्चभगिनीसुता॥ मातङ्गा
श्रीकिलिकुंटिस्वसृवज्ञालभंजिका॥ यक्षिणीरूपमाख्यातंमहापक्षीचमातृका॥ तारायाःतारिणीयक्षाकिंकरापमानापिका:
॥ छिन्नायालंपटायक्षीविगलापाविडालिका॥ कमलायास्तुधनदाभुवनेश्यापाश्वरागप्रिये॥ त्रैलोक्यमोहिनीयक्षीमातंग्याःश्वरागय
लता॥ श्रीमनोहारिणीप्रोक्ताधूमावत्याःश्वरागप्रिये॥ भिषिणीयक्षिणीप्रोक्तादशमण्डलमीरितं॥ दशविद्याविधौदेविमहाप
स्यप्रकीर्त्तिताः॥ यद्विद्यायाश्चयायक्षीसातस्यासेवकामता॥ तस्याश्चोपासकोयोहितस्यसासिध्यतिध्रुवं॥ अन्यमंत्रंजपन्मानो:
यांकाचिद्यक्षिणींजपेत्॥ नतस्यफलसिद्धिःस्याद्यक्षिणीकोपमाप्नुयात्॥ दशमण्डलपक्षिरापाभेदविकोटिशःस्मृताः॥ तपिवै

दशविद्यानांभेदसिध्यन्तिनान्यथा॥ भूतमण्डलमप्यत्रसिद्धंभवतिनिश्चितं॥ एतद्योवैनजानातितस्यपश्चीकथंभवेत्॥ अथाष्टनापिकाप
श्नेः सिद्धंत्पत्रमहेश्वरि॥ षट्त्रिंशत्तत्वंपश्चिराणोपाश्चिराणःषोडशाप्रिये॥ विद्यासिद्धोप्रसिध्यतिनान्यथानाशमाप्नुयात्॥ ॥इतिश्री
उत्तरखंडेपंचमःपटलः॥ ५॥ ॥देव्युवाच॥ विद्यासिद्धिंविनादेवसिध्यन्तिनहिवावद॥ पश्चिराणादिमहासिद्धिःतस्यहस्तेकथंभवेत्कथंभ
वेत्॥ ॥शिवउवाच॥ एतज्ञानवशाद्देविसर्वेसिध्यन्तिनान्यथा॥ अप्सरामंडलंदेविकिंनरीमंडलंतथा॥ गन्धर्वमंडलंदेविसिद्धगुह्यकमं
डलं॥ पिशाचमंडलंचैवभूतिनीमंडलंतथा॥ कुष्माण्डमंडलंदेवितथाशाबरमंडलं॥ दशविद्याक्रमेणैवश्रीक्रोधमंडलेनचा॥ पापमंड
लयोगेनसर्वासिध्यन्तिसिद्धय॥ मण्डलत्रितयंदेविब्रह्मणाद्याःसुसिद्धिदाः मंत्रसिद्धिविधानेनसर्वेसिध्यन्तिकेवलं॥ कालीतारासुन्दरी
चत्रियोगासिध्यन्तिध्रुवं॥ अन्यथानैवसिध्यन्तिनात्रकार्याविचारणा॥ इतिसंक्षेपतःप्रोक्तंदीक्षान्तंवश्यंराकप्रिये॥ ॥शिवउवाच॥ कादि
तंत्रोक्तमार्गेणपूर्णादीक्षाप्रकीर्तिता॥ हृदन्तश्रीकमतंत्रोक्तरूर्ध्वाम्नायस्वरूपिणी॥ सुधाशांभवतंत्रोक्तानिर्वाणरूपिणीपरा॥ परातां
डवंतत्रोक्ताशांभवाख्याप्रकीर्तिता॥ शक्तिसंगमतंत्रोक्ताशांभवाख्याप्रकीर्तिता॥ उर्ध्वाम्नायपरिज्ञानंपराप्रासादचिंतनं॥ महाषो

॥उ.ख.॥
॥१५॥

ठोपरिज्ञानंनाल्पस्यतपसःफलं॥ पर्यापनित्याचिज्ञाननित्याप्रपूजनं॥ षष्ठीजपप्रकारश्चनाल्पस्यतपसःफलं॥ पंचषोढापरिज्ञानञ्श
क्तिन्यासस्यचिंतनं॥ नामपारायणंनाममंत्रपारायणंतथा॥ युगनित्यापरिज्ञानंनाल्पतपसःफलं॥ पूर्णाभिषेकषट्कंचकालिकामंत्र
चिन्तने॥ नीलसाधनकंकर्मनाल्पस्यतपसःफलं॥ वरात्रयंविनावशांभवादौपरिस्क्रिया॥ कालीतारानामधर्मोनाल्पस्यतपसःफलं॥
श्वनिसद्धकरस्वल्पाःसमाविद्यानचस्तिवे॥ एतस्याःज्ञानमात्रेणकिन्नसिध्यन्तिभूले॥ श्रीविद्यायामहेशानिवीरसाधनमाचरेत्॥ श्व
ह्रोरात्रेकलौतारासुन्दरीसुप्रसीदति॥ सुन्दर्यानीलगांधर्वौसिद्धिमिच्छता॥ महादिव्यक्रमेणैवमहावीरक्रमेणच॥ महानीलाक्रमेणै
वकादिहादिकद्यात्मिका॥ सिद्धंत्वेवमहेशानिश्रीऊर्ध्वपश्चुक्रमात्॥ अन्यादिव्याक्रमेणैवमत्तास्त्रपिमहेश्वरि॥ स्वयंभूपुष्पक्रमतःका
लिकासिद्धिर्दाभवेत्॥ स्वजातपुष्पक्रमतोसाधनाभैरवीमतौ॥ स्वयंभूक्रमेयोगेनकिन्नसिध्यन्तिभूतले॥ वाचासर्वज्ञभवतिवाग्भव
त्तेनकीर्त्तितं॥ वग्भंब्रह्मरूपंचहर्लेखानारीश्वरस्वयं॥ शिवशक्त्यात्मकंवीजंयोजानातिससाधकः॥ वाग्भवंसर्वमूलंतशक्तिचक्रात्मकं
प्रिये॥ शक्तः समरसानन्दसंयोगेयत्सुखंप्रिये॥ तत्सौख्यरूपंदेवेशिवाग्भवंवीजमीरितं॥ निर्गुणंतुनिराकारंसच्चिदानन्दविग्रहं॥ नि

॥ शा॰तु॰ ॥
॥ १६ ॥

ईंदंनिरहंकारंयत्तुलपरिकीर्त्तितं ॥ इदंशास्त्रंपरंब्रह्ममुखादुच्चार्यतेकथं ॥ मुखदुच्चार्यतेसर्ववाग्भवंमुखमुच्यते ॥ वाचासर्वंसंभवतिजगत्
थावरजंगमं ॥ शिवशक्त्यात्मकंदेविवाग्भवंवीजमुत्तमं ॥ शक्तिसचेतनाप्रोक्ताजडःपरशिवोमतः ॥ विनाशक्त्यानिर्गुणास्यमुखादुच्चा
रणाकृत ॥ तस्माच्छक्तिंविहाय्पथसर्वंत्रजडतामता ॥ मुखेशक्तिमयोथोगाद्ब्रह्मसंज्ञाभिधीयते ॥ मुखेशक्तिस्थितानित्यवाकक्षक्तिरि
तिकीर्त्तिता ॥ अर्द्धनारीश्वरंजपंवाग्भवंकीर्त्तितंप्रिये ॥ सर्वादिभूतंतमुखंपरब्रह्मप्रकीर्त्तितं ॥ मुखाउच्चारणांदेवसर्वेषांजायतेप्रिये ॥ वा
ग्भवंतेनसंप्रोक्तंब्रह्मरूपंसनातनं ॥ वाग्भवंमुखमित्युक्तंमुखंब्रह्मप्रकीर्त्तितं ॥ इत्युत्तरमतेषष्ठःपटलः ॥ ६ ॥ शिवउवाच ॥ अथासना
निवक्ष्यामिसर्वकार्यार्थसिद्धये ॥ मृद्वासनसमारूढोकोमलेचूडकेतथा ॥ यानित्वग्विष्टरमपिअस्थिभूम्यासनंतथा ॥ कूर्चासनंतथादे
वितथैवसुरतासनं ॥ मुण्डासनंतथादेविपंचमुण्डासनंतथा ॥ त्रिमुण्डमेकमुण्डंवाआसनार्थंप्रकीर्त्तितं ॥ चितापिआसनेशस्तासमशा
नंसर्वथोत्तमं ॥ चूडकंचतथाप्रोक्तंतथैवचशवासनं ॥ शृतासनंतथाप्रोक्तंमहाशवमथासनं ॥ वीरासनंमहेशानिमहावीरासनंतथा ॥ यो
निपृष्ठासनंदेविकीर्त्तितान्यासनानिच ॥ मन्त्रादौसंप्रवक्ष्यामिमुण्डानांलक्षणांशुभ ॥ यस्यसाधनमात्रेणसाक्षाच्छिवमयोभवेत् ॥ ब्रह्म

॥ उत्त॰ ॥
॥ १६ ॥

क्षत्रियविट्शुद्राश्चतुर्द्धा चासिजातयः॥ श्वेता रक्तास्तथा पीता कृष्णा वै तुर्यका मता॥ इत्येतन्मुण्डं रहसि प्रोक्तं देवि महेश्वरि॥ सद्यः कृत्तं
त्रिरात्रस्थं सप्तरात्रस्थगं तथा॥ त्रिसप्तरात्रमध्यस्थमुत्तमादिक्रमान्मुण्डाः॥ उत्तमं मध्यमं चैव ह्यधमं त्वधमाधमं॥ सद्यः कृत्तं तु यन्मुण्डं उ
त्तमं परिकीर्त्तितं॥ त्रिसप्तमध्यगं मुण्डं मध्यमं परिकीर्त्तितं॥ षट्रात्रोत्तरगं मुण्डं मध्यमं परिकीर्त्तितं॥ त्रिसप्तरात्रमध्यस्थं कीर्त्तितं ह्यधमा
धमं॥ सद्यः कृत्तं यन्मुण्डं द्रव्यकार्ये प्रकीर्त्तितं॥ त्रिरात्रमध्यगं मुण्डं मालायन्त्रे प्रकीर्त्तितं॥ षड्रात्रोत्तरगं मुण्डं पात्रकार्ये विनिर्दिशेत्॥
त्रिसप्तरात्रमध्यस्थं मालायन्त्रादिके मतं॥ षण्मासमध्यगं मुण्डं सामान्यं तदुरीरितं॥ ॥देव्युवाच॥ कालिकापरिशिष्टं तु नान्यथा परि
कीर्त्तितं॥ त्रिरात्रमध्यगं मुण्डं मालार्थे परिकीर्त्तितं॥ षड्रात्रोत्तरगं मुण्डं सामान्यं तदुदीरितं॥ सद्यः कृत्तं तु यन्मुण्डं सामान्यं तदुदीरितं॥
सद्यः कृत्तं तु यन्मुण्डं मालायन्त्रे प्रशस्यते॥ पात्रार्थे साधने शस्तं ‾ भावात् सप्तरात्रजं॥ सद्यः कृत्तं तु यन्मुण्डं साधनार्थे प्रकीर्त्तितं उत्तम
मुण्डमादाय हस्तमात्रं खनेद्बुधः॥ कुलवृक्षस्य मूले वा श्मशाने वा चतुःपथे॥ निर्जने शून्यगेहे वा तस्योपरि जपं चरेत्॥ बलिं दत्वा प्रयत्नेन
दिक्पालेभ्यो विशेषतः॥ दिग्बंधभूतशुद्ध्यादीन्कृत्वा वै जपमाचरेत्॥ यावत्संख्यमनुं जप्त्वा तद्दशांशेन होमयेत्॥ सिद्धमुण्डं पराक्र

त्वामालादीन्कारयेत्प्रिये ।। स्वेछामृतं द्विवर्षं च वृद्धं स्त्रियं द्विजं तथा ।। अत्र भावे मृतं कुष्टं सप्तरात्रोर्द्ध्वगं तथा । एवं वा पूर्णशवं त्यक्त्वा वीरसाधनमा
चरेत् ।। वीरासनमिदं प्रोक्तं कालिकाप्रीतिकारकं ।। सप्तरात्रोत्तरं प्रादौ चान्तरिक्षे स्थितं शवं ।। शूलेनिपातितं वापि पापात्मार्थे शस्येत प्रिये ।। अन्तरी
क्षे स्थितं देवी षण्मासोत्तरगं तथा ।। मालाकारप्रशस्तं च त्वधःस्थां सप्तरात्रजं ।। शनिभौमदिने वापि शरीरे मृतसंभवेत् ।। चतुर्द्दश्यां पौर्ण
मास्याममायान्दीपकोत्सवे ।। संक्रान्त्यां चाष्टमीसंक्रे तथा दुर्गोत्सवे प्रिये ।। एवं वीरादिभेदेपि तथा वीरणागमे ।। ज्ञाते मृताङ्शुभशस्तं मथ
शूलादिके स्थितं ।। खड्गेन हननं कृत्वा गृहीत्वा जपमाचरेत् ।। सहस्रमणिभिर्माला धार्या सर्वांगके प्रिये ।। रुद्राक्षवज्रारणास्यात्कालीमं
त्रेणाशुक्ष्मति ।। मालात्रिविधा प्रोक्ता उत्तमामध्यमाधमा ।। दन्ताक्षमालया चैव राजदन्तेन मेरुणा ।। उत्तमामालिका प्रोक्ता कालिकाकर्षिणी
परा ।। कर्णनेत्रान्तरस्थो यो महाशंखेति कीर्त्तितः ।। महाशंखमयी माला पंचाशन्मणिनिर्मिता ।। मध्यमामालिका प्रोक्ता ताराजापप्रकीर्त्ति
ता ।। अस्थि वा नृमुण्डं वा किंच वा नृललाटजं ।। देहे देहान्तरस्था वा माला प्रोक्ता कनिष्ठिका ।। द्विजो देव्या विधौ देवि एवं हि त्रिविधा मता ।।
।। सुमुखे वा यौ उभौ दन्तौ राजदन्तौ प्रकीर्त्तितौ । करालास्या महाकाल्या दानवा भक्षिताः पुरा ।। त्रैलोक्यगामिनौ दन्तौ राजदन्ताविति स्मृतौ ।।

राजदन्तेतिसंज्ञावैदेव्यापूर्वंकृताप्रिये ॥ यौदेन्यचर्वकौदन्तौममकार्यकरावुभौ ॥ तस्मात्प्रातेनमनसामेरुकार्येनियोजितौ ॥ कालिकासं
हितायान्तुमनमन्यत्प्रकीर्त्तितंसुरवेदेव्यामतेज्ञानियेनदंतेनराजते ॥ तेनकारणतोदेविराजदन्तेतिकीर्त्तितं ॥ अन्यच्छृणुप्रवदन्तेषुराजतेराजद
न्तकः ॥ सूर्याग्निसोमसूत्रैश्चमालाकार्याप्रयत्नतः ॥ वामसोमज्ञायावापिनाडीभिर्वांशुभामता ॥ स्वयंभुवाक्तायानाडीसर्वतोत्तमा ॥ स्वयंभुवाक्तं
यत्सूत्रंसर्वतोत्तमं ॥ पुरांपस्त्रीनिर्मितंसुत्रंकुमारीनिर्मितंतथा ॥ ततोद्विजेंद्रुरूपस्त्रीनिर्मितंग्रंथिवर्जितं ॥ कुंडोक्तंचैवगोलोक्तंस्वयंभुवोक्तंतथैवच ॥
ततोमातंगिनीहस्तात्प्राप्तंतुसर्वतोत्तमं ॥ तथासंग्रथनंकार्यरक्तेनवासमाप्रिये इयंतुसिद्धिदामालाकालिकाकृष्टिकारिणी ॥ याकालीसेवनात्स्याता
